संकेत—(१३) बहुत कहने से क्या—किं बहूक्तेन। दूसरे को भले उपदेश दो—सुखमुपदिश्यते परस्य। यहाँ······करें—अत्र यत्प्राप्तकालं तत्करोतु भवान्।

(१४)

शब्द उसे कहते हैं जिसके उच्चारण से तत्तद्गुणादिविशिष्ट वस्तु का ज्ञान हो। व्याकरणाध्ययन के प्रयोजन हैं—रक्षा, ऊह (तर्क) आगम, लघुत्व और असन्देह। वेदों की रक्षा के लिए व्याकरण पढ़ना चाहिए। वेद के मन्त्रों में उचित स्थान पर विभक्ति आदि के परिवर्तन के लिए व्याकरण पढ़ना चाहिए। यह आदेश भी है

कि ब्राह्मण को निःस्वार्थ भाव से धर्म-स्वरूप षडङ्ग वेद पढ़ना और जानना चाहिए। व्याकरण द्वारा शब्दार्थ ज्ञान में संशय नहीं रहता कि इस शब्द का वास्तविक अर्थ क्या है। (महाभाष्य नवाह्निक)

संकेत—(१४) व्याकरणाध्ययन के प्रयोजन—रक्षोहागमलघ्वसन्देहाः प्रयोजनम्। आदेश भी है—आगमः खल्वपि ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च।

(१५)

शब्द-ज्ञान के बिना संसार में कोई ज्ञान नहीं हो सकता। समस्त ज्ञान शब्द से मिश्रित होकर ही प्रकाशित होता है। शब्द और अर्थ ये दोनों एक ही आत्मा के अपृथक् भेद हैं। अनेकार्थ शब्दों के अर्थों का निर्णय इन साधनों से होता है—संयोग, वियोग, साहचर्य, विरोध, प्रयोजन, कारण, चिह्न, विशेष, अन्य शब्दों की संनिधि, सामर्थ्य, औचित्य, देश, काल, लिङ्ग विशेष, स्वर आदि। (वाक्यपदीय)

संकेत—(१५) शब्द ज्ञान के बिना······

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते।

शब्द और अर्थ ये दोनों—

एकस्यैवात्मनो भेदौ शब्दार्थावपृथक् स्थितौ।

अनेकार्थ शब्दों के अर्थों का निर्णय ······

संयोगो विप्रयोगश्च साहचर्यं विरोधिता।
अर्थः प्रकरणं लिंगं शब्दस्यान्यस्य संनिधिः॥
सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः॥

(१६)

मनुष्यों की हिंसावृत्ति की सीमा नहीं है। पशु-हत्या उनके लिए खेल है। वे खिन्न मन के विनोद के लिए महावन में आकर इच्छानुसार और निर्दयतापूर्वक पशुवध करते हैं। जिस प्रकार भौतिक सुख की इच्छा से मनुष्य उत्साहपूर्वक जीवहिंसा करके अपने हृदय की अति निष्ठुर क्रूरता को प्रकट करते हैं, उसी प्रकार पारलौकिक सुख की आशा से वे महोत्सवपूर्वक निरपराध पशुओं को इष्ट देवता के आगे बलि देकर अपनी क्रूरता का परिचय देते हैं। ये निरन्तर अपनी उन्नति को चाहते हुए प्रतिक्षण सर्वथा स्वार्थसिद्धि के लिए प्रयत्न करते हैं। ये न धर्म को मानते हैं, न सत्य का अनुष्ठान करते हैं, अपितु तृणवत् स्नेह की उपेक्षा करते हैं, विश्वासघात करते हैं, पापाचरण से थोड़ा भी नहीं डरते, झूठ बोलने में नहीं लज्जित होते, सर्वथा अपने स्वार्थ को सिद्ध करना चाहते हैं। (प्रबन्धमंजरी, उद्भिज्जपरिषत्)

संकेत—(१६) सीमा नहीं है—निरवधिः। खेल—आक्रीडनम्। प्रकट करते हैं—प्रकटयन्ति। उपेक्षा करते हैं—उपेक्षन्ते। डरते हैं—बिभ्यति। नहीं लज्जित होते—न लज्जन्ते।

सिद्ध करना चाहते हैं—सिसाधयिषन्ति।

(१७)

प्रेम के लिए इतना ही बस है कि कोई मनुष्य हमें अच्छा लगे, पर श्रद्धा के लिए आवश्यक यह है कि कोई मनुष्य किसी बात में बढ़ा हुआ होने के कारण हमारे सम्मान का पात्र हो। श्रद्धा का व्यापारस्थल विस्तृत है, प्रेम का एकान्त। प्रेम में घनत्व अधिक है और श्रद्धा में विस्तार। प्रेम स्वप्न है तो श्रद्धा जागरण। प्रेम में केवल दो पक्ष होते हैं, श्रद्धा में तीन। प्रेम में कोई मध्यस्थ नहीं, पर श्रद्धा में मध्यस्थ अपेक्षित है। प्रेम एकमात्र अपने ही अनुभव पर निर्भर रहता है, पर श्रद्धा दूसरों के अनुभव पर भी जगती है। (चिन्तामणि)

संकेत—(१७) इतना ही बस है—पर्याप्तमेतदेव। अच्छा लगे-रोचेत। किसी बात में बढ़ा हुआ होने के कारण—कमपि विषयमवलम्ब्य समुन्नत्या। एकान्त—एकान्तम्। जगती है—उद्बुध्यते।

(१८)

वह उन्मत्ता सी, अन्धी सी, बहरी सी, गूंगी सी, सूनी सी, सारे इन्द्रियों के बिना सी, मूर्छित सी, भूत-पकड़ी सी, यौवन-सागर के चंचल तरंगों में लीन सी, रागरूपी रस्सी से वेष्टित सी, कंदर्प के पुष्पबाणों से जड़ी सी, शृङ्गार-भावना के विषरस से घूमते सिर वाली सी, तरुण के रूप की परिभावना रूपी शल्य से कीलित सी, मलयानिल द्वारा जीवन हरी जाती सी, सखियों से कहने लगी—हा प्रिय सखी अनंगलेखा, मेरी छाती पर अपने पाणि-पंकज को रख, विरह का संताप दुस्सह हो रहा है। मुग्धा मदनमंजरी, चंदन-जल से अंगों को भिगो। भोली वसंतसेना, मेरे केशों को बांध। चंचल तरंगवती, अंग में केवड़े के केसर को बिखेर। सुन्दरी मदनमालिनी, सेवार का कंकण बना। चपला चित्रलेखा, मेरे चित्तचोर को चित्रपट पर लिख। भामिनी विलासवती, अवयवों में मोती के चूर्ण डाल। रागिनी रागलेखा, कमलिनी के पत्रों से स्तनों को ढांक दे। भगवती निद्रा, आओ, मेरे ऊपर अनुग्रह करो। दूसरी इन्द्रियों को धिक्कार।

(सुबंधु, वासवदत्ता)

संकेत—(१८) जड़ी सी—कीलितेव। केशों को बांध—संवृणु केशपाशम्। अंग में केवड़े के केसर को बिखेर—विकिरांगेषु कैतकधूलिम्। चित्तचोर को चित्रपट पर लिख—चित्रपटे विलिख चित्तचोरम्। मेरे ऊपर अनुग्रह करो—अनुगृहाण माम्।

(१९)

यहाँ न कलिकाल है, न असत्य है और न कामविकार है। यह त्रिलोक से वन्दित है, गायों से अधिष्ठित है, नदी, स्रोत और प्रपातों से युक्त है, पवित्र है, उपद्रव-रहित है। यहाँ मलिनता हवि-धूम में है, चरित्र में नहीं। मुख की लालिमा तोतों में है, क्रोध में नहीं। तीक्ष्णता कुशाग्रों में है, स्वभाव में नहीं। चंचलता कदली-दलों में है, मनों में नहीं। भ्रमण (भ्रान्ति) अग्नि-प्रदक्षिणा में है, शास्त्रों के विषय में भ्रान्ति नहीं। मुख-विकार वृद्धावस्था के कारण है, धन के अभिमान से नहीं। (कादम्बरी)

संकेत—(१९) यहाँ…नहीं—यत्र मलिनता हविर्धूमेषु न चरित्रेषु। मुख…नहीं—मुखरागः शुकेषु न कोपेषु। वृद्धावस्था के कारण—जरया। धन के अभिमान से नहीं – न धनाभिमानेन।

(२०)

विभाव तथा व्यभिचारिभाव आदि के द्वारा परिपोष को प्राप्त होने वाला, स्पष्ट अनुभावों के द्वारा प्रतीत होने वाला, स्थायिभाव सुख-दुःखात्मक रस होता है।

उनमें से इष्ट विभावादि के द्वारा स्वरूप-सम्पत्ति को प्रकाशित करने वाले शृङ्गार, हास्य, वीर, अद्भुत और शान्त ये पाँच सुख-प्रधान रस हैं। अनिष्ट विभावादि के द्वारा स्वरूप-लाभ करने वाले करुण, रौद्र, बीभत्स और भयानक ये चार दुःखात्मक रस हैं। कुछ आचार्यों के द्वारा जो सब रसों को सुखात्मक बतलाया जाता है वह प्रतीति के विपरीत है। मुख्य विभावों से उत्पन्न काव्य के अभिनय में प्राप्त विभाव आदि से उत्पन्न हुआ भी भयानक, बीभत्स, करुण अथवा रौद्ररस आस्वादन करने वालों की कुछ अवर्णनीय सी क्लेशदशा को उत्पन्न कर देता है। इसीलिए भयानक आदि दृश्यों से सामाजिकों को घबराहट होती है। सुखास्वाद से तो किसी को उद्वेग नहीं होता है। और जो इन करुणादि रसों से भी सहृदयों में चमत्कार दिखलाई देता है वह रसास्वाद के समाप्त होने के बाद यथास्थित जैसे-तैसे पदार्थों को दिखलाने वाले कवि और नटजनों के कौशल के कारण होता है क्योंकि वीरता के अभिमानी जन भी सिर को काट डालने वाले, प्रहार-कुशल वैरी से भी विस्मय का अनुभव करते हैं। सम्पूर्ण अङ्गों को आनन्द प्रदान करने वाले, कवि और नटजनों की शक्ति से उत्पन्न चमत्कार के द्वारा धोखे में आकर बुद्धिमान लोग भी दुःखात्मक करुण आदि रसों में भी परमानन्दरूपता समझने लगते हैं। (नाट्यदर्पण)

संकेत—(२०) विभाव…होता है—स्थायी भावः श्रितोत्कर्षो विभाव-व्यभिचारिभिः। स्पष्टानुभावनिश्चेयः सुख-दुःखात्मको रसः॥ उनमें…वाले—तत्रेष्टविभावादि-प्रथितस्वरूपसम्पत्तयः। वह प्रतीति के विपरीत है— तत् प्रतीति-बाधितम्। सुखास्वाद…होता है—न नाम सुखास्वादादुद्वेगो घटते। वीरता के…करते हैं—विस्मयन्ते हि शिरश्छेदकारिणापि प्रहारकुशलेन वैरिणा शौण्डीरमानिनः। सम्पूर्ण……हैं—अनेनैव

च सर्वाङ्गाह्लादकेन कविनटशक्तिजन्मना चमत्कारेण विप्रलब्धाः परमानन्दरूपतां दुःखात्मकेष्वपि करुणादिषु सुमेधसः प्रतिजानते ।

(२१)

कविगण तो सुख-दुखात्मक संसार के अनुरूप ही रामादि के चरित्र की रचना करते समय सुख-दुःखात्मक रसों से युक्त ही रचना करते हैं। पन्ने का माधुर्य जैसे तीखे आस्वाद से और अधिक अच्छा प्रतीत होता है इसी प्रकार दुःख के आस्वाद से मिलकर सुखों की अनुभूति और भी अधिक आनन्ददायिनी बन जाती हैं। और सीता के हरण, द्रौपदी के केश और वस्त्रों के खींचे जाने, हरिश्चन्द्र की चाण्डाल के यहाँ दासता, रोहिताश्व के मरण, लक्ष्मण के शक्तिभेदन, मालती के मारने के उपक्रम आदि के अभिनय को देखने वाले सहृदयों को सुखकर आस्वाद कैसे हो सकता है ? और अनुकार्यगत करुणादि विलापादियुक्त होने के कारण निश्चित रूप से दुःखात्मक ही होते हैं। यदि उनको अनुकरण में सुखात्मक माना जाय तो वह सम्यक् अनुकरण नहीं हो सकता है। विपरीत रूप में प्रतीत होने से राम के वृत का यथार्थ अनुकरण नहीं बनेगा। और इष्ट जन के विनाश से दुःखियों के सामने करुणादि का वर्णन किए जाने अथवा अभिनय किए जाने पर जो सुखास्वाद होता है वह भी वास्तव में दुःखास्वाद ही होता है। दुःखी व्यक्ति दूसरे दुःखी व्यक्ति की दुःख-वार्ता से सुख सा अनुभव करता है और प्रमोद की वार्ता से उद्विग्न होता है। इसलिए भी करुण आदि रस दुःखात्मक ही होते हैं।

(नाट्यदर्पण)

संकेत—(२१) सुख-दुःखात्मक रसों······हैं—सुख-दुःखात्मकरसानुविद्धमेव ग्रथ्नन्ति। पन्ने का माधुर्य—पानकमाधुर्यम्। तीखे आस्वाद से—तीक्ष्णास्वादेन। देखने वाले······हो सकता है—पश्यतां सहृदयानां को नाम सुखास्वादः ? दुःखात्मक ही होते हैं—दुःखात्मका एव। और इष्टजन······होता है—योऽपीष्टादिविनाशदुःखवतां करुणे वर्ण्यमानेऽभिनीयमाने वा सुखास्वादः सोऽपि परमार्थतो दुःखास्वाद एव। दुःखी······होता है—दुःखी हि दुःखितवार्तया सुखमभिमन्यते, प्रमोदवार्तया तु ताम्यति।

(२२)

विशृङ्खल वाणी वाले कवियों की, रसादि में तात्पर्य की अपेक्षा किए बिना ही काव्यरचना की प्रवृत्ति देखने से ही हमने चित्रकाव्य की कल्पना की है। उचित काव्य-मार्ग का निर्धारण कर दिए जाने पर आधुनिक कवियों के लिए तो ध्वनि से भिन्न और कोई काव्यप्रकार है ही नहीं। रसादितात्पर्य के बिना परिपाकवान् कवियों का व्यापार ही शोभित नहीं होता। रसादितात्पर्य होने पर तो कोई वस्तु ऐसी नहीं है जो अभिमत रस का अङ्ग बनाने पर चमक न उठे। अचेतनपदार्थ भी कोई ऐसे नहीं हैं जो कि ढंग से, उचित रस के विभावरूप से अथवा चेतन व्यवहार के सम्बन्ध द्वारा रस का अङ्ग न बन सकें। जैसा कि कहा भी गया है—अनन्त काव्य जगत् में केवल कवि ही एक

प्रजापति है। उसे जैसा अच्छा लगता है यह विश्व उसी प्रकार बदल जाता है। यदि कवि रसिक है तो यह सारा जगत् रसमय हो जाता है और यदि वह वैरागी है तो यह सब ही नीरस हो जाता है। सुकवि काव्य में अचेतन पदार्थों को भी चेतन के समान और चेतन पदार्थों को भी अचेतन के समान जैसा चाहता है वैसा व्यवहार कराता है। इसलिए पूर्णरूप से रस में तत्पर कवि की ऐसी कोई वस्तु नहीं हो सकती है जो उसकी इच्छा से उसके अभिमत रस का अङ्ग न बन जाय अथवा इस प्रकार उपनिबद्ध होकर चारुत्वातिशय को पोषित न करे। (ध्वन्यालोक)

संकेत—(२२) विशृङ्खल वाणी वाले कवियों को—विशृङ्खलगिरां कवीनाम्। कल्पना की है—परिकल्पितम्। ध्वनि से······नहीं—नास्त्येव ध्वनिव्यतिरिक्तः काव्य-प्रकारः। अनन्त······बदल जाता है—अपारे काव्यसंसारे कविरेकः प्रजापतिः। यथास्मै रोचते विश्वं तथेदं परिवर्तते॥ यदि कवि·····जाता है—शृङ्गारी चेत्कविः काव्ये जातं रसमयं जगत्। स एव वीतरागश्चेन्नीरसं सर्वमेव तत्॥ सुकवि······है—भावानचेतनानपि चेतनवच्चेतनानचेतनवत्। व्यवहारयति यथेष्टं सुकविः काव्ये स्वतन्त्रतया।

(२३)

हम कवि लोग किसी के राजत्व, वीरता, तेजस्विता और धनाढ्यता की परवाह नहीं करते हैं। हम लोग किसी के साभिमान भ्रूभंग को और कोपयुक्त गर्व की बर्बरता को नहीं सहन कर सकते हैं। उसका पृथ्वी पर ऐसा राज्य नहीं है, जैसा कि हमारा साहित्य-जगत् पर। उसके खरीदे हुए गुलाम भी उसकी इच्छा होते ही हाथ जोड़कर उसके सामने खड़े नहीं हो जाते, जैसे कि हमारे सामने इच्छा होते ही पद, वाक्य, छन्द, अलंकार, रीतियाँ, गुण और रस उपस्थित हो जाते हैं। वह अशर्फी देकर भी दूसरों को उतना सन्तुष्ट नहीं कर सकता, जितना की हम केवल कविता से सन्तुष्ट कर सकते हैं। हमारी वीररस की कविता को सुनकर मरता हुआ भी युद्ध में खड़ा हो जाता है। जिसके भाग्य में चिरस्थायिनी कीर्ति होती है, वही हमारा आदर करता है।

(शिवराजविजय)

संकेत—(२३) परवाह नहीं करते हैं—नाऽपेक्षामहे। साभिमान भ्रूभंग को—साभिमानभ्रूभङ्गम्। कोपयुक्त···हैं—कोपाञ्चितगर्वबर्बरतां न सहामहे। ऐसा—तादृशम्। साहित्यजगत् पर—सारस्वतसृष्टौ। खरीदे···ही—क्रीत-दासा अपि तदीहासमकालमेव। अशर्फी देकर भी—दीनारसंभारैरपि। उतना···सकता—न तथा तोषयितुमलम्। मरता हुआ भी—म्रियमाणोऽपि।

(२४)

कुछ समय बाद वर्षा ऋतु आई। उस समय आकाश रूपी सरोवर में कामदेव की स्वर्ण और रत्नजटित नौका की तरह, आकाशरूपी महल के मुख्य द्वार की रत्न-माला

के तुल्य, आकाशरूपी कल्पवृक्ष की सुन्दर कली के तुल्य, कामदेव की रत्न-जटित क्रीडा-यष्टि के तुल्य, इन्द्रधनुषरूपी लता शोभित हुई। क्यारीरूपी खानों में उछलते हुए पीले हरे मेंढकरूपी मोहरों से मानो वर्षा ऋतु बिजली के साथ शतरंज खेल रहा था।

(वासवदत्ता)

संकेत—(२४) स्वर्ण······की तरह—कनकरत्ननौकेव। आकाशरूपी······के तुल्य—नभःसौधतोरणरत्नमालिकेव। कली के तुल्य—कलिकेव। इन्द्रधनुषरूपी लता—इन्द्रधनुर्लता। क्यारी···या—केदारिका—कोष्ठिकासु समुत्पतद्भिः पीतहरितैर्दर्दुरैर्नयद्यूतैरिव चक्रीड विद्युता समं घनकालः।

(२५)

याज्ञवल्क्य की दो पत्नियाँ थीं, मैत्रेयी और कात्यायनी। मैत्रेयी को ब्रह्म का ज्ञान था, किन्तु कात्यायनी सामान्य ज्ञानवाली स्त्री थी। याज्ञवल्क्य ने मैत्रेयी से कहा—मैं संन्यास लेना चाहता हूँ और तुम्हें कुछ बताना चाहता हूँ। मैत्रेयी ने कहा–यदि यह सारी पृथिवी धन से भर जाय तो क्या मैं अमर हो जाऊँगी? याज्ञवल्क्य ने उत्तर दिया–नहीं, नहीं। धन से अमरत्व की कोई आशा नहीं है। तब मैत्रेयी ने कहा—जिससे मैं अमर नहीं हो सकती, उसको लेकर क्या करूँगी। जिससे अमरत्व प्राप्त हो ऐसा ज्ञान मुझे दीजिए। याज्ञवल्क्य ने कहा—पति, स्त्री, पुत्र, धन, पशु, ब्राह्मण, क्षत्रिय, जनता, देवता, वेद और प्राणियों के हित के लिए ये वस्तुएँ प्रिय नहीं होती हैं, वरन् अपनी आत्मा की भलाई के लिए ये वस्तुएँ प्रिय होती हैं। इसलिए आत्मा को देखो, सुनो, मनन और चिन्तन करो। आत्मा के देखने, सुनने, मनन और चिन्तन से सब कुछ ज्ञात हो जाता है। (बृहदारण्यक उप०)

संकेत—(२५) संन्यास लेना चाहता हूँ—प्रव्रजिष्यन् अस्मि। तो क्या मैं अमर हो जाऊँगी—स्यां न्वहं तेनामृता। धन से अमरत्व की कोई आशा नहीं—अमृतत्वस्य तु नाशास्ति वित्तेन। हित के लिए—कामाय। अपनी आत्मा की भलाई के लिए–आत्मनस्तु कामाय। आत्मा को देखो······आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः। आत्मा को देखने···आत्मनि दृष्टे श्रुते मते विज्ञाते इदं सर्वं विदितम्।

(२६)

पर्वत की कन्दराओं से निकली हुई वायु वृक्षों को नचाती हुई सी, मत्त कोकिलों की ध्वनि से गान सी कर रही है। सुगन्धित कमल जल में तरुण सूर्य के तुल्य चमक रहे हैं। वायु एक वृक्ष से दूसरे वृक्ष पर और एक पर्वत से दूसरे पर्वत पर घूमती हुई अनेक रसों का आस्वादन करके आनन्दित सी घूम रही है। भौंरा फूलों का रसास्वादन कर प्रेम-मत्त हो पुष्पों में ही लीन है।

संकेत—(२६) नचाती हुई सी—नर्तयन्निव। गान सी कर रही है—गायतीव। वृक्ष से दूसरे वृक्ष पर—पादपाद् पादपं। घूमती हुई—गच्छन्। आस्वादन करके—आस्वाद्य। घूम रही है—याति। बुलाते हुए से प्रतीत होते हैं—आह्वयन्त इव भान्ति।

अनुवादार्थ गद्य-पद्य-संग्रह

(१) स्वैरिणो विचित्राश्च लोकस्य स्वभावाः प्रवादाश्च । महद्भिस्तु यथार्थदर्शिभिर्भवितव्यम् । नार्हसि मामन्यथा संभावयितुमविशिष्टमिव । (हर्षचरित)

(२) एवंविधयापि चानया दुराचारया कथमपि दैववशेन परिगृहीता विक्लवा भवन्ति राजानः, सर्वाविनयाधिष्ठानतां च गच्छन्ति । (कादम्बरी)

(३) अभिजातमहिमिव लंघयति । शूरं कण्टकमिव परिहरति । विनीतं पातकिनमिव नोपसर्पति । मनस्विनमुन्मत्तमिवोपहसति । परस्परविरुद्धं चेन्द्रजालमिव दर्शयन्ती प्रकटयति जगति निजं चरितम् । (कादम्बरी)

(४) सर्वथा तमभिनन्दन्ति, तमालपन्ति, तं पार्श्वे कुर्वन्ति, तं संवर्धयन्ति, तेन सह सुखमवतिष्ठन्ते, तस्मै ददति, तं मित्रतामुपजनयन्ति, तस्य वचनं शृण्वन्ति, तत्र वर्षन्ति, तं बहुमन्यन्ते ; योऽहर्निशमनवरतमुपरचितांजलिरधिदैवतमिव विगतान्यकर्तव्यः स्तौति, यो वा माहात्म्यमुद्भावयति । (कादम्बरी)

(५) सखे पुण्डरीक, नैतदनुरूपं भवतः । क्षुद्रजनक्षुण्ण एष मार्गः । धैर्यधना हि साधवः । किं यः कश्चन प्राकृत इव विक्लवीभवन्तमात्मानं न रुणत्सि ? क्व ते तद्धैर्यम् ? क्वासाविन्द्रियजयः ? क्व तद्वशित्वम् ? क्व तत्कुलक्रमागतं ब्रह्मचर्यम् ? क्व ते गुरूपदेशाः ? (कादम्बरी)

(६) सर्वथा निष्फला प्रज्ञा, निर्गुणो धर्मशास्त्राभ्यासः, निरर्थकः संस्कारः, निरुपकारको गुरूपदेशविवेकः, निष्प्रयोजना प्रबुद्धता, इदमत्र भवादृशा अपि रागाभिषंगैः कलुषीक्रियन्ते, प्रमादैश्चाभिभूयन्ते । (कादम्बरी)

(७) तस्य दुहिता प्रत्यादेश इव श्रियः, प्राणा इव कुसुमधन्वनः, सौकुमार्यविडम्बितनवमालिका नवमालिका नाम कन्यका । (दशकुमारचरित)

---

(१) स्वैरिणो—मनमानी । प्रवादाः—किंवदंतियां ।

(२) दुराचारया—दुराचारिणी द्वारा । परिगृहीता—पकड़े गए ।

(३) अभिजातम्—कुलीन को । अहिमिव—साँप की तरह । उपहसति—उपहास करती है ।

(४) अहर्निश······दैवतमिव—बराबर हाथ जोड़कर इष्टदेवता की तरह ।

(५) क्षुद्रजनक्षुण्ण—क्षुद्र जनों द्वारा सेवित । प्राकृत इव—साधारण मनुष्य की तरह । न रुणत्सि—नहीं रोकता है । कुलक्रमागतम्—वंशपरंपरा से आया हुआ ।

(६) निर्गुणः—व्यर्थ । निरुपकारकः—अनुपकारक । रागाभिषंगैः—राग के संसर्ग से । अभिभूयन्ते—पराजित होवें ।

(७) प्रत्यादेश-प्रत्याख्यान । सौकुमार्यविडम्बितनवमालिका—सुकुमारता में नवमालिका (चमेली) को मात करने वाली ।

(८) अविश्वासता हि जन्मभूमिरलक्ष्म्याः। यावता च नयेन विना न लोकयात्रा स लोक एव सिद्धः नात्र शास्त्रेणार्थः। स्तनंधयोऽपि हि तैस्तैरुपायैः स्तनपानं जनन्या लिप्स्यते। (दशकुमार०)

(९) न शक्नोमि चैनामत्र पित्रोरनभ्यनुज्ञयोपयम्य जीवितुम्। अतोऽस्यामेव यामिन्यां देशमिमं जिहासामि, को वाहम्, यथा त्वमाज्ञापयसि। (दशकुमार०)

(१०) तेषु तेषु रम्यतरेषु स्थानेषु तया सह तानि तान्यपरिसमाप्तान्यपुनरुक्तानि न केवलं चन्द्रमाः कादम्बर्या सह, कादम्बरी महाश्वेतया सह, महाश्वेता तु पुण्डरीकेण सह, पुण्डरीकोऽपि चन्द्रमसा सह सर्वम् एव सर्वकालं सर्वसुखान्यनुभवन्तः परां कोटिमानन्दस्याध्यगच्छन्। (कादम्बरी)

(११) अलमनया कथया। संह्रियतामियम्। अहमप्यसमर्थः श्रोतुम्। अतिक्रान्तान्यपि संकीर्त्यमानान्यनुभवसमां वेदनामुपजनयन्ति सुहृज्जनस्य दुःखानि। (कादं०)

(१२) लोके हि लोहेभ्यः कठिनतराः खलु स्नेहमया बन्धनपाशाः, यदाकृष्टास्तिर्यञ्चोऽप्येवमाचरन्ति। (हर्षचरित)

(१३) अहो मे कृतापकारेणापि विधिनोपकृतिरेव कृता, यदयं लोचनगोचरतां नीतः समुद्रः। तदत्र देहमुत्सृज्य प्रियाविरहाग्निं निर्वापयामि। (वासवदत्ता)

(१४) अथ सहर्षं समुत्थाय मकरन्दस्तां तमालिकामाहूय विदितवृत्तान्तामकरोत्, सा तु तस्मै कृतप्रणामा तां पत्रिकामुपानयत्। अथ मकरन्दस्तमादाय पत्रिकां विस्रस्य स्वयमेवावाचयत्। (वासवदत्ता)

(१५) एतदपि सुविदग्धजनजलभरितशृङ्गकजलप्रहारमुक्तसीत्कारमनोहरं वारविलासिनीजनविलसितमालोकयतु प्रियवयस्यः। (रत्नावली)

(१६) तावदेतत् खलु मलयमारुतान्दोलितमुकुलायमानसहकारमंजरीरेणुपटलप्रतिबद्धपटविनानं मतमधुकरमुक्तझंकारमिलितकोकिलालापसंगीतसुखावहं तवागमनदर्शितादरमिव मकरन्दोद्यानं लक्ष्यते। (रत्नावली)

(१७) हन्त हन्त, संप्रति विपर्यस्तो जीवलोकः। अद्यावसितं जीवितप्रयोजनं

---

(८) अलक्ष्म्याः—दरिद्रता की। स्तनंधयोऽपि—दुधमुहा बच्चा भी।

(९) यामिन्यां—रात में। जिहासामि—छोड़ देना चाहता हूँ।

(११) वेदनाम्—दुःख को।

(१२) तिर्यञ्चोऽपि—पशु-पक्षी भी। एवमाचरन्ति—ऐसा करते हैं।

(१३) निर्वापयामि—बुझाऊंगा।

(१४) आहूय—बुलाकर। विस्रस्य—खोलकर।

(१५) वारविलासिनी—वारांगना

(१७) अद्यावसितम् - आज समाप्त हो गया। जीर्णारण्यम्—पुराना जंगल।

रामस्य । शून्यमधुना जीर्णारण्यं जगत् । असारः संसारः । कष्टप्रायं शरीरम् । अशर णोऽस्मि । किं करोमि ? का गतिः ? (उत्तररामचरित)

(१८) जाते जानकि ! किं करोमि ? दृढवज्रलेपप्रतिबन्धनिश्चलं हतजीवितं मां मन्दभागिनीं न परित्यजति । (उत्तररामचरित)

(१९) कुमार, कृतं कृतमश्वेन । तर्जयन्ति विस्फारितशरासनाः कुमारमायुधीय-श्रेणयः । दूरे चाश्रमपदमितः । तदेहि, हरिणप्लुतैः पलायामहे । (उत्तरराम०)

(२०) एषा मे मनोरथप्रियतमा सकुसुमास्तरणं शिलापट्टमधिशयाना सखीभ्यामन्वास्यते । सागरं वर्जयित्वा कुत्र वा महानद्यवतरति । क इदानीं सहकारमन्तरेणातिमुक्तलता पल्लवितां सहते । (अभिज्ञानशाकुन्तल)

(२१) तौ कुशलवौ भगवता वाल्मीकिना धात्रीकर्म वस्तुतः परिगृह्य पोषितौ प रक्षितौ च कृतचूडौ च त्रयीवर्जमितरा विद्याः सावधानेन परिपाठितौ । समनन्तरञ्च गर्भ देकादशे वर्षे क्षात्रेण कल्पेनोपनीय गुरुणा त्रयीं विद्यामध्यापितौ । (उत्तरराम०)

(२२) हा दयित माधव ! परलोकगतोऽसि स्मर्तव्यो युष्माभिरयं जनः । न ख स उपरतो यस्य वल्लभो जनः स्मरति । (मालतीमाधव)

(२३) अलमत्यन्तशोकावेगेन । वीरपुरुषोचितां विपत्तिमुपगते पितरि त्वमपि तदनुरूपेणैव वीर्येण शोकसागरमुत्तीर्य सुखी भव । (वेणीसंहार)

(२४) यथेदं त्वरते मे परिभवानलदह्यमानमिदं चेतस्तत्प्रतीकारजलावगाहनाय । तदहं गत्वा तातवधविषण्णमानसं कुरुपतिं सैनापत्यस्वयंग्रहणप्रणयसमाश्वासनया मन्द संतापं करोमि । (वेणीसंहार)

(२५) आः दुरात्मन्, द्रौपदीकेशाम्बरकर्षणमहापातकिन्, धार्तराष्ट्रा , चिरस्य खलु कालस्य मत्संमुखीनमागतोऽसि । क्षुद्रपशो, क्वेदानीं गम्यते । अ भो भो राधेय-दुर्योधन-सौबल-प्रभृतयः पाण्डवविद्वेषिणश्चापपाणयो मानधनाः, शृ भवन्तः । (वेणीसंहार)

---

(१८) हतजीवितम्—हतभागा यह जीवन । मां मन्दभागिनीम्—मुझ गिनी को ।

(१९) कृतमश्वेन—रहने दो घोड़े को । आयुधीयश्रेणयः—शस्त्रध की पंक्ति ।

(२०) सहकार—आम । अतिमुक्तलता—माधवीलता । पल्लव—पत्र ।

(२१) कल्पेन—शास्त्रविधि से ।

(२३) शोकसागरमुत्तीर्य—शोक रूपी समुद्र को पार कर ।

(२४) त्वरते—जल्दी कर रहा है । मन्दसंतापं करोमि – संताप कम करता हूँ

(२५) मत्संमुखीनमागतोऽसि—मेरे सम्मुख आये हो ।

(२६) आः, का शक्तिरस्ति दुरात्मनः पवनतनयस्यान्यस्य वा मयि जीवति शस्त्रपाणौ वत्सस्य छायामप्याक्रमितुम् ? वत्स, न भेतव्यं न भेतव्यम् । कः कोऽत्र भोः ? रथमुपनय । (वेणीसंहार)

(२७) श्रियोऽपि दानोपभोगाभ्यामुपयोगं नयेत् । न लोभं कुर्यात् । बहुलाभोनुगतः किरणकलापोऽपि संतापयति जनम् । (नलचम्पू)

(२८) यत्र च विपत्त्राः सन्ति साधवो न तु तरवः, विजृम्भमाणकमलानि सरांसि न जनमनांसि, कुवलयालंकाराः क्रीडादीर्घिका न सीमन्तिन्यः, विपदाक्रान्तानि सरित्कूलानि न कुलानि । (नलचम्पू)

(२९) यत्र, शास्त्रे शस्त्रे च वेदे वैद्ये च भरते भारते च कल्पे शिल्पे च प्रधानो, धनी, धन्यो, धान्यवान्, विदग्धो वाचि, मुग्धो मुखे, स्निग्धो मनसि, वसति निरन्तरमशोको लोकः । (नलचम्पू)

(३०) स्वयमेवोत्पद्यन्ते एवंविधाः कुलपांसवो निःस्नेहाः पशवो येषां क्षुद्राणां प्रज्ञा पराभिसन्धानाय न ज्ञानाय, पराक्रमः प्राणिनामुपघाताय नोपकाराय, धनपरित्यागः कामाय न धर्माय, किं बहुना, सर्वमेव येषां दोषाय न गुणाय । (कादं०)

(३१) अति प्रबलपिपासावसन्नानि गन्तुमल्पमपि मे नालमङ्गकानि । अलमप्रभुरस्म्यात्मनः । सीदति मे हृदयम् । अन्धकारतामुपयाति चक्षुः । अपि नाम खलो विधिरनिच्छतोऽपि मे मरणमद्यैवोपपादयेत् । (कादं०)

(३२) तस्य तरुषण्डस्य मध्ये मणिदर्पणमिव त्रैलोक्यलक्ष्म्याः क्वचित् त्र्यम्बक-वृषभविषाणकोटिखण्डिततटशिलाखण्डं क्वचिदैरावतदशनमुसल-खण्डितकुमुददण्डमच्छोदं नाम सरो दृष्टवान् । (कादं०)

(३३) कीटोऽपि सुमनःसङ्गादारोहति सतां शिरः ।
अश्माऽपि याति देवत्वं महद्भिः सुप्रतिष्ठितः ॥

---

(२६) छायामप्याक्रमितुम्—छाया को लांघ सकने में भी ।

(२७) बहुलोभानुगतः—बहुलोभानुगत (बहुत लोभी या बहुत सूर्य में अवस्थित) ।

(२८) विपत्त्राः—विना पत्र या विपद । विजृम्भमाणकमलानि—फूलते कमलों वाले, फैलते मल वाले । कुवलय—कमल, खराब वलय । विपदाक्रान्तानि—पक्षियों के चरण, विपत्ति से आक्रान्त ।

(३०) अभिसन्धान—धोखा ।

(३१) अवसन्न—समाप्त । सीद्-दुःखित होना ।

(३२) तरुषण्ड—वृक्षवन । त्र्यम्बकवृषभ-शिवजी का बैल । विषाण-सींग । ऐरा-वत-इन्द्र का हाथी ।

(३३) अश्माऽपि-पत्थर भी ।

(३४) गुणा गुणज्ञेषु गुणा भवन्ति, ते निर्गुणं प्राप्य भवन्ति दोषाः ।
आस्वाद्यतोयाः प्रवहन्ति नद्यः, समुद्रमासाद्य भवन्त्यपेयाः ॥

(३५) इज्याध्ययनदानानि तपः सत्यं धृतिः क्षमा ।
अलोभ इति मार्गोऽयं धर्मस्याष्टविधः स्मृतः ॥

(३६) विपदि धैर्यमथाऽभ्युदये क्षमा, सदसि वाक्पटुता युधि विक्रमः ।
यशसि चाऽभिरुचिर्व्यसनं श्रुतौ, प्रकृतिसिद्धमिदं हि महात्मनाम् ॥

(३७) निर्वाणदीपे किमु तैलदानं चौरे गते वा किमु सावधानम् ।
वयो गते किं वनिताविलासः पयोगते किं खलु सेतुबन्धः ।

(३८) गुणेषु क्रियतां यत्नः किमाटोपैः प्रयोजनम् ।
विक्रीयन्ते न घण्टाभिर्गावः क्षीरविवर्जिताः ॥

(३९) शशिदिवाकरयोर्ग्रहपीडनं गजभुजङ्गमयोरपि बन्धनम् ।
मतिमताञ्च विलोक्य दरिद्रतां विधिरहो बलवानिति मे मतिः ।

(४०) निर्गुणेष्वपि सत्त्वेषु दयां कुर्वन्ति साधवः ।
न हि संहरते ज्योत्स्नां चन्द्रश्चाण्डालवेश्मनि ॥

(४१) परोक्षे कार्यहन्तारं प्रत्यक्षे प्रियवादिनम् ।
वर्जयेत्तादृशं मित्रं विषकुम्भं पयोमुखम् ॥

(४२) संलापितानां मधुरैर्वचोभिर्मिथ्योपचारैश्च वशीकृतानाम् ।
आशावतां श्रद्दधतां च लोके किमर्थिनां वञ्चयितव्यमस्ति ॥

(४३) प्राक्पादयोः पतति खादति पृष्ठमांसं कर्णे कलं किमपि रौति शनैर्विचित्रम् ।
छिद्रं निरूप्य सहसा प्रविशत्यशङ्कः सर्वं खलस्य चरितं मशकः करोति ॥

(४४) दुर्जनः प्रियवादी च नैतद्विश्वासकारणम् ।
मधु तिष्ठति जिह्वाग्रे हृदि हालाहलं विषम् ॥

(४५) नारिकेलसमाकारा दृश्यन्ते हि सुहृज्जनाः ।
अन्ये बदरिकाकारा बहिरेव मनोहराः ॥

---

(३४) आस्वाद्यतोयाः—पीने योग्य जल वाली ।
(३५) इज्या-यज्ञ । धृतिः-धैर्य ।
(३६) सदसि-सभा में ।
(३८) आटोप—कृत्रिम वेष ।
(३९) मतिमतां—बुद्धिमानों को ।
(४०) सत्त्वेषु—जीवों पर । वेश्मनि—घर में ।
(४२) आशावताम्—आशा रखने वाले लोगों को ।
(४३) प्राक्—पहले । पृष्ठमांसम्—पीठ का मांस । कलम्—सुमधुर । रौति—गुनगुनाता है । अशङ्कः—निर्भय ।
(४५) बदरिकाकाराः—बैर के फल की तरह ।

(४६) तानीन्द्रियाण्यविकलानि तदेव नाम सा बुद्धिरप्रतिहता वचनं तदेव ।
अर्थोष्मणा विरहितः पुरुषः स एव अन्यः क्षणेन भवतीति विचित्रमेतत् ॥

(४७) मनस्वी म्रियते कामं कार्पण्यं न तु गच्छति ।
अपि निर्वाणमायाति नाऽनलो याति शीतताम् ॥

(४८) सर्वाः सम्पत्तयस्तस्य सन्तुष्टं यस्य मानसम् ।
उपानद्गूढपादस्य ननु चर्मावृतेव भूः ॥

(४९) वरं वनं व्याघ्रगजेन्द्रसेवितं, द्रुमालयं पक्वफलाम्बुभोजनम् ।
तृणानि शय्याः, परिधानवल्कलं न बन्धुमध्ये धनहीनजीवनम् ॥

(शाकुन्तले)

(५०) यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया
कण्ठः स्तम्भितबाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम् ।
वैक्लव्यं मम तावदीदृशमपि स्नेहादरण्यौकसः
पीड्यन्ते गृहिणः कथं नु तनयाविश्लेषदुःखैर्नवैः ॥

(५१) पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या
नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम् ।
आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम् ॥

(५२) शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने
भर्तुर्विप्रकृतापि रोषणतया मा स्म प्रतीपं गमः ।
भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः ॥

---

(४६) अर्थोष्मणा—धन की गर्मी से ।

(४७) कार्पण्यम्—दीनता । निर्वाणमायाति—बुझ जाती है ।

(४८) चर्मावृत—चर्म से आच्छादित ।

(५०) स्तम्भितबाष्पवृत्तिकलुषः—अन्तर्निरुद्ध आँसुओं के उद्गम के कारण गद्गद । वैक्लव्यम्-व्याकुलता । अरण्यौकसः—जंगल में रहने वाले का । तनयाविश्लेषदुःखैः—बेटी की जुदाई के दुःखों से ।

(५१ , प्रियमण्डना-अलंकारों को पसन्द करने वाली । कुसुमप्रसूतिसमये—पुष्पों के उत्पन्न होने के समय

(५२) प्रियसखीवृत्तिम्-प्यारी सखी का सा बर्ताव । सपत्नीजने-सौतों में । विप्रकृता-तिरस्कृत । प्रतीपम्-प्रतिकूल । दक्षिणा-उदार । अनुत्सेकिनी-गर्वरहित । वामाः-प्रतिकूल आचरण करने वाली । कुलस्याधयः—कुल के लिए मानसिक रोग की भाँति कष्टदायक ।

(५३) अभिजनवतो भर्तुः श्लाघ्ये स्थिता गृहिणीपदे
विभवगुरुभिः कृत्यैस्तस्य प्रतिक्षणमाकुला।
तनयमचिरात्प्राचीवार्कं प्रसूय च पावनम्
मम विरहजां न त्वं वत्से शुचं गणयिष्यसि ॥

(५४) अर्थो हि कन्या परकीय एव
तामद्य संप्रेष्य परिग्रहीतुः।
जातो ममायं विशदः प्रकामं
प्रत्यर्पितन्यास इवान्तरात्मा ॥

(कुमारसम्भवे)

(५५) अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः।
पूर्वापरौ तोयनिधी वगाह्य स्थितः पृथिव्या इव मानदण्डः ॥

(५६) अनन्तरत्नप्रभवस्य यस्य हिमं न सौभाग्यविलोपि जातम्।
एको हि दोषो गुणसंनिपाते निमज्जतीन्दोः किरणेष्विवाङ्कः ॥

(५७) लांगूलविक्षेपविसर्पिशोभैरितस्ततश्चन्द्रमरीचिगौरैः।
यस्यार्थयुक्तं गिरिराजशब्दं कुर्वन्ति बालव्यजनैश्चमर्यः ॥ ५७ ॥

(५८) भागीरथीनिर्झरसीकराणां वोढा मुहुः कम्पितदेवदारुः।
यद्वायुरन्विष्टमृगैः किरातैरासेव्यते भिन्नशिखण्डिबर्हः ॥

(रघुवंशे)

(५९) कुरुष्व तावत्करभोरु पश्चान्मार्गे मृगप्रेक्षिणि दृष्टिपातम्।
एषा विदूरीभवतः समुद्रात्सकानना निष्पततीव भूमिः ॥

(६०) क्वचित्पथा संचरते सुराणां क्वचिद्घनानां पततां क्वचिच्च।
यथाविधो मे मनसोऽभिलाषः प्रवर्तते पश्य तथा विमानम् ॥

(६१) सैषा स्थली यत्र विचिन्वता त्वां भ्रष्टं मया नूपुरमेकमुर्व्याम्।
अदृश्यत त्वच्चरणारविन्दविश्लेषदुःखादिव बद्धमौनम् ॥

(६२) त्वं रक्षसा भीरु यतोऽपनीता तं मार्गमेता कृपया लता मे।
अदर्शयन्वक्तुमशक्नुवत्यः शाखाभिरावर्जितपल्लवाभिः ॥

---

(५६) अनन्तरत्नप्रभव— अनन्त रत्नों के उत्पादक। निमज्जति—विलीन हो जाता है।

(५७) चन्द्रमरीचिगौरः—चन्द्र-किरणों के समान श्वेत।

(५८) भागीरथीनिर्झरसीकराणाम्—भागीरथी के निर्झर की फुहारों को।

(५९) करभोरु—करभ सी ऊरुवाली।

(६१) विचिन्वता—खोजते हुए।

(६२) वक्तुमशक्नुवत्यः—बोलने में असमर्थ।

(६३) क्वचित्प्रभालेपिभिरिन्द्रनीलैर्मुक्तामयी यष्टिरिवानुविद्धा ।
अन्यत्र माला सितपंकजानामिन्दीवरैरुत्खचितान्तरेव ॥

मृच्छकटिकात्

(६४) सुख हि दुःखान्यनुभूय शोभते घनान्धकारेष्विव दीपदर्शनम् ।
सुखात्तु यो याति नरो दरिद्रतां धृतः शरीरेण मृतः स जीवति ॥

(६५) एतत्तु मां दहति यद् गृहमस्मदीयं क्षीणार्थमित्यतिथयः परिवर्जयन्ति ।
संशुष्कसान्द्रमदलेखमिव भ्रमन्तः कालात्यये मधुकराः करिणः कपोलम् ॥

(६६) सत्यं न मे विभवनाशकृतास्ति चिन्ता
भाग्यक्रमेण हि धनानि भवन्ति यान्ति ।
एतत्तु मां दहति नष्टधनाश्रयस्य
यत्सौहृदादपि जनाः शिथिलीभवन्ति ॥

(६७) दारिद्र्याद्ध्रियमेति ह्रीपरिगतः प्रभ्रश्यते तेजसो
निस्तेजाः परिभूयते परिभवान्निर्वेदमापद्यते ।
निर्विण्णः शुचमेति शोकपिहितो बुद्ध्या परित्यज्यते
निर्बुद्धिः क्षयमेत्यहो निधनता सर्वापदामास्पदम् ॥

(६८) निवासश्चिन्तायाः परपरिभवो वैरमपरं
जुगुप्सा मित्राणां स्वजनजनविद्वेषकरणम् ।
वनं गन्तुं बुद्धिर्भवति च कलत्रात्परिभवो
हृदिस्थः शोकाग्निर्न च दहति सन्तापयति च ॥

(६९) दारिद्र्यात्पुरुषस्य बान्धवजनो वाक्ये न सन्तिष्ठते
सुस्निग्धा विमुखीभवन्ति सुहृदः स्फारीभवन्त्यापदः ।
सत्त्वं ह्रासमुपैति शीलशशिनः कान्तिः परिम्लायते
पापं कर्म च यत्परैरपि कृतं तत्तस्य सम्भाव्यते ॥

---

(६३) सितपंकजानामिन्दीवरैरुत्खचितान्तरेव—नील कमलों से भीतर खचित श्वेतपंकजों की ।

(६५) संशुष्कसान्द्रमदलेखम्—सूखी हुई घनी दानजल की रेखा वाले । कालात्यये—समय के बीत जाने पर ।

(६६) नष्टधनाश्रयस्य—जिसके घर का धन नष्ट हो गया है ।

(६७) ह्रियम्—लज्जा को । परिभूयते—तिरस्कृत होता है । निर्वेदम्—दुःख को । शुचम्—शोक को ।

(६८) कलत्रात्—पत्नी से ।

(६९) सुस्निग्धाः—अत्यधिक स्नेहशील व्यक्ति ।
स्फारीभवन्ति—बढ़ जाती हैं । शीलशशिनः—शीलरूपी चन्द्रमा की ।

(७०) सत्रं नैव हि कश्चिदस्य कुरुते सम्भाषते नादरात्
सम्प्राप्तो गृहमुत्सवेषु धनिनां सावज्ञमालोक्यते ।
दूरादेव महाजनस्य विहरत्यल्पच्छदो लज्जया
मन्ये निर्धनता प्रकाममपरं षष्ठं महापातकम् ॥

(नैषधे)

(७१) धिगस्तु तृष्णातरलं भवन्मनः समीक्ष्य पक्षान्मम हेमजन्मनः ।
तवार्णवस्येव तुषारसीकरैर्भवेदमीभिः कमलोदयः कियान् ॥

(७२) पदे पदे सन्ति भटा रणोद्भटा न तेषु हिंसारस एष पूर्यते ।
धिगीदृशं ते नृपते कुविक्रमं कृपाश्रये यः कृपणे पतत्रिणि ॥

(७३) मदेकपुत्रा जननी जरातुरा नवप्रसूतिर्वरटा तपस्विनी ।
गतिस्तयोरेष जनस्तमर्दयन्, अहो विधे त्वां करुणा रुणद्धि न ॥

(७४) मुहूर्तमात्रं भवनिन्दया दयासखाः सखायः स्रवदश्रवो मम ।
निवृत्तिमेष्यन्ति परं दुरुत्तरस्त्वयैव मातः सुतशोकसागरः ॥

(७५) ममैव शोकेन विदीर्णवक्षसा त्वया विचित्राङ्गि विपद्यते यदि ।
तदास्मि दैवेन हतोऽपि हा हतः स्फुटं यतस्ते शिशवः परासवः ॥

(७६) सुताः, कमाहूय चिराय चुंकृतै-
विधाय कम्प्राणि मुखानि कं प्रति ।
कथासु शिष्यध्वमिति प्रमील्य स
स्रुतस्य सेकाद् बुबुधे नृपाश्रुणः ॥

(७७) अपां विहारे तव हारविभ्रमं करोतु नीरे पृषदुत्करस्तरन् ।
कठोरपीनोच्चकुचद्वयीतटत्रुटत्तरः सारवसारवोर्मिजः ॥

नीति सम्बन्धी रोचक श्लोक

(कोष्ठकों के भीतर १९५४ आदि अङ्कों से हाईस्कूल परीक्षा के वर्षों का संकेत है ।)

(१) घर्मार्तं न तथा सुशीतलजलैः स्नानं न मुक्तावली
न श्रीखण्डविलेपनं सुखयति प्रत्यङ्गमप्यर्पितम् ।
प्रीत्या सज्जनभाषितं प्रभवति प्रायो यथा चेतसः
सद्युक्त्या च पुरस्कृतं सुकृतिनामाकृष्टिमन्त्रोपमम् ॥

---

(७०) अल्पच्छदः—कम कपड़े पहने हुए । षष्ठं महापातकम्—छठवाँ महापाप ।
(७१) कमलोदयः—लक्ष्मी की वृद्धि ।
(७२) कृपाश्रये—कृपापात्र । पतत्रिणि-पक्षी में ।
(७६) चुंकृतैः—चूं-चूं करने से ।
(७७) कठोर···त्रुटत्तरः—कठोर स्थूल उच्चस्तनों के पास अधिक टूटा ।

(२) को वीरस्य मनस्विनः स्वविषयः को वा विदेशस्तथा
यं देशं श्रयते तमेव कुरुते बाहुप्रतापार्जितम् ।
यद्दंष्ट्रानखलांगुलप्रहरणैः सिंहो वनं गाहते
तस्मिन्नेव हतद्विपेन्द्ररुधिरैस्तृष्णां छिनत्त्यात्मनः ॥

(३) उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीर्दैवेन देयमिति कापुरुषा वदन्ति ।
दैवं निहत्य कुरु पौरुषमात्मशक्त्या यत्ने कृते यदि न सिद्ध्यति कोऽत्र दोषः ॥

(४) स हि गगनविहारी कल्मषध्वंसकारी
दशशतकरधारी ज्योतिषां मध्यचारी ।
विधुरपि विधियोगाद् ग्रस्यते राहुणासौ
लिखितमपि ललाटे प्रोज्झितुं कः समर्थः ॥

(५) वयमिह परितुष्टा वल्कलैस्त्वं च लक्ष्म्या
सम इह परितोषो निर्विशेषो विशेषः ।
स तु भवति दरिद्रो यस्य तृष्णा विशाला
मनसि च परितुष्टे कोऽर्थवान् को दरिद्रः ॥ ५ ॥

(६) कस्यादेशात् क्षपयति तमः सप्तसप्तिः प्रजानां
छायाहेतोः पथि विटपिनामञ्जलिः केन बद्धः ।
अभ्यर्थ्यन्ते जललवमुचः केन वा वृष्टिहेतोः
जात्यैवैते परहितविधौ साधवो बद्धकक्ष्याः ॥

(७) तुल्यान्वयेत्यनुगुणेति गुणोन्नतेति दुःखे सुखे च सुचिरं सहवासिनीति ।
जानामि केवलमहं जनवादभीत्या सीते ! त्यजामि भवतीं न तु भावदोषात् ॥

(८) घृष्टं घृष्टं पुनरपि पुनश्चन्दनं चारुगन्धं
छिन्नं छिन्नं पुनरपि पुनः स्वादु चैवेक्षुकाण्डम् ।
दग्धं दग्धं पुनरपि पुनः काञ्चनं कान्तवर्णं,
प्राणान्तेऽपि प्रकृतिविकृतिर्जायते नोत्तमानाम् ॥

(९) यावत्स्वस्थमिदं शरीरमरुजं यावज्जरा दूरतो,
यावच्चेन्द्रियशक्तिरप्रतिहता यावत्क्षयो नायुषः ।
आत्मश्रेयसि तावदेव विदुषा कार्यः प्रयत्नो महान्
संदीप्ते भवने तु कूपखननं प्रत्युद्यमः कीदृशः ॥

(१०) सारङ्गाः सुहृदो गृहं गिरिगुहा शान्तिः प्रिया गेहिनी,
वृत्तिर्वन्यलताफलैर्निवसनं श्रेष्ठं तरूणां त्वचः ।
तद्ध्यानामृतपूतमग्नमनसां येषामियं निर्वृति-
स्तेषामिन्दुकलाऽवतंसयमिनां मोक्षेऽपि नो न स्पृहा ॥

(११) आश्वास्य पर्वतकुलं तपनोष्णतप्तमुद्दामदावविधुराणि च काननानि ।
नानानदीनदशतानि च पूरयित्वा रिक्तोऽसि यज्जलद सैव तवोत्तमश्रीः ॥

(१२) महाराज श्रीमन् ! जगति यशसा ते धवलिते
पयःपारावारं परमपुरुषोऽयं मृगयते ।
कपर्दी कैलासं करिवरमभौमं कुलिशभृत्
कलानाथं राहुः कमलभवनो हंसमधुना ॥

(१३) मित्रं प्रीतिरसायनं नयनयोरानन्दनं चेतसः
पात्रं यत् सुखदुःखयोः सह भवेन्मित्रं हि तद्दुर्लभम् ।
ये चान्ये सुहृदः समृद्धिसमये द्रव्याभिलाषाकुला-
स्ते सर्वत्र मिलन्ति तत्त्वनिकषग्रावा तु तेषां विपत् ॥ (१५५२)

(१४) दूरादुच्छ्रितपाणिरार्द्रनयनः प्रोत्सारितार्धासनो
गाढालिङ्गनतत्परः प्रियकथाप्रश्नेषु दत्तादरः ।
अन्तर्भूतविषो बहिर्मधुमयश्चातीव मायापटुः
को नामायमपूर्वनाटकविधिर्यः शिक्षितो दुर्जनैः ॥ (१५५३)

(१५) लक्ष्मि क्षमस्व वचनीयमिदं यदुक्तमन्धीभवन्ति पुरुषास्त्वदुपासनेन ।
नो चेत्कथं कमलपत्रविशालनेत्रो नारायणः स्वपिति पन्नगभोगतल्पे ॥
(१५५४)

(१६) न चौरहार्यं न च राजहार्यं न भ्रातृभाज्यं न च भारकारि ।
व्यये कृते वर्धत एव नित्यं विद्याधनं सर्वधनप्रधानम् ॥

(१७) कुमुदवनमपश्रि श्रीमदम्भोजखण्डं
त्यजति मुदमुलूकः प्रीतिमांश्चक्रवाकः ।
उदयमहिमरश्मिर्याति शीतांशुरस्तं
हतविधिनिहतानां हा विचित्रो विपाकः ॥ (१५५४)

(१८) कनकभूषणसंग्रहणोचितो यदि मणिस्त्रपुणि प्रणिधीयते ।
न स विरौति न चापि स शोभते भवति योजयितुर्वचनीयता ॥ (१५५४)

(१९) उचितमनुचितं वा कुर्वता कार्यजातं
परिणतिरवधार्या यत्नतः पण्डितेन ।
अतिरभसकृतानां कर्मणामाविपत्ते-
र्भवति हृदयदाही शल्यतुल्यो विपाकः ॥ (१५५४)

(२०) उदयति यदि भानुः पश्चिमे दिग्विभागे
प्रचलति यदि मेरुः शीततां याति वह्निः ।
विकसति यदि पद्मं पर्वताग्रे शिलायां
न भवति पुनरुक्तं भाषितं सज्जनानाम् ॥

(२१) व्यतिषजति पदार्थानान्तरः कोऽपि हेतु-
र्न खलु बहिरुपाधीन् प्रीतयः संश्रयन्ते ।

विकसति हि पतङ्गस्योदये पुण्डरीकं
द्रवति च हिमरश्मावुद्गते चन्द्रकान्तः ॥

(२२) रात्रिर्गमिष्यति भविष्यति सुप्रभातं
भास्वानुदेष्यति हसिष्यति पङ्कजालिः ।
इत्थं विचिन्तयति कोशगते द्विरेफे
हा हन्त हन्त ! नलिनीं गज उज्जहार ॥

(२३) जीवन्तु मे शत्रुगणाः सदैव
येषां प्रसादात्सुविचक्षणोऽहम् ।
यदा यदा मे विकृतिं लभन्ते
तदा तदा मां प्रतिबोधयन्ति ॥

(२४) नैवाकृतिः फलति नैव कुलं न शीलं
विद्यापि नैव न च यत्नकृतापि सेवा ।
भाग्यानि पूर्वतपसा खलु सञ्चितानि
काले फलन्ति पुरुषस्य यथैव वृक्षाः ॥

(२५) पुराणमित्येव न साधु सर्वं न चापि काव्यं नवमित्यवद्यम् ।
सन्तः परीक्ष्यान्यतरद्भजन्ते मूढः परप्रत्ययनेयबुद्धिः ॥

(२६) सुजीर्णमन्नं, सुविचक्षणः सुतः, सुशासिता स्त्री, नृपतिः सुसेवितः ।
सुचिन्त्य चोक्तं, सुविचार्य यत्कृतं, सुदीर्घकालेऽपि न याति विक्रियाम् ॥

सरल हिन्दी में व्याख्या कीजिए—

सर्वं परवशं दुःखं सर्वमात्मवशं सुखम् ।
एतद् विद्यात् समासेन लक्षणं सुखदुःखयोः ॥ १ ॥ (१९५१)
तृणानि भूमिरुदकं वाक् चतुर्थी च सूनृता ।
सतामेतानि गेहेषु नोच्छिद्यन्ते कदाचन ॥ २ ॥ (१९५२)
जातमात्रं न यः शत्रुं व्याधिं च प्रशमं नयेत् ।
अतिपुष्टाङ्गयुक्तोऽपि स पश्चात्तेन हन्यते ॥ ३ ॥ (१९५२)
नाद्रव्ये निहिता काचित् क्रिया फलवती भवेत् ।
न व्यापारशतेनापि शुकवत् पाठ्यते बकः ॥ ४ ॥ (१९५२)

अर्थाऽऽगमो, नित्यमरोगिता च, प्रिया च भार्या, प्रियवादिनी च ।
वश्यश्च पुत्रोऽर्थकरी च विद्या, षड् जीवलोकस्य सुखानि राजन् ॥ ५ ॥
आहारनिद्राभयमैथुनञ्च सामान्यमेतत् पशुभिर्नराणाम् ।
धर्मो हि तेषामधिको विशेषो, धर्मेण हीनाः पशुभिः समानाः ॥ ६ ॥
असम्भवं हेममृगस्य जन्म तथापि रामो लुलुभे मृगाय ।
प्रायः समापन्नविपत्तिकाले धियोऽपि पुंसां मलिना भवन्ति ॥ ७ ॥

धनेन किं यो न ददाति चाश्नुते बलेन किं यो न रिपून् बाधते ।
श्रुतेन किं यो न च धर्ममाचरेत् किमात्मना यो न जितेन्द्रियो भवेत् ॥ ८ ॥

उत्साहसम्पन्नमदीर्घसूत्रं क्रियाविधिज्ञं व्यसनेष्वसक्तम् ।
शूरं कृतज्ञं दृढसौहृदं च लक्ष्मीः स्वयं याति निवासहेतोः ॥

श्लाघ्यः स एको भुवि मानवानां स उत्तमः सत्पुरुषः स धन्यः ।
यस्यार्थिनो वा शरणागतो वा नाऽऽशाभिभङ्गाद्विमुखाः प्रयान्ति ॥ १० ॥

जनयति हृदि खेदं मङ्गलं न प्रसूते
परिहरति यशांसि ग्लानिमाविष्करोति ।
उपकृतिरहितानां सर्वभोगच्युतानां,
कृपणकरगतानां संपदां दुर्विपाकः ॥ ११ ॥

अर्थातुराणां न पिता न बन्धुः
कामातुराणां न भयं न लज्जा ।
चिन्तातुराणां न सुखं न निद्रा
क्षुधातुराणां न बलं न तेजः ॥ १२ ॥

द्वाविंशतितम सोपान

सुभाषितसंग्रहः

सुभाषितमयद्रव्यसंग्रहं न करोति यः।
स तु प्रस्तावयज्ञेषु कां प्रदास्यति दक्षिणाम् ॥
द्राक्षा म्लानमुखी जाता शर्करा चाश्मतां गता।
सुभाषितरसस्याग्रे सुधा भीता दिवं गता ॥

(अ)

सुभाषितपद्यखण्डमाला

रघुवंशात्

हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि वा ।१।१०।
न पादपोन्मूलनशक्ति रंहः शिलोच्चये मूर्च्छति मारुतस्य ।२।३४।
पदं हि सर्वत्र गुणैर्निधीयते ।३।६२।
आदानं हि विसर्गाय सतां वारिमुचामिव ।४।८६।
रत्नं समागच्छतु काञ्चनेन ।६।७९।
अभितप्तमयोऽपि मार्दवं भजते कैव कथा शरीरिषु ।८।४३।
विषमप्यमृतं क्वचिद्भवेदमृतं वा विषमीश्वरेच्छया ।८।४६।
तेजसां हि न वयः समीक्ष्यते ।११।१।
आज्ञा गुरूणां ह्यविचारणीया ।१४।४३।

कुमारसंभवात्

क्षुद्रेऽपि नूनं शरणं प्रपन्ने ममत्वमुच्चैः शिरसां सतीव ।१।१२।
विकारहेतौ सति विक्रियन्ते येषां न चेतांसि त एव धीराः ।१।५९।
क ईप्सितार्थस्थिरनिश्चयं मनः पयश्च निम्नाभिमुखं प्रतीपयेत् ।५।५।
शरीर माद्यं खलु धर्मसाधनम् ।५।३३।
न रत्नमन्विष्यति मृग्यते हि तत् ।५।४५।
अलोकसामान्यमचिन्त्यहेतुकं द्विषन्ति मन्दाश्चरितं महात्मनाम् ।५।७५।

मेघदूतात्

याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा ।१।६।
रिक्तः सर्वो भवति हि लघुः पूर्णता गौरवाय ।१।२०।
आपन्नार्तिप्रशमनफलाः सम्पदो ह्युत्तमानाम् ।१।५३।

कस्यात्यन्तं सुखमुपनतं दुःखमेकान्ततो वा,
नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण ।२।४६।

किरातार्जुनीयात्

हितं मनोहारि च दुर्लभं वचः ।१।४।
विचित्ररूपाः खलु चित्तवृत्तयः ।१।३७।
सहसा विदधीत न क्रियामविवेकः परमापदां पदम् ।२।३०।
आत्मवर्गहितमिच्छति सर्वः ।९।६४।
प्रेम पश्यति भयान्यपदेऽपि ।९।७०।
उपनतमवधीरयन्त्यभव्याः ।१०।५२।

शिशुपालवधात्

श्रेयसि केन तृप्यते ।१।२९।
सदाभिमानैकधना हि मानिनः ।१।६७।
महीयांसः प्रकृत्या मितभाषिणः ।२।१३।
सर्वः स्वार्थं समीहते ।२।६५।
क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः ।४।१७।
स्फुटमिभूषयति स्त्रियस्त्रपैव ।७।३८।

नैषधात्

कार्यं निदानाद्धि गुणानधीते ।३।१७।
अपां हि तृप्ताय न वारिधारा स्वादुः सुगन्धिः स्वदते तुषारा ।३।९३।
कर्म कः स्वकृतमत्र न भुङ्क्ते ।५।६।
आर्जवं हि कुटिलेषु न नीतिः ।५।१०३।
मितं च सारं च वचो हि वाग्मिता ।९।८।
चकास्ति योग्येन हि योग्यसङ्गमः ।९।५९।
अदोषतामेव सतां विवृण्वते द्विषां मृषादोषकणाधिरोपणाः ।१५।४।

कथासरित्सागरात्

अकाण्डपातोपनता न कं लक्ष्मीर्विमोहयेत् ।
अचिन्त्यो बत दैवेनाप्यापातः सुखदुःखयोः ।
अप्राप्यं नाम नेहास्ति धीरस्य व्यवसायिनः ।
अश्नुते स हि कल्याणं व्यसने यो न मुह्यति ।
अहो दैवाभिशप्तानां प्राप्तोऽप्यर्थः पलायते ।
आपदि स्फुरति प्रज्ञा यस्य धीरः स एव हि ।
एकचित्ते द्वयोरेव किमसाध्यं भवेदिति ।

करुणार्द्रा हि सर्वस्य सन्तोऽकारणबान्धवाः ।
कामं व्यसनवृक्षस्य मूलं दुर्जनसङ्गतिः ।
जितक्रोधेन सर्वं हि जगदेतद्विजीयते ।
दैवमेव हि साहाय्यं कुरुते सत्त्वशालिनाम् ।
पङ्को हि नभसि क्षिप्तः क्षेप्तुः पतति मूर्धनि ।
प्राणिनां हि निकृष्टापि जन्मभूमिः परा प्रिया ।
प्राणेभ्योऽप्यर्थमात्रा हि कृपणस्य गरीयसी ।
यो यद्वपति बीजं हि लभते सोऽपि तत्फलम् ॥
सत्त्वानुरूपं सर्वस्य धाता सर्वं प्रयच्छति ।
हितोपदेशो मूर्खस्य कोपायैव न शान्तये ॥

पञ्चतन्त्रात्

इह लोके हि धनिनां परोऽपि स्वजनायते ।
किं तया क्रियते धेन्वा या न सूते न दुग्धदा ॥
अरक्षितं तिष्ठति दैवरक्षितं सुरक्षितं दैवहतं विनश्यति ।
जठरं को न बिभर्ति केवलम् ।
पैशुन्याद्भिद्यते स्नेहः ।
महान् महत्स्वेव करोति विक्रमम् ।
उपायेन हि यत्कुर्यात् तन्न शक्यं पराक्रमैः ॥
यस्य बुद्धिर्बलं तस्य निर्बुद्धेस्तु कुतो बलम् ।
सेवाधर्मः परमगहनो योगिनामप्यगम्यः ॥
यद्भविष्यो विनश्यति ।
अनिर्वेदः श्रियो मूलम् ॥
पयःपानं भुजङ्गानां केवलं विषवर्धनम् ।
अत्यादरः शङ्कनीयः ॥
पण्डितोऽपि वरं शत्रुर्न मूर्खो हितकारकः ।
सम्पत्तौ च विपत्तौ च महतामेकरूपता ॥
छिद्रेष्वनर्था बहुलीभवन्ति ।
तुषैरपि परिभ्रष्टा न प्ररोहन्ति तण्डुलाः ॥
कृशे कस्यास्ति सौहृदम् ।
आत्मनः प्रतिकूलानि परेषां न समाचरेत् ॥
अनागतं यः कुरुते स शोभते ।
लुब्धस्य नश्यति यशः, पिशुनस्य मैत्री ॥
कण्टकेनैव कण्टकम् ।

सर्वनाशे समुत्पन्ने अर्द्धं त्यजति पण्डितः ॥
मौनं सर्वार्थसाधनम् ।
उदारचरितानां तु वसुधैव कुटुम्बकम् ॥
यादृशी भावना यस्य सिद्धिर्भवति तादृशी ।

हितोपदेशात्

उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः ।
ज्ञानं भारः क्रियां विना ॥
न गणस्याग्रतो गच्छेत् ।
अल्पानामपि वस्तूनां संहतिः कार्यसाधिका ॥
कायः सन्निहितापायः ।
जलबिन्दुनिपातेन क्रमशः पूर्यते घटः ॥
काचः काचो मणिर्मणिः ।
अनुहुङ्कुरुते घनध्वनिं न हि गोमायुरुतानि केसरी ।

चरकसंहितायाः

धर्मार्थकाममोक्षाणामारोग्यं मूलमुत्तमम् ।
सम्यक् प्रयोगं सर्वेषां सिद्धिराख्याति कर्मणाम् ॥
सुखार्थाः सर्वभूतानां मताः सर्वाः प्रवृत्तयः ।
आत्मानमेव मन्येत कर्तारं सुखदुःखयोः ॥

(ब)

सुभाषितगद्यावली

दशकुमारचरितात्

जलबुद्बुदसमाना विराजमाना संपत् तडिल्लतेव सहसैवोदेति, नश्यति च ।
अवज्ञासोदर्यं दारिद्र्यम् ॥
इह जगति हि निरीहदेहिनं श्रियः संश्रयन्ते ।
श्रेयांसि च सकलान्यनलसानां हस्ते नित्यसांनिध्यानि ॥
दैव्याः शक्तेः पुरो न बलवती मानवी शक्तिः ।
न ह्यलमतिनिपुणोऽपि पुरुषो नियतिलिखितां लेखामतिक्रमितुम् ॥

हर्षचरितात्

कुपितस्य प्रथममन्धकारीभवति विद्या, ततो भ्रुकुटिः ।
निसर्गविरोधिनी चेयं पयःपावकयोरिव धर्मक्रोधयोरेकत्र वृत्तिः ।
अतिरोषणश्चक्षुष्मानप्यन्ध एव जनः ।
भुजे वीर्यं निवसति न वाचि ॥

अतिद्रुतवाहिनी चानित्यतानदी ।
घनोष्मणा म्लायत्यलं लतेव मनस्विता ॥
सतां हि प्रियंवदता कुलविद्या ।
संपत्कणिकामपि प्राप्य तुलेव लघुप्रकृतिरुन्नतिमायाति ।
न किंचिन्न कारयत्यसाधारणी स्वामिभक्तिः ॥
उपयोगं तु न प्रीतिर्विचारयति ।

कादम्बर्याः

अपुत्राणां किल न सन्ति लोकाः शुभाः ।
सर्वथा न कंचिन्न खलीकरोति जीविततृष्णा ॥
अहो दुर्निवारता व्यसनोपनिपातानाम् ।
दुःखमुपदिश्यते परस्य ।
बहुप्रकाराश्च संसारवृत्तयः ।
सर्वथा दुर्लभं यौवनमस्खलितम् ॥
सत्योऽयं लोकवादो यत्संपत्संपदं विपद्विपदमनुबध्नातीति ।
आवेदयन्ति हि प्रत्यासन्नमानन्दमग्रपातीनि शुभानि निमित्तानि ॥
जन्मान्तरकृतं हि कर्म फलमुपनयति पुरुषस्येह जन्मनि ।
प्रायेण च निसर्गत एवानायतस्वभावभङ्गुराणि
सुखानि आयतस्वभावानि च दुःखानि ॥
नास्ति खल्वसाध्यं नाम भगवतो मनोभुवः ।
अनतिक्रमणीया हि नियतिः ॥
बहुभाषिणो न श्रद्दधाति लोकः ।
लोकेऽपि च प्रायः कारणगुणभाञ्ज्येव कार्याणि दृश्यन्ते ।
स्वप्न इवाननुभूतमपि मनोरथो दर्शयति ।

विक्रमोर्वशीयात्

अनुत्सेकः खलु विक्रमालङ्कारः ।
नास्त्यगतिर्मनोरथानाम् ॥
छिन्नबन्धे मत्स्ये पलायिते निर्विण्णो धीवरो भणति धर्मो मे भविष्यति ॥

अभिज्ञानशाकुन्तलात्

न कदापि सत्पुरुषाः शोकपात्रात्मानो भवन्ति ।
अतिस्नेहः पापशङ्की ।
स्निग्धजनसंविभक्तं खलु दुःखं सह्यवेदनं भवति ।
अहो सर्वास्ववस्थासु रमणीयत्वमाकृतिविशेषाणाम् ।

मृच्छकटिकात्

न चन्द्रादातपो भवति ।
साहसे श्रीः प्रतिवसति ।
अहो धिग्वैषम्यं लोकव्यवहारस्य ।
पुरुषभाग्यानामचिन्त्याः खलु व्यापाराः ।

चरकसंहितायाः

परीक्ष्यकारिणो हि कुशला भवन्ति ।
न नियमं भिन्द्यात् ।
नापरीक्षितमभिनिविशेत ।
न कार्यकालमतिपातयेत् ।
नान्यदोषान् ब्रूयात् ।
न सिद्धावौत्सुक्यं गच्छेत् । ना सिद्धौ दैन्यम् ।
न सर्वविश्रम्भी, न सर्वाभिशङ्की ।

(ख)

अब सुभाषित विषयानुसार अकारादि क्रम से दिये जा रहे हैं। जिस ग्रन्थ से सुभाषित संकलित किया गया है, उस ग्रंथ का नाम सुभाषितों के आगे संक्षेप में दिया गया है। संक्षेपार्थ ग्रन्थों के निम्नलिखित संकेत दिए गए हैं—

अ०—अनर्घराघव ।
उ०—उत्तरामचरित ।
क०—कथासरित्सागर ।
का०—कादम्बरी ।
का० नी०—कामन्दकीय नीति ।
काव्य०—काव्यादर्श ।
कि०—किरातार्जुनीय ।
कु०—कुमारसम्भव ।
कुव०—कुवलयानन्द ।
गी०—भगवद्गीता ।
भा०—भागवतपुराण ।
म०—मनुस्मृति ।
महा०—महाभारत ।
मा०—मालतीमाधव ।
मृ०—मृच्छकटिक ।
मे०—मेघदूत ।
र०—रघुवंश ।
गु०—गुणरत्न ।
घ०—घटखर्परकाव्य ।
च०—चरकसंहिता ।
चा०—चाणक्यनीति ।
चौ०—चौरपंचाशिका ।
द०—दशकुमारचरित ।
नै०—नैषधीयचरित ।
प०—पञ्चतन्त्र ।
प्र०—प्रसन्नराघव ।
भ०—भर्तृहरिशतकत्रय ।
रा०—रामायण ।
वि०—विक्रमोर्वशीय ।
शा०—शाकुन्तल ।
शा० प०—शार्ङ्गधरपद्धति ।
शि०—शिशुपालवध ।
ह०—हर्षचरित ।
हि०—हितोपदेश ।

अध्यात्म

अमृतायते हि सुतपः सुकर्मणाम् (कि०)। इति त्याज्ये भवे भव्यो मुक्तावत्तिष्ठते जनः (कि०)। किमिवास्ति यन्न तपसामदुष्करम् (कि०)। छाया न मूर्छति मलोपहतप्रसादे, शुद्धे तु दर्पणतले सुलभावकाशा (शा०)। ज्ञानमार्गे ह्यहंकारः परिघो दुरतिक्रमः (क०)। तपोधीनानि श्रेयांसि ह्युपायोऽन्यो न विद्यते (क०)। तपोधीना हि संपदः (क०)। दृष्टतत्त्वश्च न पुनः कर्मजालेन बध्यते (क०)। नहि महतां सुकरः समाधिभङ्गः (कि०)। निरुत्सुकानामभियोगभाजां समुत्सुकेवाङ्कमुपैति सिद्धिः (क०)। निवृत्तपापसंपर्काः सन्तो यान्ति हि निर्वृतिम् (क०)। निवृत्तरागस्य गृहं तपोवनम् (हि०)। मन एव मनुष्याणां कारणं बन्धमोक्षयोः (गी०)। लब्धदिव्य-रसास्वादः को हि रज्येद् रसान्तरे (क०)। शीलयन्ति यतयः सुशीलताम् (कि०)। साक्षात्कृतधर्माणो महर्षयः (उ०)। साधने हि नियमोऽन्यजनानां योगिनां तु तपसाऽखिलसिद्धिः (नै०)। स्वाधीनकुशलाः सिद्धिमन्तः (शा०)।

आरोग्य

अजीर्णे भोजनं विषम् (हि०)। पित्तेन दूने रसने सितापि तिक्तायते (नै०)। प्रतिकारविधानमायुषः सति शेषे हि फलाय कल्पते (र०)। विकारं खलु परमार्थतोऽज्ञात्वाऽनारम्भः प्रतीकारस्य (शा०)। शरीरमाद्यं खलु धर्मसाधनम् (कु०)। सर्वथा न कञ्चन न स्पृशन्ति शरीरधर्माणमुपतापाः (का०)। स्वेद्यमामज्वरं प्राज्ञः कोऽम्भसा परिषिञ्चति (शि०)।

उद्यम

अचिरांशुविलासचञ्चला, ननु लक्ष्मीः फलमानुषङ्गिकम् (कि०)। अप्राप्यं नाम नेहास्ति धीरस्य व्यवसायिनः (क०)। अर्थो हि नष्टकार्यार्थैर्नायत्नेनाधिगम्यते (रा०)। इह जगति हि न निरीहदेहिनं श्रियः संश्रयन्ते (द०)। उत्साहवन्तः पुरुषा नावसीदन्ति कर्मसु (रा०)। उद्यमेन विना राजन्न सिध्यन्ति मनोरथाः (प०)। उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः (प०)। उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः (प०)। कर्मण्येवाधिकारस्ते मा फलेषु कदाचन (गी०)। किं दूरं व्यवसायिनाम् (चा०)। कोऽतिभारः समर्थानाम् (प०)। गुणसंहतेः समतिरिक्तमहो निजमेव सत्त्वमुपकारि सताम् (कि०)। नहि दुष्करमस्तीह किंचिदध्यवसायिनाम् (कि०)। निवसन्ति पराक्रमाश्रया न विषादेन समं समृद्धयः (कि०)। प्राप्नोतीश्रमविक्लवः (क०)। यत्ने कृते यदि न सिध्यति कोऽत्र दोषः (हि०)। यदनुद्वेगतः साध्यः पुरुषार्थः सदा बुधैः (क०)। सत्त्वानुरूपं सर्वस्य, धाता सर्वं प्रयच्छति (क०)। साहसे श्रीः प्रतिवसति (मृ०)। सुकृती चानुभूयैव दुःखमप्यश्नुते सुखम् (क०)।

काम (भोग निन्दा)

अपथे पदमर्पयन्ति हि श्रुतवन्तोऽपि रजोनिमीलिताः (र०)। अहो अतीव भोगाशा कं नाम न विडम्बयेत् (क०)। आकृष्टः कामलोभाभ्यामपायः को न पश्यति

(क०) आपातरम्या विषयाः पर्यन्तपरितापिनः (कि०)। कामक्रोधौ हि विप्राणां मोक्षद्वारार्गलावुभौ (क०)। कामातुराणां न भयं न लज्जा (भ०)। कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु (मे०)। कोऽवकाशो विवेकस्य हृदि कामान्धचेतसः (क०)। को हि मार्गममार्गं वा व्यसनान्धो निरीक्षते (क०)। दुर्जया हि विषया विदुषापि (नै०)। भोगान् भोगानिवाहेयान् अध्यास्यापन्न दुर्लभा (कि०)। वनेऽपि दोषाः प्रभवन्ति रागिणाम् (प०)। विषयाकृष्यमाणा हि तिष्ठन्ति सुपथे कथम् (क०)। सङ्गात् संजायते कामः (गी०)।

गुण-प्रशंसा

अम्बुगर्भो हि जीमूतश्चातकैरभिनन्द्यते (र०) एको हि दोषो गुणसंनिपाते निमज्जतीन्दोः किरणेष्विवाङ्कः (कु०)। कमिवेशते रमयितुं न गुणाः (कि०)। गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः (उ०)। गुणाः प्रियत्वेऽधिकृता न संस्तवः (कि०)। गुरुतां नयन्ति हि गुणा न संहतिः (कि०)। नाम यस्याभिनन्दन्ति द्विषोऽपि स पुमान् पुमान् (कि०)। पदं हि सर्वत्र गुणैर्निधीयते (र०)। परिजनताऽपि गुणाय सद्गुणानाम् (कि०)। प्रायः प्रत्ययमाधत्त स्वगुणेषूत्तमादरः (कु०)। वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः (कि०)। सुलभा रम्यता लोके दुर्लभं हि गुणार्जनम् (कि०)। सुलभो हि द्विषां भङ्गो दुर्लभा सत्स्ववाच्यता (कि०)। हंसो हि क्षीरमादत्ते तन्मिश्रा वर्जयत्यपः (शा०)।

दुर्जन-निन्दा

अकृत्यं मन्यते कृत्यम् (प०)। अत्युच्चैर्भवति लघीयसां हि धाष्टर्यम् (शि०)। अव्यवस्थितचित्तस्य प्रसादोऽपि भयंकरः (प०)। अश्रेयसे न वा कास्य, विश्वासो दुर्जने जने (क०)। असद्वृत्तेरहोवृत्तं दुर्विभावं विधेरिव (कि०)। असन्मैत्री हि दोषाय, कूलच्छायेव सेविता (कि०)। उष्णो दहति चाङ्गारः, शीतः कृष्णायते करम् (प०)। क्वापि खलु पापानामलमश्रेयसे यतः (शि०)। किमिव ह्यस्ति दुरात्मनामलङ्घ्यम् (कि०)। कोऽन्यो हुतवहाद् दग्धुं प्रभवति (शा०)। को वा दुर्जनवागुरासु पतितः क्षेमेण यातः पुमान् (प०)। दुःखान्धा हि पतन्त्येव, विपच्छ्वभ्रेषु कातराः (क०)। दुर्जनः परिहर्तव्यो, विद्ययाऽलंकृतोऽपि सन् (भ०)। दोषग्राही गुणत्यागी पल्लोलीव हि दुर्जनः (प०)। न परिचयो मलिनात्मनां प्रधानम् (शि०)। किमिव ह्यस्ति दुरात्मनामलङ्घ्यम् (किं०)। प्रकृत्यमित्रा हि सतामसाधवः (कि०)। प्रासादशिखरस्थोऽपि काकः किं गरुडायते (प०)। मणिना भूषितः सर्पः किमसौ न भयङ्करः (भ०)। मात्सर्यरागोपहतात्मनां हि स्खलन्ति साधुष्वपि मानसानि (कि०)। ये तु घ्नन्ति निरर्थकं परहितं ते के न जानीमहे (भ०)। विचित्रमायाः कितवा ईदृशा एव सर्वदा (क०)। विपदन्ता ह्यविनीतसम्पदः (कि०)। विश्वासः कुटिलेषु कः (क०)। शाम्येत् प्रत्यपकारेण नोपकारेण दुर्जनः (कु०)। सर्पः क्रूरः खलः क्रूरः, सर्पात् क्रूरतरः

खलः (चा०)। साहसं नैरपेक्ष्यं च, कितवानां निसर्गजम् (क०)। स्पृशन्ति न नृशंसानां, हृदयं बन्धुबुद्धयः (नै०)। स्पृशन्नपि गजो हन्ति (प०)। हिंसाबलम-साधूनाम् (महा०)।

दैव-स्वरूप

अनतिक्रमणीया हि नियतिः (का०)। असंभाव्या अपि नृणां भवन्तीह समागमाः (क०)। असाध्यं साधयत्यर्थं हेलयाऽभिमुखो विधिः (क०)। अहह कष्टमपण्डितता विधेः (भ०)। अहो दैवाभिशप्तानां प्राप्तोऽप्यर्थः पलायते (क०)। अहो नवनवाश्चर्य-निर्माणे रसिको विधिः (क०)। अहो विधेरचिन्त्यैव गतिरद्भुतकर्मणाम् (क०)। अहौ विधौ विपर्यस्ते न विपर्यस्यतीह किम् (क०)। ईदृशी भवितव्यता (कि०)। कल्पवृक्षोऽप्यभव्यानां प्रायो याति पलाशिताम् (क०)। किं हि न भवेदीश्वरेच्छया (क०)। को नाम पाकाभिमुखस्य जन्तुर्द्वाराणि दैवस्य पिधातुमीष्टे (उ०)। को हि स्वशिरसश्छायां विधेश्चोल्लंघयेद् गतिम् (क०)। दैवमेव हि साहाय्यं कुरुते सत्त्व-शालिनाम् (क०)। दैवे निरुन्धति निबन्धनतां वहन्ति, हन्त प्रयासपरुषाणि न पौरु-षाणि न (नै०)। दैवेनैव हि साध्यन्ते सदर्थाः शुभकर्मणाम् (क०)। न भवि-ष्यति हन्त साधनं किमिवान्यत् प्रहरिष्यतो विधेः (र०)। न ह्यलमति निपुणोऽपि पुरुषो नियतिलिखितां लेखामतिक्रमितुम् (द०)। नीचैर्गच्छत्युपरि च दशा चक्रनेमि-क्रमेण (मे०)। नैवाकृतिः फलति नैव कुलं न शीलम् (भ०)। प्रतिकूलतामुपगते हि विधौ विफलत्वमेति बहुसाधनता (शि०)। प्रायः समापन्नविपत्तिकाले धियोऽपि पुंसां मलिनीभवन्ति (हि०)। प्रायो गच्छति यत्र भाग्यरहितस्तत्रैव यान्त्यापदः (भ०)। फलं भाग्यानुसारतः (महा०)। बलीयसी केवलमीश्वरेच्छा (महा०)। भवितव्यता बलवती (शा०) यत्पूर्वं विधिना ललाटलिखितं तन्मार्जितुं कः क्षमः (हि०)। यद्भावि न तद्भावि, भावि चेन्न तदन्यथा (हि०)। विधिर्हि घटयत्यर्थानचिन्त्यानपि संमुखः (क०)। शक्या हि केन निश्चेतुं दुर्ज्ञाना नियतेर्गतिः (क०)।

धननिन्दा

अकाण्डपातोपनता न कं लक्ष्मीर्विमोहयेत् (क०)। अकालमेघवद् वित्तमकस्मादेति याति च (क०)। आये दुःखं व्यये दुःखं धिगर्थाः कष्टसंश्रयाः (प०)। कोऽर्थान् प्राप्य न गर्वितः (प०)। जलबुद्बुदसमानविराजमाना संपत् तडिल्लतेव सहसैवो-देति, नश्यति च (द०)। धनोष्मणा म्लायत्यलं लतेव मनस्विता (ह०)। मूर्च्छन्त्यमी विकाराः प्रायेणैश्वर्यमत्तेषु (शा०)। शरदभ्रचलाश्चलेन्द्रियैरसुरक्षा हि बहुच्छलाः श्रियः (कि०)। सम्पत्कणिकामपि प्राप्य तुलेव लघुप्रकृतिरुन्नतिमायाति (ह०)।

धन-प्रशंसा

अर्थेन बलवान् सर्वः (प०) निर्गलिताम्बुगर्भं, शरद्घनं नार्दति चातकोऽपि (र०)। लभेत वा प्रार्थयिता न वा श्रियं, श्रिया दुरापः कथमीप्सितो भवेत् । (शा०)। सा लक्ष्मीरुपकुरुते यया परेषाम् (कि०)।

धर्म

अचिन्त्यो बत दैवेनाप्यापातः सुखदुःखयोः (क०)। अधर्मविषवृक्षस्य पच्यते स्वादु किं फलम् (क०)। अनपायि निबर्हणं द्विषां, न तितिक्षासममस्ति साधनम् (कि०)। अप्यप्रसिद्धं यशसे हि पुंसामनन्यसाधारणमेव कर्म (कु०)। धर्मः कीर्तिर्द्वयं स्थिरम् (महा०)। धर्मसंरक्षणार्थैव प्रवृत्तिर्भुवि शार्ङ्गिणः (र०)। धर्मस्य तत्त्वं निहितं गुहायाम् (महा०)। धर्मस्य त्वरिता गतिः (प०)। धर्मेण चरतां सत्ये नास्त्यनभ्युदयः क्वचित् (क०)। धर्मेण हीनाः पशुभिः समानाः (हि०)। धर्मो हि सान्निध्यं कुरुते सताम् (क०)। न धर्मवृद्धेषु वयः समीक्ष्यते (कु०)। नाधर्मश्चिरमृद्धये (क०)। नास्ति सत्यसमो धर्मः (महा०)। निसर्गविरोधिनी चेयं पयःपावकयोरिव धर्मक्रोधयो- रेकत्र वृत्तिः (ह०)। पथः श्रुतेर्दर्शयितार ईश्वरा मलीमसामाददते न पद्धतिम् (र०)। प्रमाणं परमं श्रुतिः (महा०)। महेश्वरमनाराध्य न सन्तीप्सितसिद्धयः (क०)। योगिनां परिणमन् विमुक्तये, केन नाऽस्तु विनयः सतां प्रियः (कि०)। वित्तेन रक्ष्यते धर्मो, विद्यायोगेन रक्ष्यते (चा०)। व्यक्तिमायाति महतां माहात्म्यमनुकम्पया (क०)। श्रीर्मङ्गलात् प्रभवति (महा०)। स धार्मिको यः परमर्म न स्पृशेत्। सर्वं सत्ये प्रति- ष्ठितम् (चा०)। स्वधर्मे निधनं श्रेयः, परधर्मो भयावहः (गी०)।

नश्वरता

अतिद्रुतवाहिनी चानित्यतानदी (ह०)। अस्थिरं जीवितं लोके (हि०)। अस्थिराः पुत्रदाराश्च (हि०)। अस्थिरे धनयौवने (हि०)। जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च (गी०)। धिगिमां देहभृतामसारताम् (र०)। न वस्तु दैवस्वरसाद् विनश्वरं सुरेश्वरोऽपि प्रतिकर्तुमीश्वरः (नै०)। मरणं प्रकृतिः शरीरिणां विकृतिर्जीवित- मुच्यते बुधैः (र०)। सर्वे क्षयान्ता निचयाः पतनान्ताः समुच्छ्रयाः (महा०)।

निर्धनता

अवज्ञासोदर्यं दारिद्रयम् (द०)। कृशे कस्यास्ति सौहृदम् (प०)। क्षीणा नरा निष्करुणा भवन्ति (प०)। दारिद्र्यदोषो गुणराशिनाशी (च०)। दारिद्र्यं परमाञ्जनम् (भा०)। निधनता सर्वापदामास्पदम् (मृ०)। बुभुक्षितः किं न करोति पापम् (प०)। रिक्तः सर्वो भवति हि लघुः पूर्णता गौरवाय (मे०)। सर्वं शून्यं दरिद्रस्य (प०)।

नीति

अहो दुरन्ता बलवद्विरोधिता कि०)। आदौ साम प्रयोक्तव्यम् (प०)। आर्जवं हि कुटिलेषु न नीतिः (नै०)। इष्टं धर्मेण योजयेत् (प०)। उच्छ्रायं नयति यदृच्छयाऽपि योगः (क०)। उपायं चिन्तयेत् प्राज्ञः (प०)। उपायमास्थितस्यापि नश्यन्त्यर्थाः प्रमाद्यतः (शि०)। उपायेन हि यच्छक्यं न तच्छक्यं पराक्रमैः (प०)। ऋणकर्ता पिता शत्रुः (प०)। एको वासः पत्तने वा वने वा (भ०)। क उष्णोदकेन

नवमालिकां सिञ्चति (शा०)। कण्टकेनैव कण्टकम् (प०)। के वा न स्युः परिभवपदं निष्फलारम्भयत्नाः (मे०)। चलति जयान्न जिगीषतां हि चेतः (कि०)। त्यजेदेकं कुलस्यार्थे (प०)। न काचस्य कृते जातु युक्ता मुक्तामणेः क्षतिः (क०)। न कूपखननं युक्तं प्रदीप्ते वह्निना गृहे (हि०)। न पादपोन्मूलनशक्ति रंहः शिलोच्चये मूर्च्छति मारुतस्य (र०)। नयहीनादपरज्यते जनः (कि०)। निपातनीया हि सतामसाधवः (शि०)। नृपतिजनपदानां दुर्लभः कार्यकर्ता (प०)। पयःपानं भुजङ्गानां केवलं विषवर्धनम् (पु०)। परसदननिविष्टः को लघुत्वं न याति (भ०)। प्रकृत्या ह्यमणिः श्रेयान् नालंकारश्च्युतोपलः (कि०)। प्रच्छन्नमप्यूहयते हि चेष्टा (कि०)। प्रतीयन्ते न नीतिज्ञाः कृतावज्ञस्य वैरिणः (क०)। प्रभुश्च निर्विचारश्च नीतिज्ञैर्न प्रशस्यते (क०)। प्रायोऽशुभस्य कार्यस्य कालहारः प्रतिक्रिया (क०)। प्रार्थनाऽधिकबले विपत्फल (कि०)। बहुविघ्नास्तु सदा कल्याणसिद्धयः (क०)। भवन्ति क्लेशबहुलाः सर्वस्यापीह सिद्धयः (क०)। भवन्ति वाचोऽवसरे प्रयुक्ता, ध्रुवं प्रविस्पष्टफलोदयाय (कु०)। भेदस्तत्र प्रयोक्तव्यो यतः स वशकारकः (प०) महोदयानामपि संघवृत्तितां, सहाय-साध्याः प्रदिशन्ति सिद्धयः (कि०)। मायाचारो मायया वर्तितव्यः, साध्वाचारः साधुना प्रत्युपेयः (महा०)। मुख्यमङ्गं हि मन्त्रस्य विनिपात-प्रतिक्रिया (क०)। मुह्यत्येव हि कृच्छ्रेषु संभ्रमज्वलितं मनः (कि०)। यदि वाऽत्यन्तमृदुता न कस्य परि-भूयते (क०)। यान्ति न्यायप्रवृत्तस्य, तिर्यञ्चोऽपि सहायताम् (अ०)। रत्नव्ययेन पाषाणं को हि रक्षितुमर्हति (क०)। श्रेयांसि लब्धुमसुखानि विनाऽन्तरायैः (कि०)। सदाऽनुकूलेषु हि कुर्वते रतिं, नृपेष्वमात्येषु च सर्वसम्पदः (कि०)। सन्दीप्ते भवने तु कूपखननं प्रत्युद्यमः कीदृशः (भ०)। सन्धिं कृत्वा तु हन्तव्यः, संप्राप्तेऽवसरे पुनः (क०)। संमुखीनो हि जयो रन्ध्रप्रहारिणाम् (र०)। सर्वनाशे समुत्पन्नेऽर्धं त्यजति पण्डितः (प०)।

परोपकार

अनुभवति हि मूर्ध्ना पादपस्तीव्रमुष्णं शमयति परितापं छायया संश्रितानाम् (शा०)। आपन्नत्राणविकलैः किं प्राणैः पौरुषेण वा (क०)। आपन्नार्तिप्रशमनफलाः सम्पदो ह्युत्तमानाम् (मे०)। उपकृत्य निसर्गतः परेषामुपरोधं नहि कुर्वते महान्तः (शि०)। उपदेशपराः परेष्वपि, स्वविनाशाभिमुखेषु साधवः (शि०)। किमदेयमुदाराणामुपकारिषु तुष्यताम् (क०)। धनानि जीवितं चैव परार्थे प्राज्ञ उत्सृजेत् (प०)। नहि प्रियं प्रवक्तुमिच्छन्ति मृषा हितैषिणः (कि०)। परार्थप्रतिपन्ना हि नेक्षन्ते स्वार्थमुत्तमाः (क०)। मिथ्या परोपकारो हि कुतः स्यात् कस्य शर्मणे (क०)। युक्तानां खलु महतां परोपकारे, कल्याणी भवति रुजत्स्वपि प्रवृत्तिः (कि०)। रविपीतजला तपात्यये पुनरोघेन हि युज्यते नदी (कु०)। स्वत एव सतां परार्थता, ग्रहणानां हि यथा यथार्थता (नै०)। स्वभाव एवैष परोपकारिणाम् (शि०)। स्वामापदं प्रोज्झ्य विपत्तिमग्नं, शोचन्ति सन्तो ह्युपकारिपक्षम् (कि०)।

प्रेम (प्रेम-स्वभाव)

अनुरागान्धमनसां विचारः सहसा कुतः (क०)। अपथे पदमर्पयन्ति हि श्रुतवन्तोऽपि रजोनिमीलिताः (र०)। अपायो मस्तकस्थो हि विषयग्रस्तचेतसाम् (क०) अविज्ञातेऽपि बन्धौ हि, बलात् प्रह्लादते मनः (कि०)। आशु बध्नाति हि प्रेम, प्राग्जन्मान्तरसंस्तवः (क०)। गुणः खल्वनुरागस्य कारणं न बलात्कारः (मृ०)। चिरं जानाति जन्तूनां प्रेम जन्मान्तरार्जितम् (क०)। दयितं जनः खलु गुणीति मन्यते (शि०)। दयितास्वनवस्थितं नृणां, न खलु प्रेम चलं सुहृज्जने (कु०)। प्रेम पश्यति भयान्यपदेऽपि (कि०)। भावस्थिराणि जननान्तरसौहृदानि (शा०)। लोके हि लोहेभ्यः कठिनतराः खलु स्नेहमया बन्धनपाशाः (ह०)। वसन्ति हि प्रेम्णि गुणा न वस्तुनि (कि०)। व्यतिषजति पदार्थानान्तरः कोऽपि हेतुः (उ०)। सर्वं स्नेहात् प्रवर्तते (महा०)। सर्वः कान्तमात्मीयं पश्यति (शा०)। सर्वः प्रियः खलु भवत्यनुरूपचेष्टः (शि०)। स्नेहमूलानि दुःखानि (महा०)।

मित्रता

आकरः स्वपरभूरिकथानां प्रायशो हि सुहृदोः सहवासः (नै०)। आपत्काले तु सम्प्राप्ते यन्मित्रं मित्रमेव तत् (प०)। एकं मित्रं भूपतिर्वा यतिर्वा (भ०)। किमु चोदिताः प्रियहितार्थकृतः कृतिनो भवन्ति सुहृदः सुहृदाम् (शि०)। कुवाक्यान्तं च सौहृदम् (प०)। तत्तस्य किमपि द्रव्यं यो हि यस्य प्रियो जनः (उ०)। नालं सुखाय सुहृदो नालं दुःखाय शत्रवः (महा०)। परोऽपि हितवान् बन्धुः (प०)। मन्दायन्ते न खलु सुहृदामभ्युपेतार्थकृत्याः (मे०)। मित्रलाभमनु लाभसम्पदः (कि०)। मित्रार्थगणितप्राणा दुर्लभा हि महोदयाः (क०)। विदेशे बन्धुलाभो हि मरावमृतनिर्झरः (क०)। विप्रलम्भोऽपि लाभाय, सति प्रियसमागमे (कि०)। समानशीलव्यसनेषु सख्यम् (हि०)। समीरणो नोदयिता भवेति, व्यादिश्यते केन हुताशनस्य (कु०)। स सुहृद् व्यसने यः स्यात् (प०)। स्वं जीवितमपि सन्तो न गणयन्ति मित्रार्थे (प०)। स्वयमेव हि वातोऽग्नेः, सारथ्यं प्रतिपद्यते (र०)।

राजकर्म

अरिषु हि विजयार्थिनः क्षितीशा विदधति सोपधि सन्धिदूषणानि (कि०)। अल्पीयसोऽप्यामयतुल्यवृत्तेर्महापकाराय रिपोर्विवृद्धिः (कि०)। अविश्रमोऽयं लोकतन्त्राधिकारः (शा०)। आपन्नस्य विषयवासिन आर्तिहरेण राज्ञा भवितव्यम् (शा०)। आश्वस्तो वेत्ति युक्तं तत् प्रभुः को हि स्वमन्त्रिणाम् (क०)। ईश्वराणां हि विनोदरसिकं मनः (कि०)। ऋद्धं हि राज्यं पदमैन्द्रमाहुः (र०)। को नाम राज्ञां प्रियः (प०)। गणयन्ति न राज्यार्थेऽपत्यस्नेहं महीभुजः (क०)। नयवर्त्मगाः प्रभवतां हि धियः (कि०)। नहीश्वरव्याहृतयः कदाचित् पुष्णन्ति लोके विपरीतमर्थम् (कु०)। नृपतिजनपदानां दुर्लभः कार्यकर्ता (प०)। नृपस्य वर्णाश्रमपालनं यत्स एव धर्मः (र०)। परमं

लाभमरातिभङ्गमाहुः (कि०)। प्रभुचित्तमेव हि जनोऽनुवर्तते (शि०)। प्रभुप्रसादो हि मुदे न कस्य (कु०)। प्रभूणां हि विभूत्यन्धा धावत्यविषये मतिः (क०)। प्रयोजनापेक्षितया प्रभूणां प्रायश्चलं गौरवमाश्रितेषु (कु०)। प्रायेण भूमिपतयः, प्रमदा लताश्च, यः पार्श्वतो भवति तं परिवेष्टयन्ति (प०)। भजन्ति वैतसीं वृत्तिं राजानः कालवेदिनः (क०)। राजा सहायवान् शूरः सोत्साहो जयति द्विषः (क०)। वसुमत्या हि नृपाः कलत्रिणः (र०)। वाराङ्गनेव नृपनीतिरनेकरूपा (प०)। व्रजन्ति शत्रूनवधूय निःस्पृहाः, शमेन सिद्धिं मुनयो न भूभृतः (कि०)। राज्ञां तु चरितार्थता दुःखोत्तरैव (शा०)। स्वदेशे पूज्यते राजा (चा०)। हतं सैन्यमनायकम् (चा०)।

सज्जनप्रशंसा

अक्षोभ्यतैव महतां महत्त्वस्य हि लक्षणम् (क०)। अनुगृह्णन्ति हि प्रायो देवता अपि तादृशम् (क०)। अनुत्सेकः खलु विक्रमालंकारः (वि०)। अनुहुंकुरुते घनध्वनिं न हि गोमायुरुतानि केसरी (शि०)। अयशोभीरवः किं न, कुर्वते बत साधवः (क०)। अयातपूर्वा परिवादगोचरं, सतां हि वाणी गुणमेव भाषते (कि०)। अरुन्तुदत्वं महतां ह्यगोचरः (कि०)। अहह महतां निःसीमानश्चरित्रविभूतयः (भ०)। आदानं हि विसर्गाय, सतां वारिमुचामिव (र०)। आपन्नार्तिप्रशमनफलाः सम्पदो ह्युत्तमानाम् (मे०)। उत्तरोत्तरशुभो हि विभूनां कोऽपि मञ्जुलतमः क्रमवादः (नै०)। उत्सहन्ते न हि द्रष्टुमुत्तमाः स्वजनापदम् (क०)। उदारचरितानां तु वसुधैव कुटुम्बकम् (हि०)। कथमपि भुवनेऽस्मिंस्तादृशाः संभवन्ति (मृ०)। कदापि सत्पुरुषाः शोकवास्तव्या न भवन्ति (शा०)। करुणार्द्रा हि सर्वस्य, सन्तोऽकारणबान्धवाः (क०)। केषां न स्यादभिमतफला प्रार्थना ह्युत्तमेषु (मे०)। क्षुद्रेऽपि नूनं शरणं प्रपन्ने, ममत्वमुच्चैः शिरसां सतीव (कु०)। ग्रहीतुमार्यान् परिचर्यया मुहुर्महानुभावा हि नितान्तमर्थिनः (शि०)। चित्ते वाचि क्रियायां च साधूनामेकरूपता। जितशान्तेषु धीराणां स्नेह एवोचितोऽरिषु (क०)। दुर्लङ्घ्यचिह्ना महतां हि वृत्तिः (कि०)।

देवद्विजसपर्या हि, कामधेनुर्मता सताम् (क०)। देहपातमपीच्छन्ति, सन्तो नाविनयं पुनः (क०)। धनिनामितरः सतां पुनर्गुणवत्संनिधिरेव संनिधिः (शि०)। न्यायाधारा हि साधवः (कि०)। परिजनताऽपि गुणाय सज्जनानाम् (कि०)। पुण्यवन्तो हि सन्तानं पश्यन्त्युच्चैः कृतान्वयम् (क०)। प्रणिपातप्रतीकारः संरम्भो हि महात्मनाम् (र०)। प्रतिपन्नार्थनिर्वाहं सहजं हि सतां व्रतम् (क०)। प्रत्युक्तं हि प्रणयिषु सतामीप्सितार्थक्रियैव (मे०)। प्रवर्तते नाकृतपुण्यकर्मणां, प्रसन्नगम्भीरपदा सरस्वती (कि०)। प्रसादचिह्नानि पुरःफलानि (र०)। प्रह्वेष्वनिर्बन्धरुषो हि सन्तः (र०)। प्रारभ्य चोत्तमजना न परित्यजन्ति (भ०)। बताश्रितानुरोधेन किं न कुर्वन्ति साधवः (क०)। ब्रुवते हि फलेन साधवो, न तु कण्ठेन निजोपयोगिताम् (नै०)। भजन्त्यात्मंभरित्वं हि, दुर्लभेऽपि न साधवः (क०)। भवति महत्सु न निष्फलः प्रयासः

(शि०)। मनस्येकं वचस्येकं कर्मण्येकं महात्मनाम् (हि०)। महतां हि धैर्यमविभाव्यवैभवम् (कि०)। महतां हि सर्वमथवा जनातिगम् (शि०)। महतामनुकम्पा हि विरुद्धेषु प्रतिक्रिया (क०)। महतीमपि श्रियमवाप्य विस्मयः, सुजनो न विस्मरति जातु किंचन (शि०)। महते रुजन्नपि गुणाय महान् (कि०)। महान् महत्येव करोति विक्रमम् (प०)। मोघा हि नाम जायेत महत्सूपकृतिः कुतः (क०)। रहस्यं साधूनामनुपधि विशुद्धं विजयते (उ०)। रिपुष्वपि हि भीतेषु सानुकम्पा महाशयाः (क०)। वज्रादपि कठोराणि, मृदूनि कुसुमादपि। लोकोत्तराणां चेतांसि, को हि विज्ञातुमर्हति (उ०)। विक्रियायै न कल्पन्ते सम्बन्धाः सदनुष्ठिताः (कु०)। विवेकधाराशतधौतमन्तः, सतां न कामः कलुषीकरोति (नै०)। व्रताभिरक्षा हि सतामलंक्रिया (कि०)। संपत्सु महतां चित्तं भवत्युत्पलकोमलम् (भ०)। सतां महत्संमुखधावि पौरुषम् (नै०)। सतां हि चेतः शुचितात्मसाक्षिका (नै०)। सतां हि प्रियंवदता कुलविद्या (ह०)। सत्यनियतवचसं वचसा सुजनं जनाश्चलयितुं क ईशते (शि०)। सन्तः परीक्षान्यतरद् भजन्ते (मालविका०)।

सत्संगति

कस्य नाभ्युदये हेतुर्भवेत् साधुसमागमः (क०)। कस्य सत्सङ्गो न भवेच्छुभः (क०)। कामं न श्रेयसे कस्य संगमः पुण्यकर्मभिः (क०)। किं वाऽभविष्यदरुणस्तमसां विभेत्ता, तं चेत्सहस्रकिरणो धुरि नाकरिष्यत् (शा०)। गुणमहतां महते गुणाय योगः (कि०)। ध्रुवं फलाय महते महतां सह संगमः (क०)। प्रायेणाधममध्यमोत्तमगुणः संसर्गतो जायते (भ०)। बृहत्सहायः कार्यान्तं क्षोदीयानपि गच्छति (शि०)। विश्वासयत्याशु सतां हि योगः (कि०)। सङ्गः सतां किमु न मङ्गलमातनोति (भा०)। सतां सद्भिः सङ्गः कथमपि हि पुण्येन भवति (उ०)। सतां हि सङ्गः सकलं प्रसूयते (भा०)। सत्संगतिः कथय किं न करोति पुंसाम् (भ०)। समुन्नयन् भूतिमनार्यसंगमाद्, वरं विरोधोऽपि समं महात्मभिः (कि०)।

सौन्दर्य

किमिव हि मधुराणां मण्डनं नाकृतीनाम् (शा०)। केवलोऽपि सुभगो नवाम्बुदः, किं पुनस्त्रिदशचापलाञ्छितः (र०)। क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः (शि०)। न रम्यमाहार्यमपेक्षते गुणम् (कि०)। न षट्पदश्रेणिभिरेव पङ्कजं, सशैवलासङ्गमपि प्रकाशते (कु०)। प्रागेव मुक्ता नयनाभिरामाः, प्राप्येन्द्रनीलं किमुतोन्मयूखम् (र०)। प्रियेषु सौभाग्यफला हि चारुता (कु०)। भवन्ति साम्येऽपि निविष्टचेतसां, वपुर्विशेषेष्वतिगौरवाः क्रियाः (कु०)। रम्याणां विकृतिरपि श्रियं तनोति (कि०)। सेयमाकृतिर्न व्यभिचरति शीलम् (द०)। हरति मनो मधुरा हि यौवनश्रीः (कि०)।

स्त्रीचरित-निन्दा

अधरेष्वमृतं हि योषितां, हृदि हालाहलमेव केवलम्। अनुरागपरायत्ताः कुर्वते किं न योषितः (क०)। अन्तर्विषमया ह्येता बहिश्चैव मनोरमाः (प०)। कठिनाः खलु स्त्रियः (कु०)। कष्टा हि कुटिलश्वश्रूपरतन्त्रवधूस्थितिः (क०)। किं न कुर्वन्ति योषितः (भ०)। न स्त्रीचलितचारित्रा निम्नोन्नतमवेक्षते (क०)। प्रत्ययः स्त्रीषु मुष्णाति विमर्शं विदुषामपि (क०)। वेश्यानां च कुतः स्नेहः। संनिकृष्टे निकृष्टेऽपि कष्टं रज्यन्ति कुस्त्रियः (क०)।

स्त्रीशील-प्रशंसा

अचिन्त्यं शीलगुप्तानां चरितं कुलयोषिताम् (क०)। असाध्यं सत्यसाध्वीनां किमस्ति हि जगत्त्रये (क०)। आपद्यपि सतीवृत्तं, किं मुञ्चन्ति कुलस्त्रियः (क०)। का नाम कुलजा हि स्त्री, भर्तृद्रोहं करिष्यति (क०)। किं नाम न सहन्ते हि, भर्तृभक्ताः कुलाङ्गनाः (क०)। क्रियाणां खलु धर्म्याणां सत्यपत्न्यो मूलकारणम् (कु०)। न पतिव्यतिरेकेण सुस्त्रीणामपरा गतिः (क०)। नास्ति भर्तुः समो बन्धुः (वि०)। पुरन्ध्रीणां चित्तं कुसुमसुकुमारं हि भवति (उ०)। पेशलं हि सतीमनः (क०)। भर्तारं हि विना नान्यः सतीनामस्ति बान्धवः (क०)। भवन्त्यव्यभिचारिण्यो भर्तुरिष्टे पतिव्रताः (कु०)। यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः (म०)। सतीधर्मो हि सुस्त्रीणां चिन्त्यो न सुहृदादयः (क०)। स्निग्धमुग्धा हि सत् स्त्रियः (क०)। स्फुटमभिभूषयति स्त्रियस्त्रपैव (शि०)। स्वसुखं नास्ति साध्वीनां तासां भर्तृसुखं सुखम् (क०)।

स्त्री-स्वभावादि वर्णन

अहो विनेन्द्रजालेन स्त्रीणां चेष्टा न विद्यते (क०)। आदावसत्यवचनं पश्चाज्जाता हि कुस्त्रियः (क०)। उदारसत्त्वं वृणुते, स्वयं हि श्रीरिवाङ्गना (क०)। को हि वित्तं रहस्यं वा, स्त्रीषु शक्नोति गूहितुम् (क०)। क्षुभ्यन्ति प्रसभमहो विनापि हेतोर्लीलाभिः किमु सति कारणे रमण्यः (शि०)। तदेव दुःसहं स्त्रीणामिह प्रणयखण्डनम् (क०)। न स्त्री स्वातन्त्र्यमर्हति (महा०)। न स्नेहो न च दाक्षिण्यं, स्त्रीष्वहो चापलादृते (क०)। निसर्गसिद्धो नारीणां, सपत्नीषु हि मत्सरः (क)। प्रत्युत्पन्नमति स्त्रैणम् (शा०)। प्रायः स्त्रियो भवन्तीह निसर्गविषमाः शठाः (क०)। प्रायेण भूमिपतयः प्रमदा लताश्च, यः पार्श्वतो भवति तं परिवेष्टयन्ति (प०)। बत स्त्रीणां चञ्चलाश्चित्तवृत्तयः (क०)। युवतिजनः खलु नाप्यतेऽनुरूपः (कि०)। स्त्रीचित्तमहो विचित्रमिति। स्त्रीणां प्रियालोकफलो हि वेषः (कु०)। स्त्रीणां भावानुरक्तं हि, विरहासहनं मनः (क०)। स्त्रीणामलीकसुग्धं हि, वचः को मन्यते मृषा (क०)। स्त्रीभिः कस्य न खण्डितं भुवि मनः (भ०)। स्त्रीषु वाक्संयमः कुतः (क०)।

विविध सुभाषित

अहो दुर्निवारता व्यसनोपनिपातानाम् (का०)। घनाम्बुना राजपथे हि पिच्छिले, क्वचिद् बुधैरप्यपथेन गम्यते (नै०)। दिशत्यपायं हि सतामतिक्रमः (कि०)। नक्रः स्वस्थानमासाद्य गजेन्द्रमपि कर्षति (प०)। ननु तैलनिषेकबिन्दुना, सह दीपार्चिरुपैति मेदिनीम् (र०)। न प्रभातरलं ज्योतिरुदेति वसुधातलात् (शा०)। नहि प्रफुल्लं सहकारमेत्य, वृक्षान्तरं, कांक्षति षट्पदालिः (र०)। नाल्पीयान् बहुसुकृतं हिनस्ति दोषः (कि०)। फणाटोपो भयंकरः (प०)। भवन्ति भव्येषु हि पक्षपाताः (कि०)। श्यालको गृहनाशाय (चा०)। स्थानभ्रष्टा न शोभन्ते दन्ताः केशा नखा नराः।

निबन्ध रत्नमाला

आवश्यक-निर्देश

(१) किसी विषय पर अपने विचारों और भावों को सुगठित, सुबोध, सुन्दर एवं क्रमबद्ध भाषा में लिखना ही निबन्ध है। इसके लिए दो बातों की आवश्यकता होती है—निबन्ध की सामग्री। २—निबन्ध की शैली। निबन्ध की सामग्री एकत्र करने के तीन साधन हैं—

(अ) निरीक्षण :—प्रकृति का निरीक्षण करना और ज्ञानार्जन करना।

(ब) अध्ययन :—पुस्तकों के अध्ययन आदि से विषय का ज्ञान प्राप्त करना।

(स) मनन :—स्वयं उस विषय पर विचार या चिन्तन करना।

(२) निबन्ध-लेखन में निम्नलिखित बातों का सदा ध्यान रखना चाहिए—

(अ) प्रस्तावना—प्रारम्भ में विषय का निर्देश और उसका लक्षण आदि रखना चाहिए। (ब) विवेचन—बीच में विषय की विस्तृत विवेचना करनी चाहिए। उस वस्तु के गुण, अवगुण, उपयोगिता, अनुपयोगिता, लाभ, हानि आदि का विस्तृत रूप से वर्णन करना चाहिए। कथन की पुष्टि के लिए श्लोक, सूक्ति अथवा पद्यों को उद्धरण रूप में उद्धृत कर सकते हैं। (स) उपसंहार— अन्त में अपने कथन का सारांश संक्षेप में प्रस्तुत करना चाहिए।

(३) निबन्ध की शैली के विषय में निम्नलिखित बातों का ध्यान रखना चाहिए— (अ) निबन्ध में अनावश्यक विस्तार तथा पाण्डित्य-प्रदर्शन एवं क्लिष्टता का त्याग करना चाहिए। (ब) भाषा सरल, सरस, सुबोध एवं व्याकरण की दृष्टि से शुद्ध होनी चाहिए। (स) भाषा में प्रवाह एवं स्वाभाविकता होनी चाहिए तथा प्रारम्भ से अन्त तक एक-सी होनी चाहिए। (द) लोकोक्ति एवं अलङ्कारों का भी यथावसर एवं समुचित प्रयोग करना चाहिए।

(४) निबन्ध के मुख्यतया तीन भेद हैं :—

(अ) वर्णनात्मक—इसमें पशु, पक्षी, नदी, नगर, ग्राम, समुद्र, पर्वत एवं ऋतु आदि का विस्तृत वर्णन होता है। (ब) विवरणात्मक—इनमें जीवनचरितों, घटित घटनाओं, प्राचीन कथाओं आदि का वर्णन होता है। (स) विचारात्मक— इनमें आध्यात्मिक, मनोविज्ञान सम्बन्धी, सामाजिक, राजनीतिक एवम् अमूर्तविषयों सत्य, परोपकार, अहिंसा आदि का संग्रह होता है। इन निबन्धों में इन विषयों के गुण, दोष, लाभ, हानि आदि का विचार होता है।

१—वेदानां महत्त्वम्

'वेदशब्दस्य कोऽर्थः ? इति प्रश्ने विविधमतानि पुरतः समुपस्थाप्यन्ते। ज्ञानार्थकाद् विद्धातोर्घञि वेद इति रूपं निष्पद्यते। सत्तार्थकाद् विचारणार्थकात् प्राप्त्यर्थकाद्

विद्धातोरपि रूपमेतद् निष्पद्यते । विद्यन्ते धर्मादयः पुरुषार्था यैस्ते वेदाः । सायणेन भाष्यभूमिकायामुक्तम्—अपौरुषेयं वाक्यं वेदः । इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो वेदयति स वेदः । तत्रैव प्रमाणमप्युपन्यस्तम्—

"प्रत्यक्षेणानुमित्या वा यस्तूपायो न विद्यते ।
एवं विदन्ति वेदेन तस्माद् वेदस्य वेदता ॥"

अतः वेदा हि अशेषज्ञानविज्ञानराशयः, कर्तव्याकर्तव्यावबोधकाः, शुभाशुभनिदर्शकाः, सुखशान्तिसाधकाः, चतुर्वर्गावाप्तिसोपानस्वरूपाश्च । आम्नायः, आगमः, श्रुतिः, वेदः इति सर्वे शब्दाः पर्यायाः ।

सोऽयं वेदस्त्रयीति पदेनापि व्यवह्रियते । अत्र वेदरचनायास्त्रैविध्यमेव कारणम् । या खलु रचना पद्यमयी सा ऋक्, या गद्यमयी सा यजुः, या पुनः समग्रा गानमयी रचना सा सामेति कथ्यते । यत्तु कैश्चन 'ऋग्यजुः सामाख्यास्त्रय एव वेदाः पूर्वमासन्, अतो वेदानां त्रित्वादेव तत्र त्रयीति व्यवहारः' इत्युच्यते तदयुक्तम्, ऋग्वेदेऽपि अथर्ववेदनामोल्लेखदर्शनात् । भगवता पतञ्जलिनापि 'चत्वारो वेदाः साङ्गाः सरहस्याः' इति स्पष्टमुक्तम् ।

वेदानां महत्त्वं मन्वादिना बहुधा गीयते । 'वेदोऽखिलो धर्ममूलम्' इति वेदा धर्ममूलत्वेन गण्यन्ते । 'यः कश्चित् कस्यचिद्धर्मो मनुना परिकीर्तितः । स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः ॥' इति वेदानां सर्वज्ञानमयत्वं निगद्यते । 'ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च' इति महाभाष्योक्त्या 'योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम् । स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः ॥' इति मनुस्मृत्युक्त्या च वेदाभ्यसनं विप्राणां परमं तपोऽगण्यत ।

वेदेषु भारतीयसंस्कृतेरङ्गभूता विषयाः प्रतिपादिताः । तथाहि—

(१) अध्यात्मवर्णनम्—आत्मनः स्वरूपादिवर्णनमत्रोपलभ्यते । तद्यथा—यस्मिन् सर्वाणि भूतान्यात्मैवाभूद् विजानतः० । स पर्यगाच्छुक्रमकायमव्रणम्० । (यजु० ४०–७, ८) । अध्यात्मम् (अथर्व० ११–८, १३. २–९), तद्यथा–स एष एक एकवृदेक एव०, न द्वितीयो न तृतीयश्चतुर्थो नाप्युच्यते० । (अ० १३–४–१२, १६), आत्मा (अ० ५–९, ७–१, १९–५१), आत्मविद्या (अ० ४–२), ब्रह्म (अ० ७–६६), ब्रह्मविद्या (अ० ४–१, ५–६), विराट् (अ० ८-९–१०) ।

(२) धार्मिकी भावना—धर्मभावनयैव मानवाः पशुभ्योऽतिरिच्यन्ते । धर्मेण हीनाः पशुभिः समानाः । वेदेषु प्रतिपादितो धर्मो वैदिक-धर्म इत्युच्यते । तस्मिन्नजरोऽमरो व्यापको जगन्नियन्ता सर्वज्ञ ईश्वर एव उपास्य इति स्पष्टीकृतम् ।

'ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत् ।
तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम् ॥'

(३) समाजचित्रणम्—प्राचीनतमस्य समाजस्य चित्रणं वेदेष्वेवोपलभ्यते। यथा-आश्रमादिवर्णनं तत्कर्तव्यं विधानं च। मानवजीवनं चतुर्षु विभागेषु विभक्तं विद्यते। चत्वारो विभागाः चत्वार आश्रमा उच्यन्ते-ब्रह्मचर्य-गृहस्थ-वानप्रस्थ-संन्यासलक्षणाः। प्रथमः ब्रह्मचर्याश्रमः मानवजीवनस्याधारभूतः। अथर्ववेदे एतद्विषयकं विवरणमुपलभ्यते। यथा—

ब्रह्मचर्येण तपसा देवा मृत्युमुपाघ्नत (अ० ११-५-१९), ब्रह्मचर्येण तपसा राजा राष्ट्रं वि रक्षति (अ० ११-५-१७)।

वेदेषु मनुष्याणां कर्मादिभेदतः पञ्चश्रेणिविभागा दृश्यन्ते-ब्राह्मणः, क्षत्रियः, वैश्यः, दासः, दस्युश्च। परं सर्वैर्जनैः परस्परं प्रीतिभावेन वर्तितव्यम्—

'प्रियं मा कृणु देवेषु प्रियं राजसु मा कृणु।
प्रियं सर्वस्य पश्यतः उतशूद्र उतार्ये॥ (अथर्व०)

वेदेषु स्त्री-पुरुषयोः सम्बन्धः अविच्छेद्योऽग्निसाक्षिकः मैत्रीभावरूपः मन्त्रैर्नियन्त्रितः। पाणिग्रहणानन्तरं वधूवरौ जगदतुः—

'समञ्जन्तु विश्वे देवा समापो हृदयानि नौ।
सम्मातरिश्वा सं धाता समु देष्ट्री दधातु नौ॥

अपरञ्च—

गृह्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथासः (अ० १४-१-५०)

(४) राष्ट्रभावना—वेदे राष्ट्रभावनाविषयकं विवरणमुपलभ्यते। राष्ट्रस्य राजा तादृशो भवेत् यं सर्वाः प्रजाः वाञ्छेयुः। तद्यथा—

"ध्रुवं ते राजा वरुणो ध्रुवं देवो बृहस्पतिः।"
"ध्रुवं त इन्द्रश्चाग्निश्च राष्ट्रं धारयतां ध्रुवम्"। ऋक्
"भद्रमिच्छन्त ऋषयः स्वर्विदस्तपो दीक्षामुपनिषेदुरग्रे।
ततो राष्ट्रं बलमोजश्च जातं तदस्मै देवा उपसंनमन्तु॥" (अथर्व०)

(५) काव्यशास्त्रम्—अनेकेऽलंकाराः छन्दोवर्णनं चात्र प्राप्यते। तद्यथा—अनुप्रासः (ऋ० १०. १५९. ५) उत्तराहमुत्तर उत्तरेदुत्तराभ्यः (ऋ० १०, १४५. ३), यमकम्—पृथिव्यां निमिता मिता०, कविभिर्निमितां मिताम्० (अ० ९-३-१६, १९), छन्दोनामानि (यजु० १-२७ ; १४-९, १०, १८), पर्यायवाचिनः—दशगोनामानि (यजु० ८-४३), अश्वपर्यायाः (यजु० २२-१९)।

(६) दार्शनिकविचाराः—वेदेषु तत्त्वज्ञानमीमांसाम् श्रित्य विषयवर्णनं प्राप्यते। तद्यथा—सृष्ट्युत्पत्तिः (ऋ० १०-१२९-१३०)। तथा हि—

नासदासीन्नो सदासीत् तदानीम्०।
न मृत्युरासीदमृतं न तर्हि०।
कामस्तदग्रे समवर्तताधि०, (ऋ० १०-१२९-१, २, ४)।

वाग्ब्रह्मवर्णनम् (ऋ० १०, १२५, १-८)। तथा हि—

अहं राष्ट्री संगमनी वसूनां चिकितुषी प्रथमा यज्ञियानाम्० ।

यं कामये तं तमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधाम्० ।

अहमेव वात इव प्रवामि० (ऋ० १०, १२५-३, ५, ८)।

कालमीमांसा (अ० १९, ५३-५४), तद्यथा—

सप्तचक्रान वहति काल एष सप्तास्य नाभीरमृतं न्वक्षः (अ० १९-५३-२)।

द्वादशप्रधयश्चक्रमेकं त्रीणि नभ्यानि क उ तच्चिकेत ।

तस्मिन् त्साकं त्रिंशता न शङ्कवोऽर्पिताः षष्टिर्नचलाचलासः (ऋ० १-१६४-४८)।

(७) मांसभक्षणनिषेधः, द्यूतनिषेधः, कृषिप्रशंसा च-गोमांस-मनुष्यमांस-अश्वादि-मांसभक्षणस्य चात्र निषेधः । तद्यथा—

यः पौरुषेयेण क्रविषा समङ्क्ते यो अश्व्येन पशुना यातुधानः ।

यो अघ्न्याया भरतिक्षीरमग्ने तेषां शीर्षाणि हरसा वि वृश्च ॥ (ऋ०)

'अक्षाख्यद्यूतक्रीडाया' निन्दानिषेधश्च ऋग्वेदस्य दशममण्डले उपदिष्टः । तथा हि—

अक्षैर्मा दीव्यः कृषिमित् कृषस्व वित्ते रमस्व बहु मन्यमानः ।

तत्र गावः कितव तत्र जाया तन्मे विचष्टे सवितायमर्यः ॥ (ऋ०)

जाया तप्यते कितवस्य हीना माता पुत्रस्य चरतः क्वस्वित् ।

ऋणावा बिभ्यद्धनमिच्छमानोऽन्येषामस्तमुप नक्तमेति ॥ (ऋ०)

एवंविधाः उपदेशाः परामर्शाश्चात्र निर्दिष्टाः सन्ति । तेषामनुष्ठानेन मानवस्य नितरां कल्याणं भवति ।

(८) नाट्यशास्त्रम्— नाट्यशास्त्रस्य मूलं संवाद ऋग्वेदे गीतं सामवेदेऽभिनयो यजुर्वेदे रसा अथर्ववेदे च प्राप्यन्ते । उक्तं च —

जग्राह पाठ्यमृग्वेदात्सामभ्यो गीतमेव च ।

यजुर्वेदादभिनयान् रसानाथर्वणादपि ॥ (भरतस्य नाट्यशास्त्रात्)

(९) मोक्षस्यानन्दः—अत्र मोक्षानन्दस्वरूपस्य विवेचनं प्राप्यते । तद्यथा—

'यत्र ज्योतिरजस्रं यस्मिन् लोके स्वर्हितम् । तस्मिन् मां धेहि पवमानामृते लोके अक्षित इन्द्रायेन्दो परिस्रव' । (ऋ०)।

'एक एवाग्निर्बहुधा समिद्ध एकः सूर्यो विश्वमनुप्रभूतः । एकैवोषा सर्वमिदं विभात्येकं वा इदं वि बभूव सर्वम् ।' (ऋ०)।

(१०) पुनर्जन्म—वेदे पुनर्जन्मसम्बन्धि अतिरमणीयं तत्त्वं दृश्यते—'आ यो धर्माणि प्रथमः ससाद ततो वपूंषि कृणुते पुरूणि । धास्युर्योनिं प्रथम आविवेश यो वाच-मनुदितां चिकेत । अथर्व० ।

एवं वेदा हि सत्यतायाः सरणयः, शुभाशुभनिदर्शकाः, सुखशान्तिसाधकाश्च । प्राचीनानि धर्म समाज-व्यवहा[illegible]णि वस्तुजातानि बोधयितुं श्रुतय एव क्षमन्ते ।

—

२—वेदाङ्गानि तेषामुपयोगिता च

वेदस्य षड् अङ्गानि, यथोक्तं पाणिनिना स्वशिक्षायाम्—

'छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते ।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ॥
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् ।
तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते ॥ पा० शि० ४१-४२ ।

पतञ्जलिनाप्युक्तम्—

'ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च ॥' (पस्पशाह्निके)

वेदार्थावबोधाय तत्स्वराद्यवगमाय तद्विनियोगज्ञानाय एव जनिरभवद् वेदाङ्गानाम् । शिक्षा-कल्प-व्याकरण-निरुक्त-छन्दो ज्यौतिषमिति षड् वेदाङ्गानि । तथा चोच्यते—

'शिक्षा कल्पो व्याकरणं निरुक्तं छन्दसां चयः ।
ज्योतिषामयनं चैव वेदाङ्गानि षडेव तु ॥'

वेदाङ्गानां विवरणं तेषामुपयोगिता च समासतोऽत्र प्रस्तूयते ।

(१) शिक्षा—शिक्षाग्रन्था वर्णोच्चारणविधिं वर्णयन्ति । तच्छास्त्रं शिक्षा नाम येन वेदमन्त्राणामुच्चारणं शुद्धं सम्पाद्यते । तैत्तिरीयोपनिषदारम्भे शिक्षाशास्त्रप्रयोजनमुक्तम् । यथा—

'अथ शिक्षां व्याख्यास्यामः—वर्णः, स्वरः, मात्रा, बलम् , साम, सन्तान इत्युक्तः शिक्षाऽध्यायः ।' तत्र वर्णोऽकारादिः, स्वर उदात्तादिः, मात्रा ह्रस्वादिः, बलं स्थान-प्रयत्नौ, साम निषादादि, सन्तानो विकर्षणादिः । एतदवबोधनमेव शिक्षायाः प्रयोजनम् । अधुना शिक्षाया ग्रन्थास्त्रिंशत्संख्याका उपलभ्यन्ते । तेषु याज्ञवल्क्यशिक्षा, वाशिष्ठी शिक्षा, कात्यायनी शिक्षा, पाराशरी शिक्षा, अमोघानन्दिनी शिक्षा, नारदी शिक्षा, शौनकीय शिक्षा, गौतमी शिक्षा, माण्डूकी शिक्षा, पाणिनीयशिक्षा च मुख्याः । पाणिनीय-शिक्षैव आद्रियते विद्वद्भिः ।

वेदभेदेन शिक्षाभेदो भवति, यथा—याज्ञवल्क्यशिक्षा शुक्लयजुर्वेदस्य, नारदी शिक्षा सामवेदस्येत्यादि ।

(२) कल्पः—कल्पसूत्रेषु विविधाध्वराणां संस्कारादीनां च वर्णनं प्राप्यते । मन्त्राणां विविधकर्मसु विनियोगश्च तत्र प्रतिपाद्यते ।

कल्पसूत्राणि द्विविधानि श्रौतसूत्राणि स्मार्त्तसूत्राणि च । श्रुत्युक्त-यागविधि-प्रकाशकानि श्रौतसूत्राणि । स्मार्त्तसूत्राण्यपि द्विधा—गृह्यसूत्राणि धर्मसूत्राणि च ।

श्रौतसूत्रेषु अग्नित्रयाधानम् , अग्निहोत्रम् , दर्शपूर्णमासौ, पशुयागः, नानाविधाः सोमयागाश्चेति विषयाः समुपपादिताः । आश्वलायन-श्रौतसूत्रम् , शांखायन-श्रौतसूत्रम्, बौधायन०, आपस्तम्ब०, कात्यायन०, मानव०, हिरण्यकेशी०, लाट्यायन०, द्राह्यायण०,

वैतानश्रौतसूत्रं च प्रमुखाणि श्रौतसूत्राणि सन्ति । इमानि श्रौतसूत्राणि कमप्येकं वेदमाश्रित्य वर्तन्ते ।

गृह्यसूत्रेषु षोडशसंस्काराणां पञ्चमहायज्ञानां सप्तपाकयज्ञानामन्येषां च गृह्यकर्मणां सविशेषं वर्णनमाप्यते । आश्वलायनगृह्यसूत्रम्, पारस्कर०, शांखायन०, बौधायन०, आपस्तम्ब०, मानव०, हिरण्यकेशी०, भारद्वाज०, वाराह०, काठक०, लौगाक्षि०, गोभिल०, द्राह्याण०, जैमिनीय०, खदिरगृह्यसूत्रं च प्रमुखाणि गृह्यसूत्राणि सन्ति इमानि सूत्राण्यपि कमप्येकं वेदमाश्रित्य वर्तन्ते ।

धर्मसूत्रेषु धार्मिकनियमाः, प्रजानां राज्ञां च कर्तव्यचयाः, चत्वारो वर्णाः, चत्वार-आश्रमाः, तेषां धर्माः पूर्णतया निरूपिताः । बौधायनधर्मसूत्रम्, आपस्तम्ब०, हिरण्य-केशी०, वसिष्ठ०, मानव०, गौतमधर्मसूत्रं च प्रमुखाणि धर्मसूत्राणि सन्ति ।

शुल्वसूत्रेषु यज्ञवेद्या मानादिकं वेदीनिर्माणविध्यादिकं च वर्ण्यते । बौधायन-शुल्व-सूत्रम्, आपस्तम्ब०, कात्यायन०, मानवशुल्वसूत्रं च मुख्या ग्रन्थाः सन्ति ।

(३) व्याकरणम् —

इदमन्धं तमः कृत्स्नं जायेत भुवनत्रयम् ।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते ॥

भाषा लोकव्यवहारं चालयति, यदि भाषा न स्यात्, जगदिदमन्धे तमसि मज्जेत् । भाषां विना लोका नैजमाशयं प्रकाशयितुम् न प्रभवेयुः । साधुशब्दा हि प्रयुक्ताः यथार्थमर्थं प्रकटयन्ति । साधुशब्दप्रयोगे व्याकरणमेव मूलभूतं कारणम् । नहि व्याकरणज्ञानशून्यः साधून् शब्दान् प्रयोक्तुमीशः । वेदस्य रक्षार्थं व्याकरणाध्ययनमत्यावश्यकम्, यथोक्तं पतञ्जलिना—

रक्षार्थं वेदानामध्येयं व्याकरणम्, लोपागमवर्णविकारज्ञो हि पुरुषः सम्यक् वेदान् परिपालयिष्यति

व्याकरणस्य सर्वाणि प्रयोजनान्युक्तानि महाभाष्ये, 'रक्षोहागमलघ्वसन्देहाः प्रयोजनम् ।' रक्षार्थं वेदानामध्येयं व्याकरणम् । ऊहः खल्वपि, न सर्वैर्लिङ्गैर्न सर्वाभिर्विभक्तिभिर्वेदे निगदिताः, ते चावश्यं यज्ञगतेन पुरुषेण यथायथं विपरिणमयितुम् । तस्मादध्येयं व्याकरणम् । एवमन्यान्यपि प्रयोजनानि व्याख्यातानि भाष्ये ।

पाणिनेरष्टाध्यायी, कात्यायनस्य वार्तिकं भाष्यकृतो भाष्यमेति त्रिमुनिव्याकरणं प्रसिद्धम् । व्याकरणान्यष्टौ—

'प्रथमं प्रोच्यते ब्राह्मं द्वितीयमैन्द्रमुच्यते ।
याम्यं प्रोक्तं ततो रौद्रं वायव्यं वारुणं तथा ॥
सावित्रं च तथा प्रोक्तमष्टमं वैष्णवं तथा ॥' (भविष्यपुराणे ब्राह्मपर्व)

लघु-त्रिमुनि-कल्पतरुकारः नव व्याकरणानि स्मरन्ति —

'ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम् ।
सारस्वतं चापिशलं शाकलं पाणिनीयकम् ॥

व्याकरणानामष्टविधत्वमेव प्रसिद्धम् , यथोक्तं भास्करेण—

'अष्टौ व्याकरणानि षट् च भिषजां व्याचष्ट ताः संहिताः ।'

संस्कृत-व्याकरणावबोधाय पाणिनेरष्टाध्यायी सर्वप्रमुखा ।

(४) निरुक्तम्—निरुच्यते निःशेषेणोपदिश्यते निर्वचनविधया तत्तदर्थबोधनाय पदजातं यत्र तन्निरुक्तम् । निरुक्ते क्लिष्टवैदिकशब्दानां निर्वचनं प्राप्यते । व्याकरण-साध्यकतिपयकार्यविधायित्वाच्च शास्त्रमिदं पृथक् प्रणीतम् । तदुक्तं यास्केन—'अथापीदमन्तरेण मन्त्रेष्वर्थप्रत्ययो न विद्यते । अर्थमप्रतियतो नात्यन्तं स्वसंस्कारोद्देशः, तदिदं विद्यास्थानं व्याकरणस्य कार्त्स्न्यं स्वार्थसाधकञ्च । नहि निरुक्तार्थवित् कश्चिन्मन्त्रं निर्वक्तुमर्हतीति वृद्धानुशासनम् निरुक्तप्रक्रियानुरोधेनैव निर्वक्तव्या नान्यथा ।' विषयेऽस्मिन् यास्कप्रणीतं निरुक्तमेव प्रमुखो ग्रन्थः । अत्र मन्त्राणां निर्वचनमूलाया व्याख्यायाः प्रथमः प्रयासः समासाद्यते । निरुक्तं पञ्चविधम्—

'वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ ।

धात्वोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम् ॥'

(इति भर्तृहरिः)

(५) छन्दः—वेदेषु मन्त्राः प्रायशश्छन्दोबद्धा एव । मन्त्राणां छन्दोबद्धतया छन्दसां ज्ञानं विना वेदमन्त्राः साधु उच्चारयितुं न शक्यन्ते, अतएव छन्दःशास्त्रमनिवार्यम् । छन्दःशास्त्रस्य पिङ्गलच्छन्दःसूत्रनामा ग्रन्थः सर्वाधिकप्रसिद्धः । अत्र वैदिकानि लौकिकानि च च्छदांसि विवेचितानि ।

(६) ज्यौतिषम्—वेदाङ्गेषु ज्यौतिषशास्त्रस्यापि नितरां महत्त्वं वर्तते । तथाहि—

'वेदाः हि यज्ञार्थमभिप्रवृत्ताः कालानुपूर्वा विहिताश्च यज्ञाः ।

तस्मादिदं कालविधानशास्त्रं यो ज्यौतिषं वेद स वेद यज्ञान् ॥'

(आर्चज्यौतिषम् ३६)

शुभं मुहूर्तमाश्रित्यैव विशिष्टोऽध्वरः प्रावर्ततेति शुभमुहूर्ताकलनाय ज्यौतिषस्योदयोऽभूत् । इदं कालविज्ञापकं शास्त्रम् । चतुर्णामपि वेदानां पृथक् पृथक् ज्यौतिषशास्त्रमासीत् , तेषु सामवेदस्य ज्यौतिषशास्त्रमासीत् , तेषु सामवेदस्य ज्यौतिषशास्त्रं नोपलभ्यते, त्रयाणामितरेषां वेदानां ज्यौतिषाण्यवाप्यन्ते । विषयेऽस्मिन् आचार्य 'लगध' प्रणीतं 'वेदाङ्ग-ज्यौतिषम्' इति ग्रन्थ एव साम्प्रतमुपलभ्यते ।

३—कालिदास-भारती—उपमा कालिदासस्य

अस्पृष्टदोषा नलिनीव दृष्टा हारावलीव ग्रथिता गुणौघैः ।

प्रियाङ्कपालीव विमर्दहृद्या न कालिदासादपरस्य वाणी ॥ श्रीकृष्णः ।

कविकुलललामभूतः कविताकामिनीकान्तः महाकविः कालिदासः कस्य सचेतसः चेतः नावर्जयति । अयं संस्कृतसाहित्यमहाकाशे अम्बरमणिरिव प्रकाशते । अस्य महाकवेः काव्यमाधुरी तथा प्रसिद्धा यथा नार्हति प्रस्तावनाम् । कालिदासो निजे काव्ये वस्तुवर्णनावसरे रसस्य प्राञ्जलमुपस्थापनं तथा मनोरमपद्धत्या विधत्ते यथा स नातिमन्थर-

चपलः कामपि विचित्रां कमनीयतामावहन्नास्वादः पात्रकानां हृदयानि हर्षस्तिमितवृत्तीनि विधत्ते। तस्य सूक्तयः सुधासिक्ता मञ्जर्य इव चेतोहराः सन्ति। तद्यथा—

'निर्गतासु न वा कस्य कालिदासस्य सूक्तिषु।
प्रीतिर्मधुरसान्द्रासु मञ्जरीष्विव जायते ॥ (हर्षचरिते)

उपमायां यादृक् सिद्धहस्तः प्रशस्तः कविः कालिदासोऽस्ति न तादृगन्यः कश्चित्कविः। अतः साधूच्यते—'उपमा कालिदासस्य।' एतदेवात्र विविच्यते।

कालिदासस्योपमाप्रयोगेऽपूर्वं वैशारद्यम्। उपमा तस्य निसर्गसिद्धा प्रेयसीव प्रतीयते। उपमाप्रयोगे चातुर्येणैव स 'दीपशिखा-कालिदास' इति प्रसिद्धिमाप। अस्य काव्येषु उपमालता यादृशी पुष्पिता पल्लविता च न तादृशी कवीश्वराणामन्येषां काव्येषु। उपमा कालिदासस्येति कथनं तु न प्रमाणमपेक्षते—

'पुरस्कृता वर्त्मनि पार्थिवेन प्रत्युद्गता पार्थिवधर्मपत्न्या।
तदन्तरे सा विरराज धेनुः दिनक्षपामध्यगतेव सन्ध्या ॥'
'सञ्चारिणी दीपशिखेव रात्रौ यं यं व्यतीयाय पतिंवरा सा।
नरेन्द्रमार्गाट्ट इव प्रपेदे विवर्णभावं स स भूमिपालः ॥'
कामदेवो दीप इवास्ते, रतिश्च कामविहीना दीपदशेव भृशं दुःखमाप।
'गत एव न ते निवर्तते, स सखा दीप इवानिलाहतः ॥
अहमस्य दशेव पश्य मामविषह्यव्यसनेन धूमिताम्।'

'रघुः पितुर्दिलीपस्य मनोहरैः शरीरावयवैः सूर्यरश्मेरनुप्रवेशात् बालचन्द्रमा इव वृद्धिं पुपोष। तथाहि—

पितुः प्रयत्नात् स समग्रसम्पदः शुभैः शरीरावयवैर्दिने दिने।
पुपोष वृद्धिं हरिदश्वदीधितेरनुप्रवेशादिव बालचन्द्रमाः ॥

भारतीय-संस्कृतिपरम्परयानुकूलां रघूणां जीवनपद्धतिं कविकुलगुरुः कालिदासः इत्थं वर्णयति—

सोऽहमाजन्मशुद्धानामाफलोदयकर्मणाम्।
आसमुद्रक्षितीशानामानाकरथवर्त्मनाम् ॥
यथाविधिहुताग्नीनां यथाकामार्चितार्थिनाम्।
यथापराधदण्डानां यथाकालप्रबोधिनाम् ॥
त्यागाय सम्भृतार्थानां सत्याय मितभाषिणाम्।
यशसे विजिगीषूणां प्रजायै गृहमेधिनाम् ॥
शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम्।
वार्द्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम् ॥

भारतीयपरम्परोपनतस्त्रीजनस्य भर्तृजनं प्रति प्रेमदर्शनमित्थं वर्णयति—

किं वा तवात्यन्तवियोगमोघे कुर्यामुपेक्षां हतजीवितेऽस्मिन्।
स्याद्रक्षणीयं यदि मे न तेजस्त्वदीयमन्तर्गतमन्तरायः ॥

साऽहं तपः सूर्यनिविष्टदृष्टिरूर्ध्वं प्रसूतेश्चरितुं यतिष्ये ।
भूया यथा मे जननान्तरेऽपि त्वमेव भर्ता न च विप्रयोगः ॥
नृपस्य वर्णाश्रमपालनं यत् स एव धर्मो मनुना प्रणीतः ।
निर्वासिताऽप्येवमतस्त्वयाहं तपस्विसामान्यमपेक्षणीया ॥

अजविलापमप्यतीव मार्मिकं प्रतिभाति । तथा हि—

पतिरंकविषण्णया तया करणापायविभिन्नवर्णया ।
समलक्ष्यत बिभ्रदाविलां मृगलेखामुषसीव चन्द्रमाः ॥
विललाप सबाष्पगद्गदं सहजामप्यपहाय धीरताम् ।
अभितप्तमयोऽपि मार्दवं भजते कैव कथा शरीरिषु ॥
कुसुमान्यपि गात्रसङ्गमात् प्रभवन्त्यायुरपोहितुं यदि ।
न भविष्यति हन्त साधनं किमिवान्यात् प्रहरिष्यतो विधेः ॥
स्रगियं यदि जीवितापहा हृदये किं निहिता न हन्ति माम् ।
विषमप्यमृतं क्वचिद् भवेदमृतं वा विषमीश्वरेच्छया ॥
अथवा मम भाग्यविप्लवादशनिः कल्पित एष वेधसा ।
यदनेन तरुर्न पातितः क्षपिता तद्विटपाश्रिता लता ॥

गीतिमयं काव्यं मेघदूतं हि काव्याम्बुधौ समुपगतं परमोज्ज्वलं रत्नम् । अत्र कश्चिद्यक्षः स्वपत्न्यामनुरक्तो गुह्यकेश्वरस्य स्वभर्तुर्नियोगं शून्यं कुर्वन् तेन 'वर्षमेकं कान्ताविच्छेददुःखमनुभवन् रामगिर्याश्रमे तिष्ठ' इति कोपेन शप्तस्ततो वर्षाकाले समागते नितान्तविधुरोऽसौ यक्षो ज्ञानरहित एव मेघमेव दौत्येन सम्प्रेष्य स्वप्रियाया निकटे आत्मनः कुशलावस्थां प्रापयितुमिच्छन् स्वनगर्या अलकाया गमनमार्गं व्यजिज्ञपत् । अतः परमुत्तरमेघे—अलकानिवासिनां तथा स्वप्रियायाश्चाभिज्ञानं केन प्रकारेण च तस्या आश्वासनादिकमिति युक्तं वर्णितम् ।

मेघदूतस्य भाषा अतीव प्राञ्जला, सुमधुरा, प्रसादगुणशालिनी च । मेघं प्रति याचनाप्रकारः अतीव रोचकः । तथा हि—

जातं वंशे भुवनविदिते पुष्करावर्तकानां
जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः ।
तेनार्थित्वं त्वयि विधिवशाद् दूरबन्धुर्गतोऽहं
याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा ॥

धूमज्योतिःसलिलमरुतां सन्निपातः क्व मेघः
संदेशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः ।
इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे
कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु ॥

प्रायः श्लोकशतकमितोऽयं ग्रन्थः किमपि अलौकिकं मादकं तत्त्वं रक्षति येन लोको 'माघे मेघे गतं वयः' इति साभिमानं वक्तुमुत्सहते। इदमेव हि मेघदूतस्य वैशिष्ट्यं यत्तत्र वर्णनप्रवृत्तानि पद्यान्यपि मनोगतान् विरहिजनभावानभिव्यञ्जयन्ति—

'वेणीभूतप्रतनुसलिलासावतीतस्य सिन्धुः
पाण्डुच्छायातटरुहतरुभ्रंशिभिर्जीर्णपर्णैः।
सौभाग्यं ते सुभग विरहावस्थया व्यञ्जयन्ती
कार्श्यं येन त्यजति विधिना स त्वयैवोपपाद्यः॥

पद्येऽत्र सिन्धोर्दशा दूरं गच्छति, विरहिण्या दशैव पुर उपेत्य विरहिणो हृदये कामपि पीडामवतारयति, याऽध्येतृरसिकानां हृदये विप्रलम्भशृङ्गारं प्रवाहयति।

कालिदासेन मेघदूते सौन्दर्यसृष्टेः परा काष्ठा प्रकाशिता—

'तन्वी श्यामा शिखरिदशना पक्वबिम्बाधरोष्ठी'। इति सर्वाणि विशेषणान्युपन्यस्याप्यपरितुष्यता।

अस्य महाकवेश्चत्वारि महाकाव्यानि—ऋतुसंहार-कुमारसम्भव-रघुवंश-मेघदूताभिधानानि तथा त्रीणि नाटकानि-मालविकाग्निमित्र-विक्रमोर्वशीय-अभिज्ञानशाकुन्तलाभिधानि, तेषु शाकुन्तलं सर्वोत्कृष्टम्। इदं नाटकं कालिदासस्य सर्वस्वमभिधीयते।

कालिदासः स्वीये शाकुन्तले सौन्दर्यभावनायां रससिद्धौ च परां सिद्धिं प्राप्तवान्। प्रकृतिक्रोडे व्यतिगतबाल्यायाः शकुन्तलायाः स्वरूपे वर्ण्यमाने—

'अधरः किसलयरागः कोमलविटपानुकारिणौ बाहू।
कुसुममिव लोभनीयं यौवनमङ्गेषु सन्नद्धम्॥'

पुनश्च—

सरसिजमनुविद्धं शैवलेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम्॥

पद्यमिदं पठन् सहृदयः बाह्यप्रकृतेरन्तःप्रकृत्या सामञ्जस्यं प्रतियन् शकुन्तलां कमनीयलतारूपां प्रत्यक्षीकुरुते। सौन्दर्यभावनायां सौकुमार्यमावेदयितुं कविरयं यत्र तत्र कृतप्रयासः—

'पुष्पं प्रवालोपहितं यदि स्यान्मुक्ताफलं वा स्फुटविद्रुमस्थम्।'

रससिद्धौ पुनरयमाचार्य एव। यद्यपि सर्वत्रैव शकुन्तलानाटकं रम्यं, तथापि तच्चतुर्थेऽङ्के ललनाधुरीणाया महिषीमङ्गलमयगुणप्रवीणायाः सुन्दरीसकललावण्यसमन्वितायाः स्वीयसौन्दर्यसमस्तभुवनव्यामोहिकायाः प्रियदर्शनायाः शकुन्तलायाः प्रस्थानानेहसि सर्वत्र भारती-कोष भगवतीतोषोपलब्धिविकासेन उपमाविलासेन अकृतवह्वायासेन श्रीमता कविकालिदासेन काश्यपमुखाद्यत् पद्यचतुष्कं प्रतिपादितम्, तत्र खलु भावस्य

प्रस्फोटनं, सांसारिकव्यवहारस्य प्रदर्शनम्, अचेतनाज्ञानिसत्त्वैः सह प्रेमप्रकटनं, यन्न्य-घायि पद्यचतुष्कमध्ये तदेव सर्वस्वान्तद्रावकं प्रशमितचित्तदुःखपावकं वरीवर्ति ।

(अवलोकनीयौ)

यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया
कण्ठस्तम्भितबाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम् ।
वैक्लव्यं मम तावदीदृशमपि स्नेहादरण्यौकसः
पीडयन्ते गृहिणः कथं नु तनयाविश्लेषदुःखैर्नवैः ॥

\+ \+ \+

शकुन्तला—(पितरमाश्लिष्य) कथमिदानीं तातस्याङ्कात् परिभ्रष्टा मलयतटोन्मूलिता चन्दनलतेव देशान्तरे जीवनं धारयिष्ये ?

काश्यपः—किमेवं कातरासि ?

अभिजनवतो भर्तुः श्लाघ्ये स्थिता गृहिणीपदे,
विभवगुरुभिः कृत्यैस्तस्य प्रतिक्षणमाकुला ।
तनयमचिरात् प्राचीवार्कं प्रसूय च पावनं
मम विरहजां न त्वं वत्से शुचं गणयिष्यसि ।
(शकुन्तला पितुः पादयोः पतति)

गौतमी· जाते परिहीयते गमनवेला निवर्तय पितरम् ।

शकुन्तला—कदा नु भूयस्तपोवनं प्रेक्षिष्ये ?

काश्यपः—गच्छ वत्से ! शिवास्ते पन्थानः सन्तु ।

अहो ! कीदृशोऽयं मर्मस्पर्शी संवादः ।

यत्र कालिदासीयनाटकेषु पात्राणि जीवनशक्तिसम्पन्नानि, उपमाः स्थानीयशोभावर्जनायैव विन्यस्ताश्च भवन्ति, तत्रैव हृदयपक्षोऽपि नानादरभाजनतां नीयते ।

शब्दविन्यासोऽपि कवेरस्य कव्यन्तरविलक्षण एव, दृश्यताम्—

'ततो मृगेन्द्रस्य मृगेन्द्रगामी वधाय वध्यस्य शरं शरण्यः ।
जाताभिषङ्गो नृपतिर्निषङ्गादुद्धर्तुमैच्छत् प्रसभोद्धृतारिः ॥'
'तमार्यगृह्यं निगृहीतधेनुर्मनुष्यवाचा मनुवंशकेतुम् ।
विस्माययन् विस्मितमात्मवृत्तौ सिंहोरुसत्त्वं निजगाद सिंहः ॥'
'इत्थं द्विजेन द्विजराजकान्तिरावेदितो वेदविदां वरेण ।
एनोनिवृत्तेन्द्रियवृत्तिरेनं जगाद भूयो जगदेकनाथः ॥'

किमीदृशी शब्दसज्जा क्वचिदपरकविकृतावपि दृष्टा श्रीमद्भिः ?

विविधरूपधारिणी अस्योपमाऽपि चेतश्चमत्करोति—

तां हंसमाला शरदीव गङ्गां महौषधिं नक्तमिवात्मभासः ।
स्थिरोपदेशामुपदेशकाले प्रपेदिरे प्राक्तनजन्मविद्याः ॥ (कुमार०)

कालिदासस्य वर्णविन्यासमाधुर्यं, भाषायाः प्राञ्जलता च नान्यत्राभिलक्ष्यते ।

पुरा कवीनां गणनाप्रसङ्गे, कनिष्ठिकाऽधिष्ठितकालिदासा ।
अद्यापि तत्तुल्यकवेरभावादनामिका, सार्थवती बभूव ॥

४—भासनाटकचक्रम्

महाकवेर्भासस्य कृतित्वेन त्रयोदश रूपकरत्नानि समुपलभ्यन्ते । 'भासनाटकचक्रेऽपि छेकैः क्षिप्ते परीक्षितुम्' इति राजशेखरभणितिमाश्रित्य भासनाटकचक्रमिति तत्कृतनाटकानां नाम व्यवह्रियते । त्रयोदशनाटकानां परिचयः समासतोऽत्र प्रस्तूयते । (१) मध्यमव्यायोगः - नाटकमिदमेकाङ्कि । अत्र हिडिम्बानामकराक्षस्या सह भीमस्य प्रणयः, घटोत्कचनामकपुत्रद्वारा चिरविरहितयोस्तयोः सङ्गश्च वर्णितः । (२) दूतघटोत्कचम्—एकाङ्कि नाटकमदः । हिडिम्बाभीमयोरात्मजस्य घटोत्कचस्य दौत्यमाश्रित्य धृतराष्ट्रान्तिकं गमनम् । दुर्योधनकृतस्तस्यावमानः । दुर्योधनकृतस्तस्यावमानः । दुर्योधनोक्तिश्च —'प्रतिवचो दास्यामि ते सायकैरिति ।' (३) कर्णभारम्—नाटकमिदमेकाङ्कि । कर्णस्योदात्तं चरितम् , तेन इन्द्राय कवचकुण्डले दत्ते । (४) ऊरुभङ्गः—नाटकमेतदेकाङ्कि । भीमेन प्रियापरिभवप्रतप्तेन गदायुद्धे दुर्योधनोरुभञ्जनं वस्तु प्रतिपाद्यते । संस्कृत साहित्ये शोकान्तनाटकस्येदमेकं निदर्शनम् । (५) दूतवाक्यम् —एकाङ्कि नाटकम् । अत्र दूतभूतस्य श्रीकृष्णस्य सदाशयतया सहैव दुर्योधनस्याभिमानित्वं वर्णितम् । (६) पञ्चरात्रम्—अङ्कत्रयमत्र । कल्पिता कथा । द्रोणेन कौरवाणां यज्ञे आचार्यत्वं कृतम् , दक्षिणायां स पाण्डवानां राज्यं याचितवान् । पञ्चदिनाभ्यन्तरेऽन्वेषणे क्रियमाणे लभ्यं तदिति दुर्योधनस्याश्वासने द्रोणेन तथा कृतम् । (७) बालचरितम्—अङ्कपञ्चकमत्र । श्रीकृष्णस्य जन्मारभ्य कंसवधान्तं चरितमिह वर्ण्यते । (८) अविमारकम् —अङ्कषट्कमत्र । अविमारके—या कथा सा सम्भवतो गुणाढ्यकृतबृहत्कथातो गृहीता । राजकुमारस्याविमारकस्य कुन्तिभोजकुमार्या कुरङ्गया सह प्रणयोऽत्र वर्णितः । (९) प्रतिज्ञायौगन्धरायणम्—अङ्कचतुष्टयमत्र । मन्त्रिणो यौगन्धरायणस्य नीतिरुदयनवासवदत्तयोः प्रणयकथा चात्रोपनिबद्धा ।

(१०) स्वप्नवासवदत्तम्—अङ्कषट्कमत्र । मन्त्री यौगन्धरायणः पद्मावत्या मगधराजभगिन्या सहोदयनस्य विवाहं कारयित्वा राजशक्तिं वर्द्धयितुमैच्छत् । ध्रियमाणायां च वासवदत्तायां न सम्भवतीदमिति कदाचिदुदयने मृगयार्थं गते मन्त्रिसम्मत्या वासवदत्ता दग्धेति प्रचार्यते । राज्ञा चिरं विषद्यापि न तत्प्रेमणि मालिन्यमानीयते पश्चात् पद्मावत्यां परिणीतायां स्वप्नक्रमेणैव वासवदत्ता लभ्यते ।

(११) दरिद्रचारुदत्तम्—वसन्तसेनाचारुदत्तयोः प्रणयकथाऽत्र वर्णिता । अस्य चत्वार एवाङ्का उपलभ्यन्ते ।

(१२) अभिषेकनाटकम्—अङ्कषट्कमत्र । रामायणोक्ता बालिवधादारभ्य रामराज्याभिषेकान्ता कथाऽत्र वर्णिता ।

(१३) प्रतिमानाटकम्—अङ्कसप्तकमिह । रामायणप्रोक्तं रामस्य पूर्वचरितमुपनिबद्धम् ।

नाटकानामेतेषां प्रणेता भास एवान्यो वेति विविधा विप्रतिपत्तिर्विषयेऽस्मिन्। भास एवैतेषां नाटकानां प्रणेतेति विद्वद्भिरधिकैरुररीक्रियते। उपरिनिर्दिष्टनामानि नाटकरत्नानि समानकर्तृकाणि यत एषु आश्चर्यजनकं साम्यं प्रतिभासते। यथा—

(१) नाटकानि सर्वाण्यपि 'नान्द्यन्ते ततः प्रविशति सूत्रधारः' एभिरेव शब्दैः प्रारभ्यन्ते। (२) एषु नाटकेषु क्वापि रचयितुर्नाम परिचयादिकं नोपलभ्यते। (३) प्रायः सर्वत्र नाटकभूमिकार्थं प्रस्तावनाशब्दस्थापने 'स्थापना' शब्दप्रयोगः। (४) भरतवाक्यं प्रायशः सममेव सर्वत्र। (५) एषां नाटकानां भाषाऽऽश्चर्यजनकं साम्यं वहति। (६) सर्वेष्वप्येषु रूपकेषु पताकास्थानस्य मुद्रालङ्कारस्य च समानः प्रयोगः। (७) अप्रधानपात्राणां नाम-साम्यम्, व्याकरणलक्षणहीनप्रयोगप्राचुर्यम्, समानं वाक्यं, सर्वत्र बाहुल्येन लभ्यते। (८) भरतकृतनाट्यशास्त्रीयनियमानां सर्वत्र समभावेनानादरः। (९) नाट्यनिर्देशस्य अभावः सर्वत्र समानः। (१०) एषां सर्वेषां रूपकाणां नामानि केवलमन्त एव ग्रन्थस्य लभ्यन्ते नान्यत्र क्वापि

बाणभट्टः स्वीये हर्षचरिते 'सूत्रधारकृतारम्भैः' इति भासनाटकवैशिष्ट्यमाचष्टे। तच्च सर्वत्रेहावाप्यते। राजशेखरोऽभिधत्ते—'भासनाटकचक्रेऽपि छेकैः क्षिप्ते परीक्षितुम्। स्वप्नवासवदत्तस्य दाहकोऽभून्न पावकः।' भोजदेवो रामचन्द्रगुणचन्द्रौ च स्वप्नवासवदत्तं भासकृतिमामनन्ति। अतो भास एव सर्वेषां प्रणेतेत्यवगम्यते।

भासस्य जनिकालश्च ४५० ई० पूर्वादनन्तरं ३७० ई० पूर्वात्प्राक् च स्वीक्रियते। बहूनां रूपकाणां लेखको भासो जीवनस्य विविधानि क्षेत्राणि दृशोः पात्रतां नीतवानिति वक्तुं सुशकम्, अतएव चास्य रूपकेषु विविधता समायाता। अभिनेयताहेतवश्च—एषां रूपकाणामादितोऽन्तं यावदभिनये सौकर्यम्, सुबोधा सरला संक्षेपवती च वाक्यावलिः, वर्णनविरहः, अविस्तृतानि पात्राणां कथनोपकथनानि, इत्यादिकाः सर्वेषु रूपकेषु दृश्यन्ते। उपमारूपकोत्प्रेक्षार्थान्तरन्यासालंकाराणां प्रयोगो विशेषतोऽवाप्यते तस्य रूपकेषु। अनुप्रासादिकं विशेषतः प्रियं तस्य : यथा—हा वत्स राम जगतां नयनाभिराम (प्रतिमा०)। स मनोवैज्ञानिकविवेचने अतीव निपुणः। यथा—दुःखं त्यक्तुं बद्धमूलोऽनुरागः (स्वप्नवासव०), प्रद्वेषो बहुमानो वा० (स्वप्नवासव०)। स उपमाप्रयोगेऽपि दक्षः। यथा—सूर्य इव गतो रामः (प्रतिमा०), विचेष्टमानेव० (प्रतिमा०)। भारतीया भावाः तस्मै सविशेषं रोचन्ते। यथा—पितृभक्तिः, पातिव्रत्यम्, भ्रातृप्रेमादिकम्। भर्तृनाथा हि नार्यः (प्रतिमा०), कुतः क्रोधो विनीतानाम्० (प्रतिमा०), 'अयुक्तं परपुरुषसंकीर्तनं श्रोतुम्' (स्वप्न०) स यथावसरम् व्याकरणादिवैदग्ध्यमपि प्रदर्शयति। यथा—घनः स्पष्टो धीरः (प्रतिमा०), स्वरपद० (प्रतिमा०)।

भासस्य कृतयोऽन्येषां कृतिभिः सह साम्यं बिभ्रति। यथा—शाकुन्तले चतुर्थेऽङ्के वृक्षलतादीन् प्रति शकुन्तलायाः यः कोमलो मनोभावः—'पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या' इत्यादिना वर्णितस्तत्तुल्य एव भासस्याभिषेके 'यस्यां न प्रियमण्डनापि महिषी देवस्य मन्दोदरी' इत्यादौ मनोभावो वर्ण्यते। यथैव शाकुन्तले—'तव सुचरितमङ्गुली-

यन्नूनं प्रतनु ममैव विभाव्यते फलेन' इति दुष्यन्तेनाङ्गुरीयकं प्रत्युच्यते, तथैव स्वप्नवासवदत्ते —'श्रुतिसुखनिनदे कथं न देव्याः स्तनयुगले जघनस्थले च सुप्ता' इति वीणादौर्भाग्यमाक्रुश्यते। एवमेव शूद्रकस्य मृच्छकटिकेन सह चारुदत्तस्य सर्वांशगतं सादृश्यमासाद्यते।

५—विद्ययाऽमृतमश्नुते

जगति 'सर्वद्रव्येषु विद्यैव अहार्यत्वादक्षयत्वाच्च सर्वदा सर्वश्रेष्ठं द्रव्यम्' इत्याहुः विद्वांसः। अतः 'विद्याविहीनः पशुरि'ति लोकोक्तिः प्रसिद्धाऽस्ति। विद्याविहीनो मानवः पशुरिव धर्माधर्मयोः पापपुण्ययोः कर्त्तव्याकर्त्तव्ययोः निर्णयेऽशक्तः मानवताविरोधिनमाचारं करोति। धनादिना असाध्यानि सर्वाणि अभीप्सितानि विद्यया अनायासेन सिद्धयन्ति अत उक्तम्—

विद्याधनं सर्वधनप्रधानम्

सर्वधनेभ्यः विद्याधनरूपप्राधान्ये अस्य वैचित्र्यमेव कारणम्। अन्यधनानि व्ययतः क्षयं यान्ति किन्तु विद्याधनम् व्ययतः संवर्द्धते।

अन्यधनानि संचयात् वर्धन्ते, विद्याधनं संचयान्नश्यति। अन्यानि धनानीव विद्याधनं चौरेण चोरयितुं न शक्यते, नापि राज्ञा हर्तुं शक्यते, नापि भ्रातृभिः संविभज्य ग्रहीतुं शक्यते, नापि अन्यधनराशिरिव विद्याधनं भारेण बाधते। उक्तं च—

अपूर्वः कोऽपि कोशोऽयं विद्यते तव भारति।
व्ययतो वृद्धिमायाति क्षयमायाति सञ्चयात्॥

अन्यदपि—

न चौर्यहार्यं न च राजहार्यं न भ्रातृभाज्यं न च भारकारि।
व्यये कृते वर्धत एव नित्यं विद्याधनं सर्वधनप्रधानम्॥

अन्यच्च—

वसुमतीपतिना न सरस्वती बलवता रिपुणापि न नीयते।
समविभागहरैर्न विभज्यते विबुधबोधबुधैरपि सेव्यते॥

विद्याबलेनैव कालिदासभवभूतिबाणप्रभृतयो विद्वांसो महर्षयः कवयश्च अमरा बभूवुः, ते स्वसरसपदावलीभिरधुनापि जीवन्ति। उक्तं च—

विद्ययाऽमृतमश्नुते। (श्रुतिः)

अन्यदपि—

जयन्ति ते सुकृतिनो रससिद्धाः कवीश्वराः।
नास्ति येषां यशःकाये जरामरणजं भयम्॥

राजानो महाराजा अपि विदुषामग्रे नमयन्ति स्वशिरांसि। उक्तं च—

विद्वत्त्वं च नृपत्वं च नैव तुल्यं कदाचन।
स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते॥

विद्यैव धर्मार्थकाममोक्षरूपपुरुषार्थ-चतुष्टय-प्राप्तिसाधनम्। यस्यायं क्रमः—

विद्या ददाति विनयं विनयाद्याति पात्रताम्।
पात्रत्वाद्धनमाप्नोति धनाद्धर्मं ततः सुखम्॥

मानवः विद्यया ब्रह्मज्ञानं प्राप्य मुक्तो भवति। किन्तु एतदप्यवधारणीयम् यत् क्रियान्वितैव विद्या संसिद्ध्यै कल्पते। क्रियाकलापरहिता विद्या निष्फला, तादृश्या विद्यया युक्तो विद्वानपि मूर्ख एव गण्यते। उक्तं च—

शास्त्राण्यधीत्यापि भवन्ति मूर्खा,
यस्तु क्रियावान् पुरुषः स विद्वान्।

तद्विद्याऽमृतं पातुं सततं सुखं तिरस्कृत्य, आलस्यं विहाय सततं गुरुं संसेव्य च सचेष्टो भवेत्। उक्तं च—

सुखार्थिनः कुतो विद्या कुतो विद्यार्थिनः सुखम्।
सुखार्थी चेत्त्यजेद्विद्यां विद्यार्थी चेत्त्यजेत्सुखम्॥

विद्यया मानवः विपुलां कीर्तिं धनञ्च लभते। आधुनिकयुगेऽपि कवीन्द्रो रवीन्द्रनाथ-ठाकुरः, जगदीशचन्द्रवसुः, राधाकृष्णश्चेत्यादयः भारतीयविद्वांसः जगति विपुलं यशः प्रभूतं धनं च लब्ध्वा देशस्य गौरवमवर्धयन्त। केनचित्कविना एकेनैव श्लोकेन सम्यक् विद्यामहत्त्वं प्रदर्शितम्—

मातेव रक्षति पितेव हिते नियुङ्क्ते
कान्तेव चाभिरमयत्यपनीय खेदम्।
लक्ष्मीं तनोति वितनोति च दिक्षु कीर्तिं
किं किं न साधयति कल्पलतेव विद्या॥ इति॥

६—बाणोच्छिष्टं जगत्सर्वम्

अस्ति कविसार्वभौमो वत्सान्वयजलधिकौस्तुभो बाणः।
नृत्यति यद्रसनायां वेधोमुखरंगलासिका वाणी॥ (पार्वतीपरिणये)

देव्याः सरस्वत्या वरदः पुत्रो महाकविबाणभट्टो संस्कृतगद्यलेखकेषु सर्वमूर्द्धाभिषिक्तः महामहिमशाली असाधारणप्रतिभासम्पन्नो महामेधावी चासीत्। स्वजीवनविषये स्ववंश-परिचयविषये अयं हर्षचरितस्यादौ विस्तरेण लिखितवान्। तथा हि—

'स बाल एव विधेर्बलवतो वशादुपसम्पन्नया व्ययुज्यत जनन्या।
जातस्नेहस्तु नितरां पितैवास्य मातृतामकरोत्॥ (हर्षचरिते)

'बाणभट्टस्य कालविषये कतिपयैः प्रमाणैर्निश्चीयते यदयं कान्यकुब्जाधिपस्य श्रीहर्ष-देवस्य सभापण्डित आसीत्। यतो हि—

'श्रीहर्ष इत्यवनिवर्तिषु पार्थिवेषु नाम्नैव केवलमजायत वस्तुतस्तु।
श्रीहर्ष एव निजसंसदि येन राज्ञा सम्पूजितः कनककोटिशतेन बाणः॥'

राजशेखरोऽप्येत्थं वदति—

> अहो प्रभावो वाग्देव्या यन्मातङ्ग-दिवाकरः ।
> श्रीहर्षस्याभवत्सभ्यः समो बाणमयूरयोः ॥'

अतो हर्षकालीन एव बाणभट्ट इति निर्विवादम् ॥

अयं कविपुङ्गवः शोणनदस्य पश्चिमे तटे प्रीतिकूटनाम्नि ग्रामे वात्स्यायनवंशे चित्रभानो राजदेव्यां समुत्पन्न इति निर्विवादं जानीमः। तदेतदीयहर्षचरितेन कादम्बरीगद्यस्योपक्रमश्लोकैश्च सुस्पष्टमवगम्यते ।

अयं महादेवोपासनायां पूर्णतया आग्रही बभूवेति सम्भावयामः, यतोऽयं हर्षभ्रात्रा कृष्णेनाहूतः श्रीहर्षसभायां प्रवेशाय प्रास्थानिकानि मङ्गलानि प्रत्युष्ठुवानो भगवन्तं विरूपाक्षमेव समादरेण पूजयाम्बभूव ।

तथाहि—

'देवदेवस्य विरूपाक्षस्य क्षीरस्नपनपुरःसरम् सुरभिकुसुमधूपगन्धध्वजबलिविलेपनप्रदीपकबहुलां विधाय पूजाम् ॥'

इत्यादि हर्षचरितस्य द्वितीयोल्लासे तेन स्वोपासनाचर्या स्वयमेव स्पष्टीकृतेति तत एवाधिकं कर्णेहत्य निरीक्षणीयम् ।

यत्तु—

> जाता शिखण्डिनी प्राग्यथा शिखण्डी तथावगच्छामि ।
> प्रागल्भ्यमधिकं माप्तुं वाणी बाणो बभूवेति ॥

पूर्वं यथा शिखण्डिनी द्रुपदपुत्री शिखण्डी-द्रुपदपुत्ररूपा बभूव तथा वाणी सरस्वत्यपि अधिकप्रागल्भ्यप्राप्त्यर्थं बाणवाणी-कादम्बरीकर्तृरूपा बभूव । 'करोम्याख्यायिकाम्भोधौ जिह्वाप्लवनचापलम्' इति हर्षचरितोक्तदिशा हर्षचरितस्याख्यायिकाग्रन्थरूपत्वं प्रतीतम् । नेदं साधारणं चरितपुस्तकमपि तु सरसं काव्यमिति वर्णनेषु सजीवतामानेतुमत्र प्रयासः कृतो वेद्यः। हर्षचरिते कवेर्वर्णनचातुरी बहुशोऽवलोक्यते। तेषु मुख्यत उल्लेख्याः प्रसङ्गाः सन्ति-मुमूर्षोर्नृपस्य प्रभाकरस्य वर्णनम्, वैधव्यदुःखपरिहाराय सतीत्वमाश्रयन्त्या यशोवत्या वर्णनम्, सिंहनादस्योपदेशः, दिवाकरमित्रस्य राज्यश्रीसान्त्वनम् । बाणस्य कादम्बरीवद् हर्षचरितस्यापि वर्णनशैली, कवित्वकलापूर्णवाग्धारा सहृदयानां मनः चमत्कृतं करोति । तद्यथा—"यस्मिंश्च राजनि निरन्तरैर्यूपनिकरैरङ्कुरितमिव कृतयुगेन, दिङ्मुखविसर्पिभिरध्वरधूमैः पलायितमिव कलिना, ससुधैः सुरालयैरिवावतीर्णमिव स्वर्गेण, सुरालयशिखरोद्धूयमानैर्धवलध्वजैः पल्लवितमिव धर्मेण···' 'स्थानेषु स्थानेषु च मन्दमन्दमास्फाल्यमानालिङ्ग्यकेन, शिञ्जानमञ्जुवेणुकेनानुतालानुवीणेन, कलकांस्यकोशीक्वणितकोलाहलेन समकालदीयमानानुतालतानकेनातोद्यवाद्येनाऽनुगम्यमानाः, परैपरे श्रवणक्षणितरवैरपि सहृदयैरिवानुवर्तमाना तालऽयाः कोकिला इव मदकलकाकलीकोमलालापिन्यः, विद्यानां

कर्णामृतान्यश्लीलरासकपदानि गायन्त्यः, कुङ्कुमप्रमृष्टरुचिरकायाः काश्मीरकिशोर्य इव वल्गन्त्यः······'

ऐतिहासिकांशं वर्जयित्वा सन्दर्भोऽयं सर्वथा काव्यलक्षणोपेतः। यदा वयं हर्षचरिते वेषभूषयोः आचारविचारयोः सेनासंस्थानस्य च वर्णनं पठामः, राज्यश्रियो विवाहावसरे शिल्पिभिः स्वानुरूपाणि यावन्ति भूषणानि समर्पितानि, रजकैश्च यादृशानि निबध्य रञ्जितानि वस्त्राणि प्रस्तुतानि तेषां वर्णनेन तात्कालिकी भारतीया सांस्कृतिकी स्थितिः करामलकवद् भासते।

कादम्बरी बाणभट्टस्य अद्वितीया द्वितीया रचना। कवेर्गरिमा कमनीयां कादम्बरीमेवाश्रित्याऽवतिष्ठते इत्यत्र नास्ति विप्रतिपत्तिर्विदुषाम्। पात्राणि खल्वत्र तावत्या सजीवतया चित्रितानि यथा तानि प्रत्यक्षदृश्यतामिव यान्ति। एकत्र पाठको यदि शबरसेनाप्रयाणं पठित्वा विस्मयाविष्टो जायते, जाबालेराश्रमं दृष्ट्वा स्तिमितान्तःकरणो भवति, तदाऽपरत्र स एव कादम्बर्या महाश्वेताया वा वर्णनं पठित्वा लोकान्त-समुपस्थित इवाच्छोदसरसो वर्णनं श्रुत्वा कुतुकाकुल इव सुधासिक्त इव च जायते। एकतो यदि शुकनासोपदेशमधीत्य हृदयं निर्मलदर्पणतां नयति, तदाऽपरत्र राजान्तःपुरवर्णनं श्रुत्वा हृदयं रञ्जयति। प्राकृतिकवस्तूनां वर्णनेऽपि बाणस्य कादम्बरी न कुतोऽपि हीयते। अत एवाह धर्मदास इत्थम्—

'रुचिरस्वरवर्णपदा रसभाववती जगन्मनो हरति।
सा किं तरुणी नहि नहि वाणी बाणस्य मधुरशीलस्य॥

अन्योऽपि कश्चिद्

'शब्दार्थयोः समो गुम्फः पाञ्चालीरीतिरुच्यते।
शिलाभट्टारिकावाचि बाणोक्तिषु च सा यदि॥

वस्तुतस्तु बाणस्य गद्यं महाविशालसप्तभूमराजप्रासादोपमम्, यत्र क्वचन प्रकोष्ठे रमणीयाकृतिविशिष्टपरिधानोपबृंहितं रमणीचित्रम्, क्वचिन्मृगयोपयुक्तनानाजीवस्य चित्राणि, क्वचित्कलकलनादिनी नदी चित्रिता, क्वचित्तपोभूमिर्निदर्शिता, क्वचिच्च निष्पतच्छरभीषणा रणभूमिरङ्किता। समासतः कानिचिदुदाहरणान्यत्र प्रस्तूयन्ते। अच्छोदसरोवरवर्णनं यथा—'प्रविश्य च तस्य तरुखण्डस्य मध्यभागे मणिदर्पणमिव त्रैलोक्यलक्ष्म्याः, स्फटिकभूमिगृहमिव वसुन्धरादेव्याः, निर्गमनमार्गमिव सागराणाम्, निस्यन्दमिव दिशाम्, अंशावतारमिव गगनतलस्य, कैलासमिव द्रवतामापन्नम्, तुषारगिरिमिव विलीनम्, चन्द्रातपमिव रसतामुपेतम्, हाराट्टहासमिव जलीभूतम······मदनध्वजमिव मकराधिष्ठितम्, मलयमिव चन्दनशिशिरवनम्, असत्साधनमिवादृष्टान्तम्, अतिमनोहरम्, आह्लादनं दृष्टेः, अच्छोदं नाम सरो दृष्टवान्।' सन्ध्यावर्णनं यथा—अनेन च समयेन परिणतो दिवसः। स्नानोत्थिते मुनिजनेनार्घविधिमुपपादयता यः क्षितितले दत्तस्तमम्बरतलगतः साक्षादिव रक्तचन्दनाङ्गरागं रविरुद्वहत्······उग्रतपसमृषिसार्थस्पर्शपरि-

जिहीर्षयेव संहृतपादः पारावतचरणपाटलरागो रविरम्बरतलादलम्बत ।...विहाय धरणितलमुन्मुच्य कमलिनीवनानि शकुनय इव दिवसावसाने तपोवनशिखरेषु पर्वताग्रेषु च रविकिरणाः स्थितिमकुर्वत ।' प्रभातवर्णनं यथा—एकदा तु प्रभातसन्ध्यारागलोहिते गगनतलकमलिनीमधुरक्तपक्षसंपुटे वृद्धहंस इव मन्दाकिनीपुलिनादपरजलनिधितटमवतरति चन्द्रमसि,......सन्ध्यामुपासितुमुत्तराशावलम्बिनि मानससरस्तीरमिवावतरति सप्तर्षिमण्डले,...इतस्ततः संचरत्सु वनचरेषु, विजृम्भमाणे श्रोत्रहारिणि पम्पासरःकलहंसकोलाहले,...क्रमेण च गगनतलमार्गमवतरतो दिवसकरवारणस्यावचूलचामरकलाप इवोपलक्ष्यमाणे मञ्जिष्ठरागलोहिते किरणजाले, शनैः शनैरुदिते भगवति सवितरि०' । जाबालिवर्णनं यथा—'स्थैर्येणाचलानां, गाम्भीर्येण सागराणां, तेजसा सवितुः, प्रशमेन तुषाररश्मेर्निर्मलतयाऽम्बरतलस्य संविभागमिव कुर्वाणम्,...शरत्कालमिव क्षीणवर्षम्, शन्तनुमिव प्रियसत्यव्रतम्, ...वाडवानलमिव सततपयोभक्षम्, शून्यनगरमिव दीनानाथविपन्नशरणम्, पशुपतिमिव भस्मपाण्डुरोमाश्लिष्टशरीरं भगवन्तं जाबालिमपश्यम्' । कादम्बरीवर्णनं यथा—पृथिवीमिव समुत्सारितमहाकुलभूभृद्व्यतिकरा शेषभोगेषु निषण्णाम्, गौरीमिव श्वेतांशुकरंचितोत्तमाङ्गाभरणाम, इन्दुमूर्तिमिवोद्दाममन्मथविलासगृहीतगुरुकलत्राम्, आकाशकमलिनीमिव स्वच्छाम्बरदृश्यमानमृणालकोमलोरुमूलाम्, कल्पतरुलतामिव कामफलप्रदाम्,...कादम्बरीं ददर्श ।'

विषयानुरूपमेव बाणस्य शब्दावल्यपि विलोक्यते । यथा विन्ध्याटवीवर्णने ओजःसमासभूयस्त्वम् । 'उन्मदमातङ्गकपोलस्थलगलितसलिलसिक्तेनेवानवरतमेलावनेन मदगन्धिनान्धकारिता, प्रेताधिपनगरीव सदासन्निहितमृत्युभीषणा महिषाधिष्ठिता च, कात्यायनीव प्रचलितखड्गभीषणा रक्तचन्दनालंकृता च ।' वसन्तवर्णनावसरे मृदुलामतिकोमलाञ्च पदावलीं प्रयुङ्क्ते । यथा—'कोमलमलयमारुतावतारतरङ्गितानङ्गध्वजांशुकेषु, मधुकरकुलकलङ्ककालीकृतकालेयककुसुमकुड्मलेषु, मधुमासदिवसेषु ।'

बाणस्य कादम्बर्यां उपमारूपकोत्प्रेक्षाश्लेषविरोधाभासपरिसंख्यैकावल्यादयोऽलंकाराः पदे पदे प्राप्यन्ते । उदाहरणरूपेण कतिचनोद्धरणानि प्रस्तूयन्ते । एकावली यथा महाश्वेताजन्मवर्णने—'क्रमेण च कृतं मे वपुषि वसन्त इव मधुमासेन, मधुमास इव नवपल्लवेन, नवपल्लव इव कुसुमेन, कुसुम इव मधुकरेण, मधुकर इव मदेन नवयौवनेन पदम् ।' परिसंख्या यथा जाबाल्याश्रमवर्णने—'यत्र च मलिनता हविर्धूमेषु न चरितेषु, मुखरागः शुकेषु न कोपेषु, तीक्ष्णता कुशाग्रेषु न स्वभावेषु, चञ्चलता कदलीदलेषु न मनःसु, चक्षूरागः कोकिलेषु न परकलत्रेषु,...मेखलाबन्धो व्रतेषु नेर्ष्याकलहेषु...रामानुरागो रामायणेन न यौवनेन, मुखभङ्गविकारो जरया न धनाभिमानेन । 'यत्र च महाभारते शकुनिवधः, पुराणे वायुप्रलपितं, शिखण्डिनां नृत्यपक्षपातो, भुजङ्गमानां भोगः, कपीनां श्रीफलाभिलाषः, मूलानामधोगतिः ।' परिसंख्या यथा शूद्रकवर्णने—'यस्मिंश्च राजनि जितजगति पालयति महीं चित्रकर्मसु वर्णसंकराः, रतेषु केशग्रहाः, काव्येषु दृढबन्धाः,

शास्त्रेषु चिन्ता'। उत्प्रेक्षा यथा सन्ध्यावर्णने—'अपरसागराम्भसि पतिते दिनकरे पतनवेगोत्थितमम्भःसीकरनिकरमिव तारागणमम्बरमधारयत्'। श्लेषो यथा सन्ध्यावर्णने-'क्रमेण च रविरस्तमुपागत इत्युदन्तमुपलभ्य जातवैराग्यो धौतदुकूलवल्कलधवलाम्बरः सतारान्तःपुरः पर्यन्तस्थिततनुतिमिरतमालवनलेखं सप्तर्षिमण्डलाध्युषितम् अरुन्धतीसंचरणपवित्रम् उपहिताषाढम् आलक्ष्यमाणमूलम् एकान्तस्थितचारुतारकमृगम् अमरलोकाश्रमिव गगनतलम्'''अमृतदीधितिरध्यतिष्ठत्'। श्लेषो यथा राजभवनवर्णने—'उत्कृष्टकविगद्यमिव विविधवर्णश्रेणिप्रतिपाद्यमानाभिनवार्थसंचयम्, नाटकमिव पताकाङ्कशोभितम्, पुराणमिव विभागावस्थापितसकलभुवनकोशम्, व्याकरणमिव प्रथममध्यमोत्तमपुरुषविभक्तिस्थितानेकादेशकारकाख्यातसंप्रदानक्रियाव्ययप्रपंचसंस्थितम्'। विरोधाभासो विन्ध्याटवीवर्णने··'अपरिमितबहुलपत्रसंचयापि सप्तपर्णोपशोभिता, क्रूरसत्त्वापि मुनिजनसेविता, पुष्पवत्यपि पवित्रा'। उपमा यथा विन्ध्याटवीवर्णने—'चन्द्रमूर्तिरिव सततमृक्षसार्थानुगता हरिणाध्यासिता च, जानकीव प्रसूतकुशलवा निशाचरपरिगृहीता च।' विरोधाभासो यथा शबरसेनापतिवर्णने—'अभिनवयौवनमपि क्षपितबहुवयसम्, कृष्णमप्यसुदर्शनम्, स्वच्छन्दचारमपि दुर्गैकशरणम्'। श्लेषमूलोपमा तथा चाण्डालकन्यावर्णने—'नक्षत्रमालामिव चित्रश्रवणाभरणभूषिताम्, मूर्च्छामिव मनोहारिणीम्, दिव्ययोषितमिवाकुलीनाम्, निद्रामिव लोचनग्राहिणीम्, अमूर्त्तामिव स्पर्शवर्जिताम्'। विरोधाभासो यथा शूद्रकवर्णने—'आयतलोचनमपि सूक्ष्मदर्शनम्, महादोषमपि सकलगुणाधिष्ठानम्, कुपतिमपि कलत्रवल्लभम्, अत्यन्तशुद्धस्वभावमपि कृष्णचरितम्'।

अयं बाणो यत्र दीर्घसमासां वाक्यावलिं विन्यस्य पाठकानां पुरतो वर्णनबाहुल्यरूपमुपस्थापयति तत्रैव लघुवाक्यानां प्रयोगेऽपि न मन्दायते। कपिञ्जलः पुण्डरीकं कामपीडितमुपदिशति—

"नैतदनुरूपं भवतः। क्षुद्रजनक्षुण्ण एष मार्गः। धैर्यधना हि साधवः। किं यः कश्चित्प्राकृत इव विक्लवीभवन्तमात्मानं न रुणत्सि? क्व ते तद् धैर्यम्, क्वासाविन्द्रियजयः।

एवमेव शुकनासोपदेशे लक्ष्मीस्वरूपवर्णने—'न परिचयं रक्षति। नाभिजनम् ईक्षते। न रूपमालोकयते। न कुलक्रममनुवर्तते। न शीलं पश्यति। न वैदग्ध्यं गणयति। न श्रुतमाकर्णयति। न धर्ममनुरुध्यते। न त्यागमाद्रियते। न विशेषज्ञतां विचारयति।'

एवमेव जाबालिवर्णने—'प्रवाहः करुणरसस्य, संतरणसेतुः संसारसिन्धोः, आधारः क्षमाम्भसाम्,'' सागरः सन्तोषामृतस्य, उपदेष्टा सिद्धिमार्गस्य,'' सखा सत्यस्य, क्षेत्रम् आर्जवस्य, प्रभवः पुण्यसंचयस्य०।'

भाषासमृद्धिमालोक्यैव पाश्चात्या बाणस्य कादम्बरीमरण्यानीं मन्वते। तेषां मते बाणस्य गद्यं खलु तद्भारतीयमरण्यं यत्र क्षुपोच्छेदं विना मार्गो दुर्लभः, यत्र च बहवः अप्रतीतार्थाः शब्ददन्दशूकास्तत्र प्रविविक्षून् प्रतीक्षमाणाः निलीय स्थिताः। उक्तं च—

'आः सर्वत्र गभीरधीरकविता-विन्ध्याटवी-चातुरी-
संचारी करिकुम्भिकुम्भभिदुरो बाणस्तु पञ्चाननः ॥

अत एवेयमुक्तिः सम्यक् घटते—

'बाणोच्छिष्टं जगत् सर्वम्' ।

७—सत्सङ्गतिः कथय किं न करोति पुंसाम्

सतां सज्जनानां सङ्गतिः संपर्कः मानवेषु गुणोत्कर्षाय परमश्रेष्ठं वस्त्वस्तीति कवि-प्रवरस्याशयः । यथा काञ्चनसंसर्गे काचोऽपि मारकतीं द्युतिं धत्ते, पद्मपत्रस्थितं तोयमपि मुक्ताफलश्रियम् , तथैव गुणिजनसंसर्गात् मूर्खोऽपि जनः गुणवान् जायते । अतः सत्य-मुक्तं कविना—

काचः काञ्चनसंसर्गाद्धत्ते मारकतीर्द्युतीः ।
तथा सत्सन्निधानेन मूर्खो याति प्रवीणताम् ॥

संसर्गशीलो मानवः । सर्वं हि चेतनाचेतनेषु संसर्गप्रभावमध्यक्षयामः । प्रतिदिनं पश्यामोऽङ्गारागारं श्राम्यतो जनस्य वासांसि कच्चराणि भवन्ति । शौण्डिकीहस्ते पयोऽपि वारुणीत्यभिधीयते लोकेन । अलोहितोऽपि मणिरुपाश्रयवशाल्लोहितः प्रतीयते लौहितीक इति चोच्यते । सत्यमुक्तम्—

यादृशो यस्य संसर्गो भवेत्तद्गुणदोषभाक् ।
अयस्कान्तमणेर्योगादयोऽप्याकर्षको भवेत् ॥

वस्तुतः सत्सङ्गवशादेव मानवः समुन्नतो भवति । सतां संसर्गेण जनः सज्जनः भवति, दुर्जनानां सम्पर्केण च दुर्जनः । उक्तं च—

संसर्गजा दोषगुणा भवन्ति ।

अतएव जनेन सर्वदा सतामेव सङ्गतिविधेया । उक्तमपि—

सद्भिरेव सहासीत सद्भिः कुर्वीत सङ्गतिम् ।
सद्भिर्विवादं मैत्रीञ्च नासद्भिः किञ्चिदाचरेत् ॥

सज्जनानां संसर्गेण पुरुषस्य मान उन्नमति, पुण्ये रुचिरुदेति, पापाच्चोद्विजते मनः । कामक्रोधादयो मदमात्सर्यादयश्च दिशो विदिशश्च भजन्ते । तेनास्य चेतः प्रसीदति, कृत्येषु च विहितेषु विस्रब्धं प्रवर्तते । उक्तं च सत्सङ्गतिफलं केनापि कविना—

पापान्निवारयति योजयते हिताय,
गुह्यं निगूहति गुणान् प्रकटीकरोति ।
आपद्गतं च न जहाति ददाति काले
सत्सङ्गतिः कथय किं न करोति पुंसाम् ॥

किञ्च—

कल्पद्रुमः कल्पितमेव सूते सा कामधुक् कामितमेव दोग्धि ।
चिन्तामणिश्चिन्तितमेव दत्ते सतां तु सङ्गः सकलं प्रसूते ॥

अतः सज्जनानां सङ्गतिरेव समुपास्या। तेन जनः प्रख्यायते च लोके नाभ्याख्यायते, उद्गीयते नावगीयते, विश्वस्यते न त्वभिशङ्क्यते। सुजनो हि विमलधीर्भवति, साधु चिन्तयति, व्यथितोऽपि सत्यं न जहाति, नानृतं ब्रवीति। यदि सुजनैः संसृज्यते तर्हि क्रमेणात्मानं परिष्करोति। हीनोऽपि जनः सत्संसर्गवशात् महान् जायते, चौरोऽपि परोपकारप्रवणो भवति। वाल्मीकिसदृशाः सत्संसर्गवशान्मुनिवृत्तिपरा महर्षयोऽभूवन्। श्रीविवेकानन्दस्य महाभागस्य वृत्तान्तः कस्य न परिचितः साक्षरस्यैतद्देशजस्य। एवमेव असत्संसर्गेण मानवोऽपि दानवो भवति। विविधविद्याभूषितोऽपि सत्कुलीनोऽपि सकलगुणालङ्कृतोऽपि निन्दनीयतां व्रजति। साधुभिः समवहेल्यते। उक्तं च—

असतां सङ्गदोषेण को न याति रसातलम्।

किञ्च—

हीयते हि मतिस्तात हीनैः सह समागमात्।
समैश्च समतामेति विशिष्टैश्च विशिष्टताम्॥

अतः सद्भिरेषणीयः संसर्गोऽसद्भिश्च परिहरणीयः। परं सत्सङ्गतिः कथमपि पुण्येन भवति। यदा च भवति तदा महते कल्याणाय कल्पते। कविवरैः सत्सङ्गतेर्माहात्म्यवर्णनं मुक्तकण्ठं कृतमवलोक्यते। तद्यथा—

जाड्यं धियो हरति सिञ्चति वाचि सत्यम्
मानोन्नतिं दिशति पापमपाकरोति।
चेतः प्रसादयति दिक्षु तनोति कीर्तिम्
सत्सङ्गतिः कथय किं न करोति पुंसाम्॥

वेदेऽपि च सत्सङ्गतेर्महती प्रशंसा कृताऽवलोक्यते।

शुक्रोऽसि भ्राजोऽसि स्वरसि ज्योतिरसि।
आप्नुहि श्रेयांसमतिसमं क्राम॥ अ० वेदे॥

येषां चित्ते सत्सङ्गप्रणयिनी वृत्तिः अनवरतं जागर्ति ते स्वजीवने कल्याणकल्पद्रुमामृतमयं रसं रसयन्ति, ते एव सर्वदा जनैः पुष्पमालाधानैः सम्मान्यन्ते। अत एव आत्मकल्याणाभिलाषुकेण जनेन सदा सर्वदा सत्सङ्गतिरेवोपास्या। सत्सङ्गतेर्गुणगणान् गायं गायमनेकैः कवीश्वरैः स्वीया काव्यकला निर्मलीकृता—

सन्तप्तायसि संस्थितस्य पयसो नामापि न श्रूयते
मुक्ताकारतया तदेव नलिनीपत्रस्थितं राजते।
स्वात्यां सागरशुक्तिसंपुटगतं तज्जायते मौक्तिकम्
प्रायेणाधममध्यमोत्तमगुणः संसर्गतो जायते॥

किञ्च—

गङ्गेवाघविनाशनी जनमनःसन्तोषसच्चन्द्रिका
तीक्ष्णांशोरपि सत्प्रभेव जगदज्ञानान्धकारापहा।

छायेवाखिलतापनाशनकरी स्वर्धेनुवत् कामदा
पुण्यैरेव हि लभ्यते सुकृतिभिः सत्सङ्गतिर्दुर्लभा ॥

यथा- निष्कल्मषाणां सौजन्यशालिनां धर्मानुरागिणां सन्निधिरुपकरोति लोकस्य न तथेतरत् किञ्चित् । सत्सङ्गतिविधानेनानेन निर्धूतसकलकल्मषाः शुद्धान्तःकरणा मानवा यशसः कीर्तेश्च पराकाष्ठां गच्छन्तो जन्मसाफल्यं भजन्ते । किं बहुना—

वरं गहनदुर्गेषु भ्रान्तं वनचरैः सह ।
न दुष्टजनसम्पर्कः सुरेन्द्रभवनेष्वपि ॥

अतः सत्सङ्ग एवोपादेयः हेयश्च कुसङ्गः ।

८—कारुण्यं भवभूतिरेव तनुते

भवभूतेः सम्बन्धाद् भूधरभूतेव भारती भाति ।
एतत्कृतकारुण्ये किमन्यथा रोदिति ग्रावा ॥ (गोवर्द्धनाचार्यः)

संस्कृतभाषायां नाटकानां प्रणेतृषु प्रधानान्यतमस्य भवभूतेर्वास्तविकं नाम श्रीकण्ठ इत्यासीत् । 'गिरिजायाः स्तनौ वन्दे भवभूतिसिताननौ' इति पद्यप्रणयनमूलकमस्य भवभूतिनाम्ना प्रथनं श्रूयते । विदर्भदेशवासी श्रोत्रियविप्रवंशश्चायं विविधागमशास्त्रपारदृश्वाऽऽसीत् ।

हर्षचरिते बाणभट्टः भवभूतेर्नाम कीर्त्तयति । अष्टमशतकोत्पन्नो वामनश्च तदीयग्रन्थतः स्वग्रन्थे उदाहरणं ददाति । राजशेखरोऽपि भवभूतिं स्वपूर्वभवं प्रख्यापयति —

'स्थितः पुनर्यो भवभूतिरेखया स राजते सम्प्रति राजशेखरः ।'

राजतरङ्गिण्याम्—

'कविर्वाक्पतिराजश्रीभवभूत्यादिसेवितः ।
जितो ययौ यशोवर्मा तद्गुणस्तुतिवन्दिताम् ॥'

इति निर्दिशन् कल्हणो भवभूतेर्यशोवर्मकालिकतां प्रत्येति, यशोवर्मा च ७३६ मिते ख्रीष्टाब्दे म्रियते स्म । एभिः साक्ष्यैर्भवभूतेः समयः सप्तमशतकासन्नः प्रतिपन्नः ।

अस्य पिता नीलकण्ठः, माता च जातुकर्णी विदर्भराज्ये पद्मपुरेऽयं कविरासीत् । कान्यकुब्जस्य यशोवर्मणः सभायामयमासीत् । पण्डितप्रकाण्डो यजुर्वेदी चायम् । अयं कश्यपगोत्रीयः कुमारिलस्य शिष्यश्चासीत् । करुणरससमावेशोऽस्यातितरं साधारण्यं सामर्थ्यम् । एतत्कृत उत्तररामचरिते—

'एको रसः करुण एव निमित्तभेदाद्
भिन्नः पृथक् पृथगिव श्रयते विवर्तान् ।
आवर्तबुद्बुदतरङ्गमयान् विकारा
नम्भो यथा सलिलमेव हि तत्समस्तम् ॥

इत्यादिना श्लोकेन प्रतीयते ।

उत्तररामचरिते तु करुणरसः पराकाष्ठां गत इव प्रतिभाति । तद्यथा—

हा हा देवि स्फुटति हृदयं स्रंसते देहबन्धः
शून्यं मन्ये जगदविरतज्वालमन्तर्ज्वलामि ।
सीदन्नन्धे तमसि विधुरो मज्जतीवान्तरात्मा
विष्वङ्मोहः स्थगयति कथं मन्दभाग्यः करोमि ॥

करुणरसप्रवाहपरीक्षया परीक्ष्यते तर्हि नाटकत्रयमस्य उत्तररामचरितमेव सर्वातिशायि । यथाऽत्र कारुण्यरसनिस्यन्दो, न तथाऽन्यत्र । अत्रोदाहरणरूपेण कतिचनोद्धरणानि प्रस्तूयन्ते ।

उत्तररामचरितस्य प्रथमेऽङ्के आदावेव पितृवियोगविषण्णां जानकीं दाशरथिः आश्वासयति । गृहस्थधर्मस्य विघ्नव्याप्तत्वं व्याचष्टे । 'संकटा ह्याहिताग्नीनां प्रत्यवायैर्गृहस्थता ।' विषण्णां जानकीमाश्वासयति—'क्लिष्टो जनः किल जनैरनुरञ्जनीयस्तन्नो यदुक्तमशिवं नहि तत्क्षमं ते ।' प्रियवियोगजन्मा दुःखाग्निः कथं पीडयति मानसमिति व्याहरति—'दुःखाग्निर्मनसि पुनर्विपच्यमानो हृन्मर्मव्रण इव वेदनां तनोति ।' रामस्य विक्लवत्वं विलोक्य ग्रावाणोऽप्यरुदन् । 'अथेदं रक्षोभिः कनकहरिणच्छद्मविधिना, तथा वृत्तं पापैर्व्यथयति यथा क्षालितमपि । जनस्थाने शून्ये विकलकरणैरार्यचरितैरपि ग्रावा रोदित्यपि दलति वज्रस्य हृदयम् ।' यदैव रामबाहुलतोपधायिनी सीता निर्भयं स्वपिति, तावदेव जनप्रवादजन्यो विषमो विषादहेतुर्विप्रयोगः समुपतिष्ठते । 'हा हा धिक् परगृहवासदूषणं यद् , वैदेह्याः प्रशमितमद्भुतैरुपायैः । एतत्तत्पुनरपि दैवदुर्विपाकादालर्कं विषमिव सर्वतः प्रसृप्तम् ।' जानकीसहवासं स्मरन् रामोऽभिधत्ते—'चिराद् वेगारम्भी प्रसृत इव तीव्रो विषरसः, कुतश्चित् संवेगात् प्रचल इव शल्यस्य शकलः । व्रणो रूढग्रन्थिः स्फुटित इव हृन्मर्मणि पुनः पुराभूतः शोको विकलयति मां नूतन इव ।' रामः स्वावस्थां वर्णयति—'दलति हृदयं शोकोद्वेगाद् द्विधा तु न भिद्यते, वहति विकलः कायो मोहं न मुञ्चति चेतनाम् । ज्वलयति तनूमन्तर्दाहः करोति न भस्मसात् , प्रहरति विधिर्मर्मच्छेदी न कृन्तति जीवितम् ।' सीता करुणस्य मूर्तिरस्ति, दीर्घशोकः शरीरं शोषयति । 'करुणस्य मूर्तिरथवा शरीरिणी, विरहव्यथेव वनमेति जानकी ।' 'किसलयमिव मुग्धं बन्धनाद् विप्रलूनं, हृदयकमलशोषी दारुणो दीर्घशोकः । ग्लपयति परिपाण्डु क्षाममस्याः शरीरं, शरदिज इव घर्मः केतकीगर्भपत्रम् ।' रामं दुःखाग्निरुत्पीडयति । 'अन्तर्लीनस्य दुःखाग्नेरद्योद्दामं ज्वलिष्यतः । उत्पीड इव धूमस्य, मोहः प्रागावृणोति माम् ।' वासन्ती रामं पृच्छति यत्—'अयि कठोर यशः किल ते प्रियं, किमयशो ननु घोरमतः परम् । किमभवद् विपिने हरिणीदृशः, कथय नाथ कथं बत मन्यसे ।' रामः सशोकमुत्तरति । 'त्रस्तैकहायनकुरङ्गविलोलदृष्टेस्तस्याः परिस्फुरितगर्भभरालसायाः । ज्योत्स्नामयीव मृदुबालमृणालकल्पा, क्रव्याद्भिरङ्गलतिका नियतं विलुप्ता ।' सीतापरित्यागविषण्णो रामः रोदितितराम् । 'न किल भवतां देव्याः स्थानं गृहेऽभिमतं ततस्तृणमिव वने शून्ये त्यक्ता न चाप्यनु-

शोचिता । चिरपरिचितास्ते ते भावास्तथा द्रवयन्ति माम्, इदमशरणैरद्यास्माभिः प्रसीदत रुद्यते ।' पूर्वकृतकर्मजं दुःखं दुर्निवारम् । 'सोढश्चिरं राक्षसमध्यवासस्त्यागो द्वितीयस्तु सुदुःसहोऽस्याः । को नाम पाकाभिमुखस्य जन्तुर्द्वाराणि दैवस्य पिधातुमीष्टे ।' जानकी-परित्यागाद् राम आत्मानं दयापात्रं न मनुते । 'जनकानां रघूणां च, यत् कृत्स्नं गोत्र-मङ्गलम् । तत्राप्यकरुणे पापे, वृथा वः करुणा मयि ।' प्रियावियोगे जगदतितरां दुःखायैव भवति— जगज्जीर्णारण्यं भवति च कलत्रे ह्युपरते, कुकूलानां राशौ तदनु हृदयं पच्यत इव ।' प्रियानाशे जगदरण्यमिव प्रतीयते । 'विना सीता देव्या किमिव हि न दुःखं रघुपतेः, प्रियानाशे कृत्स्नं किल जगदरण्यं भवति ।' संबन्धिवियोगजानि दुःखानि प्रियजनदर्शने नितरां वर्धन्ते । 'सन्तानवाहीन्यपि मानुषाणां, दुःखानि संबन्धिवियोग-जानि । दृष्टे जने प्रेयसि दुःसहानि, स्रोतः सहस्रैरिव संप्लवन्ते ।' अत एव सत्यमुक्तम्—कारुण्यं भवभूतिरेव तनुते ।

कालिदास-भवभूत्योस्तुलना—उभावपि कवीश्वरौ संस्कृतसाहित्यस्य मूर्द्धाभिषिक्तौ नाट्यकारौ । कालिदासः शृङ्गाररसस्य आचार्यः भवभूतिश्च करुणरसस्य । उभावपि स्वविषये निरुपमौ नाट्यकलाकारौ । कालिदासस्य रचनायां कल्पनावृत्तिरेव मुख्या, भवभूतेः रचनायामभिधावृत्तिरेव मुख्या । कालिदासस्य सर्वमपि वाक्यं प्रायः लक्ष्यव्यङ्ग्यार्थ-योर्बोधकं वर्तते । यथा शकुन्तलामवलोक्य दुष्यन्तः 'अये लब्धं नेत्रनिर्वाणम् ।' अत्र नेत्रनिर्वाणजन्यरसास्वादो वाचकसामाजिकानुभवगम्यः । भवभूतेस्तु पदेऽनुभवोऽपि वाच्यत्वेन स्पष्टतरा सहृदयानां तादृग् हृदयङ्गमः यथा मालतीविषये माधवः—

'अविरलमिव दाम्ना पौण्डरीकेण बद्धः
स्नपित इव च दुग्धस्रोतसा निर्भरेण ।

अत्र चक्षुर्दर्शनजन्यानुभवस्य कविनैव स्पष्टशब्दैर्वर्णनाद्वाच्यतया तादृक् सामाजिका-नुभवगम्यत्वम् ।

यत्र कालिदासः प्रकृतेर्ललितं कोमलं च पक्षं स्वकविताया विषयतां नयति तत्र भवभूतिः प्रकृतेर्विकटमुग्रं चांशं स्वकविताया विषयतां प्रापयति । कालिदासः—

कार्या सैकतलीनहंसमिथुना स्रोतोवहा मालिनी
पादास्तामभितो निषण्णहरिणा गौरीगुरोः पावनाः ।'

इति वर्णयति तत्र भवभूतिः—

निष्कूजस्तिमिताः क्वचित्क्वचिदपि प्रोच्चण्डसत्त्वस्वनाः
स्वेच्छासुप्तगभीरभोगभुजगश्वासप्रदीप्ताग्नयः ।
सीमानः प्रदरोदरेषु विलसत्स्वल्पाम्भसो या स्वयं
तृष्यद्भिः प्रतिसूर्यकैरजगरस्वेदद्रवः पीयते ॥

कालिदासस्य रामः सत्यपि दृढे सीतानुरागे लोकाचारं पालयति, परं लोकाचार-पालनप्रवृत्तेः पूर्वं दोलाचलचित्तवृत्तित्वं प्रतिपद्यते—

'किमात्मनिर्वादकथामुपेक्षे सीतामदोषामुत सन्त्यजामि ।
इत्येकपक्षाश्रयविक्लवत्वादासीद् स दोलाचलचित्तवृत्तिः ॥'

भवभूतेस्तु रामः किमप्यविचार्यैव कर्त्तव्यमवधारयति, बाढं तेन स्वाचरणेनाजीवनं पुटपाकप्रतीकाशं सन्तापमनुभवति—

'स्नेहं दयां च सौख्यं च यदि वा जानकीमपि ।
आराधनाय लोकस्य मुञ्चतो नास्ति मे व्यथा ॥'

गुणगौरवेण भवभूतेरन्यद्रूपकद्वयमतिक्रम्य वर्तते तदीयमुत्तररामचरितमित्युक्तमपि केनचित्—'उत्तरे रामचरिते भवभूतिर्विशिष्यते।' अत्र नाटके पात्राणां चरित्राणि नितान्तोज्ज्वलानि चित्रितानि। यद्यपि कतिपये समालोचका अत्रापि क्रियावेगस्याभावं कथयन्ति परन्तु तन्नात्र तथा प्रकटम्। अन्तिमाङ्के भवभूतिना यो नाटकान्तरसमावेशः कृतस्स तु कालिदासकृतीनामपि मुखं मलिनयति ।

९—धर्मे सर्वं प्रतिष्ठितम्

धर्मो हि नाम इन्द्रियविषयप्राप्तिजन्यां क्षणिकां सन्तुष्टिमनपेक्ष्य वस्तुत आत्मकल्याणसाधनस्याऽऽचरणम्। 'यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः' इति काणादाः। अभ्युदयः लौकिकोन्नतिः निःश्रेयसश्च पारलौकिकी सिद्धिः। शास्त्रकारैः धर्मस्य विविधानि लक्षणानि कृतानि दृश्यन्ते, तद्यथा—

चोदनालक्षणो धर्मः इति जैमिनिः ।
यस्त्वार्याः क्रियमाणं प्रशंसन्ति स धर्मः ।
यद्गर्हन्ते सोऽधर्मः । इत्यापस्तम्बाचार्याः ।

भगवान् मनुः धर्मस्य लक्षणमाह—

'वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः ।
एतच्चतुर्विधं प्राहुः साक्षाद्धर्मस्य लक्षणम् ॥

धारणाद् धर्म इत्याहुः। इदं च कालत्रयेऽप्यबाधं वचः। धर्मो द्विविधः—वास्तविकस्तत्साधनरूपश्च। तत्र वास्तविकः धर्मः सर्वकालेषु सर्वदेशेषु च समानः। धृतिः क्षमा शमो दानमहिंसा सत्यमित्यादिरूपो धर्मः वास्तविकः धर्मोऽस्ति। द्वितीयः पुनस्तत्तद्देशकालाद्युपाधिभेदेन भिद्यते। परम्परागतः सम्प्रदायगतः कर्मकाण्डरूपः द्वितीयस्तु। यथा तत्तत्प्रकारेण सन्ध्याविधिः, तत्तत्तीर्थयात्रा इत्यादि ।

ऐहिकामुष्मिकसुखसाधनं मनुष्यस्य च परमः सखा यत्खलु धर्मानुष्ठानम्। धर्मेणैव सुखमेधते। एष एव पशुमनुष्ययोर्भेदो यत्पशवस्तत्तदिन्द्रियवशानुगा हि प्रतिक्षणं व्यवहरन्ति। उक्तं च—

आहारनिद्राभयमैथुनं च सामान्यमेतत् पशुभिर्नराणाम् ।
धर्मो हि तेषामधिको विशेषो धर्मेण हीनाः पशुभिः समानाः ॥

सत्यप्येवं साधारणाः पामरा मानवाः पशुनिर्विशिष्टा एव निजव्यवहारेषु। केचिदेव बुद्धिमन्तः।

वाताभ्रविभ्रममिदं वसुधाधिपत्य-
मापातमात्रमधुरो विषयोपभोगः।
प्राणास्तृणाग्रजलबिन्दुसमा नराणां
धर्मः सखा परमहो परलोकयाने॥

इह जगति सर्वेषामेव प्राणिनामियं स्वाभाविकयभिवाञ्छा यत्कथमपि सुखमधिगच्छाम इति। जनानां सर्वेऽपि यत्नाः तस्यैव लाभाय भवन्ति। सुखाभिलाषेणैव केचिन्मानवा अर्थोपार्जनमेव तत्साधनं मन्यमानास्तदासादनार्थं प्रयतन्ते। ते हि सर्वप्रकारकैर्न्याय्यैर-न्याय्यैर्वा साधनैः सुखमासिसादयिषवो परधनहरणाद्यपि नानुचितं मन्यन्ते। परं ते सुखं नाधिगच्छन्ति। ते शान्तिमप्राप्य 'अशान्तस्य कुतः सुखम्' इति न्यायेन सुखम-नधिगत्यैव तिष्ठन्ति। तदत्र किं निदानमिति मीमांसायामेतदेव वक्तव्यं यत् धर्मस्याज्ञानमेव तत्कारणम्। धर्मे मतिः दुर्लभा भवति। अल्पीयांस एव जना धर्मं प्रति बद्धादरा दृश्यन्ते। सत्यमेवोक्तं केनापि अभियुक्तेन—

मानुष्ये सति दुर्लभा पुरुषता पुंस्त्वे पुनर्विप्रता
विप्रत्वे बहुविद्यताऽतिगुणता विद्यावतोऽर्थज्ञता।
अर्थज्ञस्य विचित्रवाक्यपटुता तत्रापि लोकज्ञता
लोकज्ञस्य समस्तशास्त्रविदुषो धर्मे मतिर्दुर्लभा॥

प्रायशः सांसारिक-क्षणिक-सुखानुरक्तानामेवं प्रतीयते यद्धर्माचरणमतीव कष्टसाध्यं भवति। विमूढधियोऽनेके प्रमादग्राहगृहीता न धार्मिककार्यं सम्पादयितुं शक्नुवन्ति। ते एवं व्याजह्रुः—

जानामि धर्मं न च मे प्रवृत्तिर्जानाम्यधर्मं न च मे निवृत्तिः।
केनापि देवेन हृदि स्थितेन यथा नियुक्तोऽस्मि तथा करोमि॥

कालिदासोऽपि शाकुन्तले निगदति—

'सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः।'

परन्तु अन्धःकरणमपि यदा तमःस्तोमाच्छादितं भवति तदपि अन्धदर्पणमिव न यथार्हं रूपं प्रतिबिम्बीकरोति, तदा किं करणीयमिति प्रश्नः उदेति। तत्राह बोधाय-नाचार्यः—

धर्मशास्त्ररथारूढा वेदखड्गधरा द्विजाः।
क्रीडार्थमपि यद् ब्रूयुः स धर्मः परमः स्मृतः॥

वास्तविकं तु सुखसाधनं धर्म एव। यतः श्रूयते तैत्तिरीये—

'धर्मो विश्वस्य जगतः प्रतिष्ठेति।'

दूरदर्शिनः तात्कालिकं क्षणिकम् इन्द्रियतृप्तिजन्यं सुखं तिरस्कृत्य पारमार्थिकं सुखमेवेप्सन्तस्तदधिगत्यै एव प्रयत्नपरा भवन्ति । ते एव विजयिनो भवन्ति खलु संसारसंघर्षे। दूरदर्शिनः परोक्षं सुखमेव स्वलक्ष्यं मन्यन्ते । मूढाः प्रत्यक्षमेव क्षणिकं तात्कालिकं सुखमाद्रियन्ते । तदत्रैषा श्रुतिर्भवति—

अन्यच्छ्रेयोऽन्यदुतैव प्रेय-
स्ते उभे नानार्थे पुरुषᳬं सिनीतः ।
तयोः श्रेय आददानस्य साधु भवति
हीयतेऽर्थाद्य उ प्रेयो वृणीते ॥
श्रेयश्च प्रेयश्च मनुष्यमेत-
स्तौ सम्परीत्य विविनक्ति धीरः ।
श्रेयो हि धीरोऽभि प्रेयसो वृणीते
प्रेयो मन्दो योगक्षेमाद् वृणीते ॥

विदुषां हि दृष्टौ नहि ऐहिकवस्तुषु महत्त्वम्, अपितु आत्मकल्याणसाधने धर्माचरण एव । इह खलु विचित्रचरित्रचित्रिते जगति ये धनसम्पन्नास्ते पुत्राभावेन दुःखिनः, ये सन्ततिमन्तो ते धनाभावेन दुःखिताः । सतोरप्येनयोः मानविहीनाः केचित्संतप्ताः । एवमेव जगति जना भ्रान्त्यान्यान्यपि सुखसाधनानि मन्यन्ते । सुखस्य वास्तविकं कारणं धर्म एव । धर्मे सर्वं प्रतिष्ठितम् । उक्तञ्च—

एक एव सुहृद्धर्मो निधनेऽप्यनुयाति यः ।
शरीरेण समं नाशं सर्वमन्यद्धि गच्छति ॥

अन्यच्च—

अधर्मेणैधते तावत्ततो भद्राणि पश्यति ।
ततः सपत्नाञ्जयति समूलस्तु विनश्यति ॥

१०—माघे सन्ति त्रयो गुणाः

शिशुपालवधप्रणेतुर्महाकवेर्माघस्य पितामहः सुप्रभदेवः गुर्जरशासकस्य वर्मलातनाम्नो नृपस्य मन्त्री असीत् । माघस्य पिता दत्तको विद्वान् दानप्रसिद्धश्चासीत् । अस्य माता ब्राह्मी पितृव्यश्च शुभङ्कर आसीत् । अस्य जन्म विद्यापीठतया राजधानीभावेन च पुरा प्रथिते भीनमल्लाख्यनगरे अभवत् पितुर्दानशीलतायाः प्रभावो माघस्याप्युपरि पतितः । असीमदानदोषेणायं निर्धनत्वं गतः ।

माघस्य शिशुपालवधे द्वाविंशतिः सर्गाः सन्ति । महाकाव्येनैतेनैवास्य कवेर्महती महनीया कीर्तिः । माघकवेर्विपुला वर्णनशक्तिरत्र पल्लविता जाता, महती चोत्प्रेक्षासमर्थता स्वप्रभावं प्रकाशितवती ।

'माघस्य शास्त्राध्ययनं माघकाव्ये समहन्यतेव ।
माघकाव्येऽलङ्कारयोजनासौन्दर्यं दुरपह्नवम् ॥'

'काव्येषु माघः कविकालिदासः' इति प्राच्योक्तिः केषामविदिता, भूतलेऽत्र माघस्य काव्यकौशलं परामुदमातनोतीत्यपि नाज्ञातम्।

'नवसर्गगते माघे नवशब्दो न विद्यते।'

शब्दकाठिन्ये भारवेरेव कविचये मान्यत्वम्। परन्तु—

'तावद् भा भारवेर्भाति यावन्माघस्य नोदयः।'

यावन्माघमासस्य नोदयस्तावदेव पद्मिनीपतेर्भा भाति तथा च भारवेस्तदाख्यस्य कवेस्तावदेव भा भाति यावन्माघस्य तदभिधेयकवेर्नोदयः। माघकविकाव्ये उपमानोपमेय-शब्दकाठिन्यं पदलालित्यं च विद्वज्जनविदितमेवेति। अतः केनापि कविनोक्तमपि।

'माघेन विघ्नितोत्साहा नोत्सहन्ते पदक्रमम्।'
'मुरारिपदचिन्ता चेत्तदा माघे रतिं कुरु।'
'माघेनेव च माघेन कम्पः कस्य न जायते।'

अन्यच्च—

'उपमा कालिदासस्य भारवेरर्थगौरवम्।
दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः॥'

तथा हि न्यक्कृतकपिभासः कालिदासः उपमापरः न चार्थगौरवधरः, न च पदलालित्यकरः। इतश्च भारविस्तु अर्थगौरवकरणे सिद्धहस्तः, उपमाप्रथने च त्रस्तः, पदलालित्ये चाप्रशस्तः। दण्डी तु पदलालित्ये योग्यः उपमायामयोग्यः अर्थगौरवादयोग्यः। निराकृतदोषाऽघो माघ उपमाधारकः, अर्थगौरवकारकः पदलालित्यस्थापकश्चेति त्रिगुणसत्त्वात् प्रशस्यः। प्रथमं तावदुपमैव विचारचर्चामारोहति। समुपलभ्यते उत्कृष्टानामुपमानां प्राचुर्यमत्र। हरेः प्रतिविशेषणम् उपमाप्रायबद्धम् तथा च तस्य हरेः द्युतिततिप्रदर्शनाय तस्मै अकूपारस्योपमा प्रादायि खलु निरघेन माघेन।

'स तप्तकार्तस्वरभास्वराम्बरः कठोरताराधिपलाञ्छनच्छविः।
विदिद्युते वाडवजातवेदसः शिखाभिराश्लिष्ट इवाम्भसां निधिः॥'

गौराङ्गो नारदः कृतपीतोपवीतो विद्युत्परीतः शरदि घन इव चकाशे। 'कृतोपवीतं हिमशुभ्रमुच्चकैर्घनं घनान्ते तडितां गणैरिव।' यथा सत्कविः शब्दमर्थमुभयमादत्ते तथैव विपश्चिदपि दैवं पुरुषार्थश्चोभयमाश्रयते। 'नालम्बते दैष्टिकतां न निषीदति पौरुषे। शब्दार्थौ सत्कविरिव द्वयं विद्वानपेक्षते॥' यथा स्थायिभावं संचारिभावाः पोषयन्ति, तथैव विजिगीषुं भूभृतमन्ये सहायकाः। 'स्थायिनोऽर्थे प्रवर्तन्ते भावाः संचारिणो यथा। रसस्यैकस्य भूयांसस्तथा नेतुर्महीभृतः॥' यथा अल्पवयस्का बालिका मातरमनुगच्छति, तथैव प्रातःकालिकी सन्ध्या रजनिमन्वेति। 'अनुपतति विरावैः पत्रिणां व्याहरन्ती, रजनिमचिरजाता पूर्वसन्ध्या सुतेव।' शिशुपाल आदिवराह इवासीत्। 'क्षिप्तबहुलजलबिन्दु वपुः, प्रलयार्णवोत्थित इवादिशूकरः।' गजेषु बाणास्तथाऽपतन्, यथा सर्पेषु

मयूराः । 'अधिनागं प्रजविनो······पेतुर्बर्हिणदेशीयाः शत्रवः प्राणहारिणः ।' सज्जनाः न चौरवदाचरन्ति । 'न परेषु महौजसश्छलादपकुर्वन्ति मलिम्लुचा इव ।' जटा दधानो नारदो लतावेष्टितो गिरिरिवाराजत । 'दधानमम्भोरुहकेसरद्युतीर्जटाः······धराधरेन्द्रं व्रततीततीरिव ।'

महती संख्याऽर्थगौरवान्वितानां श्लोकानाम् । कतिपयेऽत्र प्रस्तूयन्ते ।

'सामानाधिकरण्यं हि तेजस्तिमिरयोः कुतः ।'

अपि च—

'जगत्पवित्रैरपि तन्न पादैः स्प्रष्टुं जगत्पूज्यमयुज्यतार्कः ।
यतो बृहत्पार्वणचन्द्रचारु तस्यातपत्रं बिभराम्बभूवे ॥'

अत्र भगवान् मरीचिमाली भगवन्तं हरिं जगदर्च्यं विभाव्य जगत्पवित्रैरपि स्वीयैः पादैः किरणैश्च स्प्रष्टुं नार्हति, प्रत्युत हरेः पूर्णेन्दुदीप्तिनिभमातपत्रं दध्रे, इति स्वान्त-सन्तोषकं भृशं रम्यमर्थगौरवं निवेशितं विनष्टाशेन माघेन ।

सत्प्रबन्धस्य को गुणः ? 'अनुज्झितार्थसम्बन्धः प्रबन्धो दुरुदाहरः ।' मानिनः स्वमानं नोज्झन्ति । 'सदाभिमानैकधना हि मानिनः ।' किं नाम सौन्दर्यम् ? 'क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः ।' सांख्यसिद्धान्तवर्णनम्—पुरुषः प्रकृतेः पृथग् विकृतेश्च पृथग् वर्तते । 'उदासितारं···बहिर्विकारं प्रकृतेः पृथग् विदुः, पुरातनं त्वां पुरुषं पुराविदः ।' 'तस्य सांख्यपुरुषेण तुल्यतां बिभ्रतः स्वयमकुर्वतः क्रियाः । कर्तृता तदुप-लम्भतोऽभवद्वृत्तिभाजि करणे यथर्त्विजि ॥' योगशास्त्रप्रावीण्यं प्रकटीकरोति कविरस्मिन्—

मैत्र्यादिचित्तपरिकर्मविदो विधाय ।
क्लेशप्रहाणमिह लब्धसबीजयोगाः ॥

बौद्धशास्त्रप्रावीण्यं पद्येऽस्मिन् राजते—

सर्वकार्यशरीरेषु मुक्त्वाङ्गस्कन्धपञ्चकम् ।
सौगतानामिवात्मान्यो नास्ति मन्त्रो महीभृताम् ॥

स्फुटं कामशास्त्रपाण्डित्यमत्र कवेः—

वर्जयन्त्या जनैः सङ्गमेकान्ततस्तर्कयन्त्या सुखं सङ्गमे कान्ततः ।
योषयैष स्मरासन्नतापाङ्गया सेव्यतेऽनेकयासन्नतापाङ्गया ॥

तादृशमेव मानवशास्त्रपाण्डित्यमपि विलसत्यस्मिन्पद्येऽपि—

पूर्वमेव किल सृष्टवानपस्तासु वीर्यमनिवार्यमादधौ ।
तत्र कारणमभूद्धिरण्मयं ब्रह्मणोऽसृजदसाविदं जगत् ॥

सङ्गीतशास्त्रपरिशीलनकौशलमप्यस्ति—

रणद्भिराघट्टनया नभस्वतः पृथग् विभिन्नश्रुतिमण्डलैः स्वरैः ।
स्फुटीभवद्ग्रामविशेषमूर्छनामवेक्षमाणं महतीं मुहुर्मुहुः ॥

श्लेषसौन्दर्यसमलङ्कृतनाटयशास्त्रनैपुण्यस्याप्युदाहरणम्—

दधतस्तनिमानमानुपूर्व्या बभुरक्षि वसो मुखे विशालाः।
भरतज्ञकविप्रणीतकाव्यग्रथिताङ्का इव नाटकप्रपञ्चाः॥

इत्थं सकलशास्त्राश्वगजपरीक्षणनिकषो माघ एव नान्य इति मे मतिः। पदलालित्यं तु पदे पदे प्राप्यते माघे। केचन श्लोका एवात्रोदाह्रियन्ते।

'नवपलाशपलाशवनं पुरः स्फुटपरागपरागतपङ्कजम्।
मृदुलतान्तलतान्तमलोकयत् स सुरभिं सुरभिं सुमनोभरैः॥'
'मधुरया मधुबोधितमाधवी मधुसमृद्धिसमेधितमेधया।
मधुकराङ्गनया मुहुरुन्मदध्वनिभृता निभृताक्षरमुज्जगे॥'
'वदनसौरभलोभपरिभ्रमद्भ्रमरसंभ्रमसंभृतशोभया।
चलितया विदधे कलमेखलाकलकलेऽलकलोलदृशान्यया॥'
'क्षोभमाशु हृदयं नयदूनां, रागवृद्धिमकरोन्न वधूनाम्।'
'स शरदं शरदन्तुरदिङ्मुखाम्।' 'अनूनुरच्चन्द्रमसोऽभिरामताम्॥'

'न रौहिणेयो न च रोहिणीशः।' 'विकचकमलगन्धैरन्धयन् भृङ्गमालाः, सुरभितमकरन्दं मन्दमावाति वातः।' अत एव सत्यमुक्तम्—

माघे सन्ति त्रयो गुणाः।

११—नैषधं विद्वदौषधम्

श्रीहर्षो नाम महाकविरखिलतन्त्रस्वतन्त्रस्तर्कपीयूषपारावारगम्भीरतास्पृशावीरेयः चिन्तामणिमन्त्रोपासकः सकलदर्शनटीकाकारवाचस्पतिमिश्रादुत्तरभाविन उदयनाचार्यस्य परवर्त्ती समभुदित्यत्र न कोऽपि विवादः प्रतीयते, यत् उदयनस्य मतं खण्डनखण्डखाद्य-ग्रन्थे श्रीहर्षेण सोपहासं खण्डितम्। तथाहि—

शङ्का चेदनुमास्त्येव न चेच्छङ्का ततस्तराम्।
व्याघातवधिराशङ्का तर्कः शङ्कावधिर्मतः॥

इतीयं कारिका कुसुमाञ्जलिग्रन्थे तृतीये स्तबके। इमां कारिकां प्रथमे परिच्छेदेऽनुमानखण्डनावसरे इत्थमखण्डयत्—

तस्मादस्माभिरप्यस्मिन्नर्थेन खलु दुष्टता।
त्वद्गाथैवान्यथाकारमक्षराणि कियन्त्यपि॥
व्याघातो यदि शङ्कास्ति न चेच्छङ्का ततस्तराम्।
व्याघातावधिराशङ्का तर्कः शङ्कावधिः कुतः॥

महाकवेरेतस्य जनकः श्रीहीरो माता मामल्लदेवी च। तथाहि—

श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं,
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम्।

गौडाधिपतिना महाशूरेण कान्यकुब्जदेशादानीतानां ब्राह्मणानामन्यतमोऽयं ब्राह्मणः कान्यकुब्जदेशाधीश्वरस्य जयचन्द्रस्य सभायां मान्यो महाकविषु गणितो बभूव ।

'ताम्बूलद्वयमासनञ्च लभते यः कान्यकुब्जेश्वरात् ।'

श्रीहर्षस्य नैषधीयचरितं नितान्तप्रसिद्धं विशालकायं महाकाव्यम् । अस्य ग्रन्थस्य सरसा वर्णनपद्धतिः शृङ्गारप्रकर्षपूर्णकथा च सहृदयहृदयान्यावर्जयतः । यथैव श्रीहर्षस्य खण्डनखण्डखाद्यमद्वितीयं तथैव नैषधीयमपि स्वक्षेत्रेऽनुपमम् । या प्रतिभा दर्शनरहस्यानि सरलीकरोति सैव शृङ्गारधारामपि प्रवाहयति । स्वयमुक्तं श्रीहर्षेण—

साहित्ये सुकुमारवस्तुनि दृढन्यायग्रहग्रन्थिले
तर्के वा मयि संविधातरि समं लीलायते भारती ।
शय्या वाऽस्तु मृदूत्तरच्छदवती दर्भाङ्कुरैरास्तृता
भूमिर्वा हृदयङ्गमो यदि पतिस्तुल्या रतिर्योषिताम् ॥

यथा रमणीलावण्यं हरति चेतः सचेतसो यून एव न तु किशोराणाम्, तथैव श्रीहर्षकृतिः सुधीभिरेवास्वादनीया, न तु प्राज्ञंमन्यैः ।

यथा यूनस्तद्वत् परमरमणीयापि रमणी,
कुमाराणामन्तःकरणहरणं नैव कुरुते ।
मदुक्तिश्चेदन्तर्मदयति सुधीभूय सुधियः,
किमस्या नाम स्यादरसपुरुषानादरभरैः ॥

श्रीहर्षस्य कविता सरसया पद्धत्या प्रचलन्ती मध्ये मध्ये दार्शनिकतत्त्वान्युपन्यस्य कविना कठिनीकृता । एतदेव मनसिकृत्य कविना स्वयमुक्तम्—

ग्रन्थग्रन्थिरिह क्वचित् क्वचिदपि न्यासि प्रयत्नान्मया
प्राज्ञम्मन्यमना हठेन पठिती माऽस्मिन् खलः खेलतु ।
श्रद्धाराद्धगुरुः श्लथीकृतदृढग्रन्थिः समासादय-
त्वेतत्काव्यरसोर्मिमज्जनसुखव्यासज्जनं सज्जनः ॥

अनुपमवैदुष्यवैभवाविर्भावात् पाण्डित्यपुटपरिपाकप्रतीकाशः प्रतीयते प्रबन्धोऽस्य । नैकशास्त्रनिष्णातस्यानुपहता गतिरत्रेति 'नैषधं विद्वदौषधम्' इत्युद्घोष्यते यशोऽस्य सुधीभिः ।

श्रीहर्षो ललितललिताभिः पदावलीभिः किं न चित्रयति सहृदयमानसान् ? सत्यमेवोक्तं केनचित् नैषधे पदलालित्यमिति । पदलालित्यवन्तः केचन श्लोका अत्र दिङ्मात्रमुदाह्रियन्ते । 'शृङ्गारभृङ्गारसुधाकरेण वर्णस्रजानूपय कर्णकूपौ ।' 'नलिनं मलिनं विवृण्वती पृषतीमस्पृशती तदीक्षणे ।' 'सकलया कलया किल दंष्ट्रया समवधाय यमाय विनिर्मितः ।' 'चलमलंकृत्य महारयं हयं स्ववाहवाहोचितवेषपेशलः' 'दिने दिने त्वं तनुरेधि रेऽधिकं पुनः पुनर्मूर्च्छ च तापमृच्छ च ।' 'मनोरथेन स्वपतीकृतं नलं निशि क्व सा न स्वपती स्म

पश्यति ।' 'अधारि पद्मेषु तदङ्घ्रिणा घृणा क्व तच्छयच्छायलवोऽपि पल्लवे । तदास्य-दास्येऽपि गतोऽधिकारितां न शारदः पार्विकशर्वरीश्वरः ।' 'मदेकपुत्रा जननी जरातुरा नवप्रसूतिर्वरटा तपस्विनी ।' 'मुहूर्तमात्रं भवनिन्दया दयासखाः सखायः स्रवदश्रवो मम ।'

अत्र केवलं पदलालित्यमेव प्रशस्यतरं न, प्रत्युत कवेः काव्यकौशलमपि लोकोत्तरं विद्वत्तापरिपूर्णञ्चेति विभावयन्तु सहृदयाः । काव्येऽत्र सर्वत्रैव कविकौशलं प्रतिभाति तत्र संक्षेपतो यथा—तार्किकत्वे त्वस्य 'तर्केष्वप्यसमश्रमस्य धर्षितपरास्तर्केषु यस्योक्तयः' इति स्वयमुद्घोषितवतः स्वाभाविकं स्वारस्यं काव्यस्यास्यानुशीलनशालिनां न परोक्षम् । विविधदर्शनसिद्धान्तानाम् उल्लेखात् संजायते नैषधचरिते महत् काठिन्यम् । अतो विद्वदौषधमेतत् काव्यमुच्यते । एतदेवात्र निरूप्यते ।

श्लेषप्रयोगः—'चेतो नलं कामयते मदीयम्० ।' 'स्यादस्या नलदं विना न दलने तापस्य कोऽपि क्षमः ।' 'रथाङ्गभाजा कमलानुषङ्गिणा० ' 'विदर्भजाया मदनस्तथा मनोनलावरुद्धं वयसैव वेशितः ।'

श्रीहर्षः स्वीयस्य शास्त्रज्ञानस्य परिचयं प्रतिसर्गं ददाति, परन्तु सप्तदशसर्गे तु तेन स्वीयं नास्तिकास्तिकसकलदर्शनप्रवीणत्वं व्याकरणनिष्णातत्वं च सडिण्डिमनादं घोषितम् । चार्वाकसिद्धान्तवर्णनम्—न कश्चनेश्वरः । 'देवश्चेदस्ति सर्वज्ञः, करुणा-भागवन्ध्यवाक् । तत् किं वाग्व्ययमात्रान्नः कृतार्थयति नार्थिनः ।।' न मृतस्य पुनर्जन्म । 'कः शमः क्रियतां प्राज्ञाः, प्रियाप्रीतौ परिश्रमः । भस्मीभूतस्य देहस्य पुनरागमनं कुतः ।' भोगोपभोगार्थं शरीरमिदम् । 'सुकृते वः कथं श्रद्धा, सुरते च कथं न सा । तत्कर्म पुरुषः कुर्याद् येनान्ते सुखमेधते ।।' वेदान्तसिद्धान्तवर्णनम्—अद्वैतवादस्य तात्त्विकत्वम्—'श्रद्धां दधे निषधराड् विमतौ मतानाम्, अद्वैततत्त्व इव सत्यतरेऽपि लोकः ।' ब्रह्मसाक्षात्कारः—'प्रापुस्तमेकं निरुपाख्यरूपं ब्रह्मेव चेतांसि यतव्रतानाम् ।' सांख्य-सिद्धान्तवर्णनम्—सत्कार्यवादः—'नास्ति जन्यजनकव्यतिभेदः ।' मीमांसासिद्धान्त-वर्णनम्—देवानामरूपित्वं मन्त्ररूपित्वं च—'विश्वरूपकलनादुपपन्नं, तस्य जैमिनिमुनित्व-मुदीये ।' 'विग्रहं मखभुजामसहिष्णुः० ।' श्रुतीनां प्रामाण्यम्—'श्रुतिं श्रद्धत्थ विक्षिप्ताः प्रक्षिप्तां ब्रूथ च स्वयम् । मीमांसामांसलप्रज्ञास्तां यूपद्विपदापिनीम् ।।' जैनसिद्धान्त-वर्णनम्—जैनाभिमतरत्नत्रयम्—'न्यवेशि रत्नत्रितये जिनेन यः, स धर्मचिन्तामणि-रुज्झितो यया । कपालिकोपानलभस्मनः कृते, तदेव भस्म स्वकुले स्तृतं तया ।।' बौद्धसिद्धान्तवर्णनम्—बौद्धाभिमतः शून्यवादो विज्ञानवादः साकारतावादश्च—'या सोमसिद्धान्तमयाननेव, शून्यात्मतावादमयोदरेव । विज्ञानसामस्त्यमयान्तरेव, साकार-तासिद्धिमयाखिलेव ।।' न्यायवैशेषिकसिद्धान्तवर्णनम्—न्यायाभिमतमोक्षस्य परिहासः—'मुक्तये यः शिलात्वाय शास्त्रमूचे सचेतसाम् । गोतमं तमवेत्यैव यथा वित्थ तथैव सः ।।' वैशेषिकाभिमततमः स्वरूपपरिहासः—'ध्वान्तस्य वामोरु विचारणायां वैशेषिकं चारुमतं मतं मे । औलूकमाहुः खलु दर्शनं तत् क्षमं तमस्तत्त्वनिरूपणाय ।।' मनसोऽणुत्वम्—'मनोभिरासीदनणुप्रमाणैः ।' व्याकरणसिद्धान्तवर्णनम्—'क्रियेत चेत्साधुविभक्तिचिन्ता

व्यक्तिस्तदा सा प्रथमाभिधेया। या स्वौजसां साधयितुं विलासैः०' अत्र 'अपदं न प्रयुञ्जीत' इत्यस्य वर्णनम्। 'अपवर्गे तृतीयेति भणितः पाणिनेरपि' इत्यत्र 'अपवर्गे तृतीया' सूत्रस्य वर्णनम्। 'किं स्थानिवद्भावमधत्त दुष्टं तादृक्कृतव्याकरणः पुनः सः।' अत्र 'स्थानिवदादेशो०' सूत्रस्य वर्णनम्। विविधशास्त्रादिप्रतिपादितसिद्धान्तवर्णनादेव नैषधमहाकाव्यस्य क्लिष्टत्वमालक्ष्यते। अतएव साधूच्यते—

'नैषधं विद्वदौषधम्'

१२—भारतीयसंस्कृतेः स्वरूपम्

अथ का नाम संस्कृतिः? किं तस्याः स्वरूपम्? कथमिवैषोपकरोत्यात्मनो मनसो जनस्य देशस्य संसृतेर्वा? तत्रोच्यते। संस्करणं परिष्करणं चेतस आत्मनो वा संस्कृतिरिति समभिधीयते। सम्पूर्वक-कृधातोः 'क्तिन' प्रत्ययेन रूपमिदं सिद्ध्यति। संस्कृतिः व्यपनयति मलं, स्वान्तं प्रसादयति, संस्थापयति स्थैर्यं चेतसि, हरति चित्त-भ्रमम्, चेतः प्रसादयति, सुखं साधयति, भूतिं भावयति, गुणान् गमयति, शान्तिं समादधाति, सत्यवृत्तिं संस्थापयति, ज्ञानज्योतिः प्रकाशयति, अविद्यातमः संहरति, धृतिं धारयति, दुःखद्वन्द्वानि दहति, पापान्यपाकुरुते च। संस्कृतिरेवात्मनो मनसो लोकस्य राष्ट्रस्य संसृतेश्चोपकरोति। संस्कृतिमन्तरा न कोऽपि मानवः समाजो वा राष्ट्रं वा शान्तिमधिगन्तुं समर्थम्। भारतीया संस्कृतिः समस्तविश्वसंस्कृतिवियन्मण्डले सावित्रं ज्योतिरिव देदीप्यते।

भारतीयसंस्कृतेः मुख्या विशेषताऽत्र प्रस्तूयते। (१) धर्मप्राधान्यम् धर्म एव पशुमनुष्ययोर्भेदो यत्पशवस्तत्तदिन्द्रियवशानुगाहि प्रतिक्षणं व्यवहरन्ति। अत उक्तम्—'धर्मो हि तेषामधिको विशेषो, धर्मेण हीनाः पशुभिः समानाः।' धर्मो हि नामेन्द्रियविषयप्राप्तिजन्यां क्षणिकां सन्तुष्टिमनपेक्ष्य वस्तुत आत्मकल्याणसाधन-स्याचरणमिति। 'धारणाद्धर्म इत्याहुर्धर्मो धारयते प्रजाः। यः स्याद्धारणसंयुक्तः स धर्म इति निश्चयः॥' 'यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः।' ततश्चैहिकामुष्मिक-सुखसाधनं मनुष्यष्य च परमः सखा यत्खलु धर्मानुष्ठानम्। सा एव धर्मभावना मानवेषु विशेषा, सा च पशुषु नैव विद्यते।

(२) सदाचारपालनम्—सताम् आचारः सदाचार इत्युच्यते। सदाचारस्य सत्तयैव संसारे जन उन्नतिं करोति। देशस्य राष्ट्रस्य समाजस्य जनस्य च उन्नत्यै सदा-चारस्य महती आवश्यकता वर्तते। यः सदाचारेण हीनोऽस्ति स वस्तुतः पतितोऽस्ति, धनहीनो न पतितोऽस्ति।

वृत्तं यत्नेन संरक्षेद् वित्तमेति च याति च।
अक्षीणो वित्ततः क्षीणो वृत्ततस्तु हतो हतः॥

अत एव पूर्वैः महर्षिभिः 'आचारः परमो धर्मः' इत्युक्तम्।

(३) पारलौकिकी भावना—इह सर्वं परिवर्तते। नात्रार्था एकेन रूपेणावतिष्ठन्ते। अस्ति च शरीरावस्थापरिवर्तो यौवनादिः, कीर्तिरेवैकाऽविनाशिनी। भौतिकाः विषयाः

परिभोगरम्याः किन्तु अन्ते परितापिनः सन्ति। 'आपातरम्या विषयाः पर्यन्त-परितापिनः।' एषामाश्रयणेन दुःखावाप्तिः सुलभा, सुखं तु नितरां दुर्लभम्। अतएव धीरा भौतिकविषयेषु विरता अभूवन्, कर्त्तव्यपालनं च कुर्वन्तस्ते न प्राणानपि गणयामासुः।

(४) अध्यात्मिकी भावना—अध्यात्मप्रवृत्त्या जीवनमुन्नतं भवति। निखिलं संस्कृतवाङ्मयं व्याप्तं भावनयाऽनया। भावनैषा मानवं देवत्वं प्रापयति। समग्रमपि प्राणिजातं परमेश्वरेणैवोत्पादितमिति विचारं विचारं तत्रैकत्वमनुभवति। जगदिदं परमात्मना व्याप्तम्। 'ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्' (ईशोपनिषद्)। 'यस्मिन्त्सर्वाणि भूतान्यात्मैवाभूद् विजानतः। तत्र को मोहः कः शोक एकत्वमनुपश्यतः' (ईशोप०)। 'यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति। सर्वभूतेषु चात्मानं ततो न विजुगुप्सते॥' अध्यात्मप्रवृत्त्या मनसि सहानुभूतिः सहृदयता औदार्यादिकं च प्रवर्तते।

(५) वर्ण-व्यवस्था —वर्णाश्चत्वारः सन्ति—ब्राह्मण-क्षत्रिय-वैश्य-शूद्रभेदात्। वेदानां वेदाङ्गानां चाध्ययनमध्यापनं यजनं याजनं विद्याया धनस्य च दानं धनादिदानस्य स्वीकरणं च ब्राह्मणस्य परमो धर्मः। 'अध्यापनमध्ययनं यजनं याजनं तथा। दानं प्रतिग्रहश्चैव ब्रह्मकर्म स्वभावजम्' (मनुस्मृति)। 'शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च। ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजम्' (गीता)। क्षत्रियस्य परमो धर्मः राष्ट्रस्य रक्षणमस्ति। उक्तं कालिदासेन—'क्षतात् किल त्रायत इत्युदग्रः क्षत्रस्य शब्दो भुवनेषु रूढः' क्षत्रियः क्षतात् लोकं त्रायते। 'शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाऽप्यपलायनम्। दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम्' (गीता)। कृषिगोरक्षवाणिज्यं च वैश्यस्य प्रमुखं कर्म। 'कृषिगोरक्षवाणिज्यं वैश्यकर्म स्वभावजम्।' शारीरिकं कार्यं शूद्रस्य परमं कर्त्तव्यम्। 'परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजम्' (गीता)। यदा सर्वेऽमी ब्राह्मणादयो वर्णाः स्वस्वधर्ममनुतिष्ठन्ति तदानीमेव विश्वसमुन्नतिः सम्भवा नान्यथा।

(६) आश्रमव्यवस्था—आश्रम्यते स्थीयते यस्मिन् स आश्रमः। ब्रह्मचर्य-गृहस्थ-वानप्रस्थ-संन्यासाश्चत्वार एते आश्रमाः। पञ्चविंशतिवर्षपर्यन्तमेकस्मिन् आश्रमे विश्रम्य चत्वारोऽपि आश्रमाः सेव्याः। ब्रह्मचर्याश्रमे विद्याध्ययनं तपोमयजीवनयापनं च प्रधानं कर्त्तव्यम्। गृहस्थाश्रमे भौतिकी शारीरिकी मानसिकी चोन्नतिः दाम्पत्यजीवनयापनं च विशिष्टं कर्म। वानप्रस्थाश्रमे संयमपालनं, सपत्नीकेनेश्वराराधनम् प्रमुखं कर्म। संन्यासाश्रमे ऐहिकविषयान् परित्यज्य योगाभ्यासे प्रीतिः समाधौ मनसः स्थितिः प्रथमं कर्त्तव्यम्।

(७) वैदिकधर्मनिष्ठा—वेदप्रतिपादितो धर्मः वैदिकधर्मः। धर्मेऽस्मिन् ईश्वर एव सर्वशक्तिमान्, सृष्टिस्थितिप्रलयकर्त्ता, अमरः अजरः, शुद्धः, बुद्धः, सर्वज्ञः शुभाशुभकर्मफलप्रदाता, व्यापकः, न्यायशीलश्च वर्तते।

(८) पुनर्जन्मवादः—'जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च' (गीता)। यो हि जायते तस्य मरणं ध्रुवमस्ति। कर्मानुरूपमेव सर्वस्यापि जन्तोः पुनर्जन्म भवति।

(९) मोक्षावाप्तिः परमः पुरुषार्थः । मोक्षमधिगम्य न पुनरावर्तन्ते मानवाः । मोक्षानन्दस्य वर्णनं वेदेषु दृश्यते—

'यत्र ज्योतिरजस्रं यस्मिन् लोके स्वर्हितम् ।

तस्मिन् मां धेहि पवमानामृते लोके अक्षित इन्द्रायेन्दोपरिस्रव ।' (ऋक्)

(१०) अभयत्वभावना—कापुरुषाः मरणाद् पूर्वमेव बहुशो म्रियन्ते, ते हि शरीरेण धृता अपि मृता एव जीवन्ति । निर्भयो जन एव लोकोत्तराणि कार्याणि कर्तुं समर्थः । अतएव श्रुतौ प्रार्थना —

'अभयं मित्रादभयममित्रादभयं ज्ञातादभयं पुरो यः ।'

अपि च—

'यतो यतः समीहसे ततो नोऽभयं कुरु ।

शन्नः कुरु प्रजाभ्यः अभयं पशुभ्यः ॥'

(११) अहिंसापालनम्—इह जगति अहिंसया महती उपयोगिता वर्तते । मानवस्य आत्मा अहिंसया सुखमनुभवति । अहिंसायाः प्रतिष्ठायां सर्वे सर्वत्र ससुखं निर्भयं च विचरन्ति । ऋषिभिः महर्षिभिश्च 'अहिंसा परमो धर्म' इत्यङ्गीकृतः । अतएव सर्वैरपि सर्वदा सर्वभावेन अहिंसाधर्मः पालनीयः

विश्वहितस्य विश्वोन्नतेश्च सर्वा साधना भारतीयसंस्कृतावेव उपलभ्यन्ते । एतासामाश्रयणेन सर्वविधा समुन्नतिः सुलभा विश्वस्य राष्ट्रस्य च ।

१३—संस्कृतभाषाया वैशिष्ट्यं सौष्ठवं च

'संस्कृतम्' इति पदं सम्+कृ+क्त इति व्युत्पादितम् । संस्कृतभाषा देवभाषा कथ्यते । इयं संस्कृतभाषाऽन्याभ्यः सर्वाभ्योऽपि भाषाभ्यः प्रकारे विस्तरे च महती, सौन्दर्ये विचारपवित्रतायां चान्यूना विद्यते । सत्यपि मन्दतमे विकासक्रमे क्रमोपनते च भाषासमुदये इतिहासारम्भसमयत एव संस्कृतभाषा विश्वस्यान्यासां भाषाणां समतां कुर्वती समायाति । अन्याभिर्विश्वस्य भाषाभिरस्याः प्रतिस्पर्धा गुणगणकृतैव । भारतेऽजायन्त विविधानि सामाजिकपरिवर्तनानि, धार्मिकाण्युत्थानपतनानि, वैदेशिकानामाक्रमणानि च तथापि संस्कृतं सर्वदा समभावेन सर्वत्र व्यवहारवर्त्मन्यवर्तत ।

भाषाऽर्थेऽस्य शब्दस्य प्रयोगः प्रथमतो वाल्मीकिरामायणे एव प्राप्यते—

'यदि वाचं प्रदास्यामि द्विजातिरिव संस्कृताम् ।

रावणं मन्यमाना मां सीता भीता भविष्यति ॥'

ततः पूर्वं तत्रार्थे भाषाशब्द एव व्यवह्रियते स्म । यास्केन पाणिनिना चापि लोकव्यवहृतभाषार्थे भाषाशब्द एव व्यवहृतः—

'भाषायामन्वध्यायश्च' निरुक्ते १।४

'भाषायां सदवसश्रुवः' पा० सू० ३।२।१०८

'प्रथमायाश्च द्विवचने भाषायाम्' पा० सू० ७।२।८८

मन्ये ।

संस्कृतभाषायां मानवसंस्कृतेरितिहासः सुरक्षितोऽस्ति । प्रायः सर्वेषामप्यार्यधर्मावलम्बिनां धार्मिकं साहित्यं प्राचुर्येण देववाण्यामेव विद्यते । प्रायेण सर्वेषामपि आर्यधर्माणामनुयायिभिः आजीवनं तपांसि तपद्भिराचार्यैः संग्रथितानि ग्रन्थरत्नानि देववाण्याः साहित्यसमृद्धिं सम्पादयन्ति । प्रायेण सर्वासामेव भारतीयभाषाणामुद्गमस्थानभूता चैषा देववाणी । एतद्द्वारैव विभिन्नदेशेषु लैटिन, ग्रीक, इंग्लिश, फ्रेंच, जर्मन—इत्यादिरूपैरुपलभ्यमानया आर्यभाषयाऽस्माकं संबन्धः भुवि सर्वत्र विश्रुतः । अस्यामेव सभ्यजगतः प्राचीनतमं साहित्यं समुपलभ्यते । संसारे नहि काचिदेतादृशी भाषा यस्याः साहित्यं प्राचीनतादृष्ट्यास्याः साहित्यस्य समतामासादयेत् । विस्तृत्यपेक्षयापि 'ग्रीक', 'लैटिन' इत्यादि परमप्रसिद्धप्राचीनोत्कृष्टभाषाणां कयोरपि द्वयोः साहित्यमेकत्रीकृतमपि न तावद्विस्तृतं यावद्देववाण्याः । न चापि देववाणीसाहित्यं साकल्येनाद्य यावत् समुपलभ्यते । अर्थगाम्भीर्यभावसौन्दर्याद्यपेक्षयापि संसारभाषाणां—न केवलं प्राचीनानां किन्तु आधुनिकीनामपि शिरोमणीभूतैव नो देववाणी । उपनिषदो, भगवद्गीता, दर्शनशास्त्राणि, भागवतम् , शाकुन्तलम् , उत्तररामचरितम् इत्याद्यलौकिकसाहित्यरत्नैरलंकृता सा सहसैवान्या भाषा अतिक्रामति । धर्मार्थकाममोक्षाख्यानखिलानेव च पुरुषार्थान् लक्ष्यीकृत्य प्रवृत्तं तत्साहित्यम् । अतएव च सर्वाङ्गसम्पूर्णम् । संस्कृतं सदा जीवितभाषाभावमभजत यतोऽत्रैव पूर्वतनाः सर्वेऽपि ग्रन्था अलिख्यन्त । आस्तां पुराणी कथा, संस्कृतस्य सम्प्रत्यपि जीवितभाषात्वे प्रमाणमिदं यदधुनापि संस्काराः प्रायोऽधिकसंख्यकभारतीयानां संस्कृत एव सम्पाद्यन्ते, महाभारतप्रभृतयो धर्मग्रन्था अधीयन्ते । स्वीया विचारा लोकविशेषैः संस्कृते प्रकाश्यन्ते, कविता विरच्यन्ते च ।

भाषाविज्ञानपण्डितानां मते आर्यभाषा सेमेटिकभाषा चेति द्वयोरेव भाषयोर्व्यवहर्त्तारः सभ्यतां संस्कृतिञ्च सृष्टवन्तः । आर्यभाषापि पाश्चात्यपौरस्त्यभेदेन द्विविधा । अस्मिन्नार्यभाषायाः पाश्चात्यप्रभेदे यूरोपदेशस्य प्राचीना आधुनिक्यश्च ग्रीक-लैटिन-फ्रेञ्च-जर्मन-इङ्गलिशप्रभृतयो भाषाः समायान्ति । आर्यभाषायाः पौरस्त्यप्रभेदे ईरानीभाषा संस्कृतभाषा च समागच्छतः ।

अतिव्यापकं संस्कृतसाहित्यम् । इदं सर्वाङ्गपूर्णं यतोऽत्र मानवजीवनोद्देश्यभूताः धर्मार्थकाममोक्षाख्याश्चत्वारोऽपि पुरुषार्था विवेचिताः । धर्मशास्त्रं प्रथत एव, अर्थशास्त्रमपि कौटिल्यादि प्रणीतमत्र न कुतोऽपि हीयते । कामशास्त्रमपि परमप्रसिद्धमत्रत्यम् , मोक्षशास्त्रस्यापि परमप्रकृष्टता सर्वसम्मता । एवं संस्कृते मानवजीवनोपयोगिनः सर्वेऽपि विषयाः साधु विवेचिता इति कथनं समुचितमेव । अत्र प्रेयःशास्त्रं श्रेयःशास्त्रं चोभयं समभावेन समेधितम् , अतएव चात्र भोगमोक्षयोरुभयोः सत्तया सकलसाहित्यापेक्षया विशिष्टता विद्यते ।

अतिमहत्त्वपूर्णमिदं संस्कृतसाहित्यम् । इदं प्राचीनतायां सर्वातिशायीति पूर्वमावेदितमेव । एतन्महत्त्वे प्रमाणानि यथा—

संस्कृतसाहित्यं न केवलं भारतवर्ष एव किन्तु भारताद् बहिरपि विभिन्नदेशेषु प्रचारातिशयमुपभुञ्जाना सर्वासामपि जीवनयात्रानिर्वाहिकाणां विद्यानामाश्रयीभूता अखिलपुरुषार्थसाधनोपयोगिविस्तृतवाङ्मयेन च समेता समुन्नतिशिखरमधिष्ठिता आसीदेषास्माकं देववाणी। इदं साहित्यं चीन–जापान–कोरियाप्रभृतिवासिनामपि लोकानामितिवृत्तं लङ्का–मलयद्वीपादिवासिनाञ्च इतिवृत्तं सुरक्षितरूपेण गोपायति।

धर्मविज्ञानं तदुपचयश्च यथा संस्कृतभाषाश्रयेण परिचीयते न तथा भाषान्तराश्रयेण। मननशक्तिसमुद्भवानि नानादर्शनानि संस्कृते महत्त्वमानयन्ति।

यावत् संस्कृतसाहित्यं प्राप्यते, तावदेव रोम–यवनोभयसाहित्यापेक्षया परिणाहेऽत्यधिकम्।

सूत्रकृतसाहित्यं क्वापि परस्यां भाषायां न जातम्, इदमनन्यसाधारणं संस्कृतसाहित्यस्य महत्त्वम्।

मङ्गोलियादेशेऽपि संस्कृतस्य प्रसार आसीत्। तत्रोनेके संस्कृतग्रन्था लब्धाः, महाभारताधाराणि तद्भाषानिबद्धानि बहूनि नाटकान्यपि तत्र लब्धानि, येषु हिडिम्बवधं प्रधानम्। तदेवं संस्कृतस्य सांस्कृतिकं महत्त्वं प्रमापितं जायते।

विशुद्धकलादृष्ट्यापि संस्कृतसाहित्यमतिमहत्त्वशालि, अत्र कालिदाससदृशः कविः, भवभूतितुल्यो नाटककारः, बाणभट्टसमो गद्यलेखकः, जयदेवसदृशो गीतप्रणेता चाजायन्त, यदीयाभिस्तत्तत्काव्यसृष्टिभिः शुद्धकलारूपेणापि विनोदितं विनोद्यते च भुवनम्।

सेयं संस्कृतकाव्यधाराऽविच्छिन्ना चिरायानुवृत्ताऽग्रेऽपि सततं शतधारतामुपैतु।

१४—दण्डिनः पदलालित्यम्

महाकवेर्दण्डिनो जनिकालविषये सन्ति बहवो विप्रतिपत्तयः। कोऽयं कविः कदा अयं कस्मिन् प्रदेशे समभूदिति निर्णयोऽद्यावधि न जातः। मन्यन्ते च बहवो विद्वांसो यदयं खृष्टस्य षट्शतकान्तिमभागे काञ्चीपुरे वीरदत्तस्य धर्मपत्न्यां गौर्यां जन्म लेभे, बाल्य एव च मात्रा पित्रा वियुज्य इतस्ततो भ्रमंश्चानन्तरं पल्लवनरेशस्य सभायामागत्य तत्रैव तस्थौ। अन्ये च किरातप्रणेतुर्दामोदरस्य (भारवेः) प्रपौत्रोऽयमिति मत्वा सप्तमशतकान्तिमभागे तज्जन्मस्थितिरभूदित्यामनन्ति।

'त्रयो दण्डिप्रबन्धाश्च त्रिषु लोकेषु विश्रुताः' एतदुक्तिमनुसृत्य 'काव्यादर्शः', 'दशकुमारचरितम्', 'अवन्तिसुन्दरीकथा' इति त्रयो ग्रन्था दण्डिनः कथ्यन्ते। केचित्— 'छन्दोविचित्यां सकलस्तत्प्रपञ्चः प्रदर्शितः' इति दण्डिवचनेन 'छन्दोविचिति' नामकमपि दण्डिग्रन्थमेव कल्पयन्ति, परं तन्न युक्तम्, छन्दोविचितिशब्दस्य छन्दःशास्त्रपरत्वात्, अत एव—छन्दोविचितिविषये 'सा विद्या नौर्विविक्षूणाम्' इति तच्छास्त्रस्य विद्यात्वमुक्तम्। एष एव न्यायः कला-परिच्छेदविषयेऽपि बोध्यः। केचित्तु छन्दोविचितिमेकं ग्रन्थमेव मन्यन्ते।

'जाते जगति वाल्मीकौ कविरित्यभिधाऽभवत् ।
कवी इति ततो व्यासे कवयस्त्वयि दण्डिनि ॥'

इत्येवमादिभिः प्राचीनसहृदयवचनैः संस्कृतसाहित्ये दण्डिनो महती प्रतिष्ठाऽनुमीयते। गद्यलेखकेषु दण्डी स्वं विशिष्टं स्थानं रक्षति। दशकुमारचरितमाश्रित्यैवास्य महती महनीयतेति नात्र विप्रतिपत्तिः। दशकुमारस्य कथाग्रन्थतया कथानककृतं मनोरञ्जकत्वमत्रोचितमात्रायां निहितं, वर्णनानां स्वल्पतया कथासूत्रस्य व्यवच्छेदो न जायते। दशकुमारगता गद्यशैली सुबोधा सरसा प्रवाहशालिनी च। वस्तुतो दण्डी गद्ये व्यञ्जनाक्षमस्य सरससरलस्य च प्रवाहस्य प्रवर्तको मन्यते। अर्थस्य स्पष्टता, मनोरमा अभिव्यञ्जनशक्तिः, पदानां लालित्यं चेति दशकुमारस्यासाधारणा गुणाः। सत्यमुक्तम्—

'कविर्दण्डी कविर्दण्डी कविर्दण्डी न संशयः ।'

पदलालित्ये विख्यातः सरस्वत्या परिज्ञातस्तु निक्षिप्तपदलालित्यकरणशक्तकविजनमारणपविः कविर्दण्डी एव बभूव। यादृशं पदलालित्यं तत्काव्ये तादृशं पदलालित्यं नहि कस्यचित्कवेः—काव्ये विद्यते यथा तत्कृतदशकुमारचरिते—'देव! दीयतामनुग्रह हार्दम्र चित्तम्, अहमस्मि सोमरश्मिसम्भवा सुरतमञ्जरी नाम—'सुरसुन्दरी' एतादृशं मनोमोहनं हृद्द्रावकं पदलालित्यं तत्कवेर्विदुषां मनो नितरां रञ्जयति। सुधीभिरास्वादनीयं समीक्षणीयं चैतस्या माधुर्यम्। राजहंसस्येव राज्ञो राजहंसस्य सुषमां समवलोकयन्तु सन्तः। 'अनवरतयागदक्षिणारक्षितशिष्टविशिष्टविद्यासंभारभासुरभूसुरनिकरः······राजहंसो नाम घनदर्पकन्दर्पसौन्दर्यसोदर्यहृद्यनिरवद्यरूपो भूपो बभूव।' तस्य महिषी वसुमती कलनाकुललला-मभूताऽभूत्। 'तस्य वसुमती नाम सुमती लीलावती कुलशेखरमणी रमणी बभूव।' मालवेश्वरस्य प्रस्थानवर्णनं कुर्वताऽभिधीयते तेन—'मालवनाथोऽप्यनेकानेकपयूथसनाथो विग्रहः सविग्रह इव साग्रहोऽभिमुखीभूय भूयो निर्जगाम।'

कवितायां यावत्कलापक्षस्य विभावनं तावत्यंशेऽलङ्काराणां सन्निवेशोऽर्थचयने शब्दगुम्फने च न केवलं गद्यकाव्यान्येवापि तु समस्तमपि संस्कृतभाषानिबद्धं वाङ्मयमतिशय्य वर्तते दशकुमारचरितमिति कथनं नात्युक्तिं स्पृशति। विजयार्थं प्रस्थातुकामानां कुमाराणां यमकालंकारालंकृतं वर्णनं दण्डिनो वाग्वैभवमेवाविर्भावयति। 'कुमारा माराभिरामा रामाद्यपौरुषा रुषा भस्मीकृतारयो रयोपहसितसमीरणा रणाभियानेन यानेनाभ्युदयाशंसं राजानमकार्षुः।' राजकन्याया वर्णनं दण्डिनः सूक्ष्मेक्षिकयेक्षणं वर्णनचातुरीं चाविष्करोति। 'अवगाह्य कन्यान्तःपुरं प्रज्वलत्सु मणिप्रदीपेषु······कुसुमलवच्छुरितपर्यन्ते पर्यङ्कतले······ईषद्विवृतमधुरगुल्मसंधि, अभुग्नश्रोणिमण्डलम्, अतिश्लिष्टचीनांशुकान्तरीयम्, अनतिवलिततनुतरोदरम्, अर्धलक्ष्याधरकर्णपाशनिभृतकुण्डलम्, आमीलितलोचनेन्दीवरम्, अविभ्रान्तभ्रूपताकम्—चिरविलसनखेदनिश्चलां शरदम्भोधरोत्सङ्गशायिनीमिव सौदामिनीं राजकन्यामपश्यत्।'

गिरिवरं वर्णयति—'अहो रमणीयोऽयं पर्वतनितम्बभागः, कान्ततरेयं गन्धपाषाणवत्युपत्यका, शिशिरमिदमिन्दीवरारविन्दमकरन्दबिन्दु चन्द्रकोत्तरं गोत्रवारि, रम्योऽ-

यमनेकवर्णकुसुममञ्जरीभरस्तरुवनाभोगः ।' धर्मवर्धनस्य दुहितरं वर्णयन्नाह—'तस्य दुहिता प्रत्यादेश इव श्रियः, प्राणा इव कुसुमधन्वनः, सौकुमार्यविडम्बितनवमालिका, नवमालिका नाम कन्यका ।' मृगयालाभांश्च वर्णयति—'यथा मृगया ह्युपकारिकी, न तथान्यत् । मेदोऽपकर्षादङ्गानां स्थैर्यकार्कश्यातिलाघवादीनि, शीतोष्णवातवर्षक्षुत्-पिपासासहत्वम्, सत्त्वानामवस्थान्तरेषु चित्तचेष्टितज्ञानम् ।'

ओष्ठ्यवर्णपरिहारोऽपि उत्तरपीठिकायां दृश्यते । यथा—'चिरं चरितार्था दीक्षा' 'बहुश्रुते विश्रुते विकचराजीवसदृशं दृशं चिक्षेप देवो राजवाहनः ।' 'आर्य, कदर्यस्यास्य कदर्थनान्न कदाचिच्चेद्रायाति नेत्रे ।' 'सखे, सैषा सज्जनाचरिता सरणिः, यदणीयसि कारणेऽनणीयानादरः संदृश्यते ।' 'कष्टा चेयं निःसङ्गता, या निरागसं दासजनं त्याजयति ।'

अतएव तत्कवितामृततृप्तस्य कस्यचिदुक्तिरियं समुचिताऽऽभाति—दण्डिनः पदलालित्यम् ।

१५—कस्यैकान्तं सुखमुपनतं दुःखमेकान्ततो वा

इह जगति कस्यापि सर्वदैकावस्थायामेवावस्थितिनितरामसम्भवा । रात्रिदिवसयोरिव सुखदुःखयोः पर्यायेण समुपस्थितिः कस्याविदिता । महाशक्तिसम्पन्ना लोकोत्तरप्रभावसंयुता अपि सुखदुःखपर्यायनियममतिक्रमितुमशक्ताः । तथा चोच्यते ।

'कस्यैकान्तं सुखमुपनतं दुःखमेकान्ततो वा
नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण ।'

'अतोऽपि नैकान्तसुखोऽस्ति कश्चिन्नैकान्तदुःखः पुरुषः पृथिव्याम् ।'

'कालक्रमेण जगतः परिवर्तमाना,
चक्रारपङ्क्तिरिव गच्छति भाग्यपङ्क्तिः ।'

'भाग्यक्रमेण हि धनानि भवन्ति यान्ति'
'चक्रवत् परिवर्तन्ते दुःखानि च सुखानि च ।'

अहो अकलनीयः कालमहिमा । क्षणेनैव जनो दुःखसागरे प्रक्षिप्यते, क्षणेन च सुखसम्पत्तिमासाद्य भूयो संजायते । योऽद्य मोदमानस्तिष्ठति अन्येद्युः सहसैव तस्योपरि महद् दुःखमापतति । चिराय महता दुःखेन कथंचित्कालमतिवाहयन्तो बहवोऽकस्मादेव सुखसम्पदमासादयन्ति । वस्तुतो नैवैकान्ततः कस्यचिद् दुःखाधिगतिः सुखसमागमो वाकर्ण्यते । य आर्याः स्वेन पुरुषकारेण बुद्धिप्रकर्षेण च परां समृद्धिमापन्, यथेष्टं च सुखमन्वभूवन्, संभृतसुखसंभारेषु विशालेष्वगारेषु न्यवसन्, नानारसानि भोज्यभक्ष्यपेयचूष्यलेह्यानि चाश्नन्, येषां यावदिह मानुष्यकोपपाद्यं सर्वं तद्धस्तगतमासीत्त इदानीं यायावरा इवानिकेतना अकिञ्चना दैवमात्रशरणाः कथं कथमपि कालं क्षपयन्ति 'नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेणे'ति च प्रमाणयन्ति ।

शुभाशुभयोरकस्मादेव समुपस्थानं न केवलं साधारणमनुष्याणां विषये अयत्न एव वा दरीदृश्यते अपितु महामहिमशालिनामितिहासपुराणेषु प्रख्यातयशसां महतामपि

विषये तयोस्तादृश्येव स्थितिः। मृदुं लालितस्य राजप्रासादेषूषितस्य सर्वस्य सम्भावितस्य रामस्य दैवे पराचि वनप्रवासः, पाण्डुपुत्राणां विविधं कदर्थितानां वनाद्वनं पर्यटितानां चिरस्य राज्यलक्ष्मीपरिग्रहः, आश्रमललामभूतायाः कण्वदुहितुः शकुन्तलाया दुर्वाससः शापात् पत्या निराकरणं तज्जन्यं न्यक्करणं च स्मृतिलाभे पुनरङ्गीकारो बहुमानश्चेत्यादयो व्यतिकराः प्रकृतार्थं पर्याप्तं समर्थयन्ते। राजराजो नलः प्रथमं पितृपितामहपरम्पराप्राप्तां राज्यसम्पत्तिमासाद्य शुभमन्वभूत्। तदनन्तरं च सहसैव स्वसम्पत्तिविरहितो महत्या दुःखश्रेण्या सङ्गतोऽरण्यादरण्यानीं भ्राम्यन् क्लेशमतिशयमासिषेवे। पुनरपि च तामासाद्य पूर्ववदेव सुखं भेजे। एतदेव तथ्यं समीक्ष्य सन्दिशति शाकुन्तले महाकविकालिदासः—

'यात्येकतोऽस्तशिखरं पतिरोषधीनाम् आविष्कृतोऽरुणपुरःसर एकतोऽर्कः।
तेजोद्वयस्य युगपद् व्यसनोदयाभ्याम् लोको नियम्यत इवात्मदशान्तरेषु॥'

सम्पत्तिर्विपत्तिः, उत्कर्षोऽपकर्षः, जन्म मृत्युः, उत्थानं पतनम्, सुखं दुःखमिति च परिवृत्तेरवस्थान्तरमेव नान्यत्। यथा शैशवं तदनु यौवनं तदनु वार्धकं तदनु देहावसानं तदनु जन्मान्तरम्, एवमेव जीवने सुखदुःखे परिवर्तेते।

तदेतादृशं सुखदुःखयोरस्थैर्यं सहसैव च पुरुषकारादि साक्षात्कारणमन्तरेणैव तयोरुपस्थितिः क्रियते इति विचारे काचिल्लोकोत्तरा शक्तिरेव पृष्ठत इवागत्य कार्यनिर्वाहिकेति सपदि मनसि समायाति। सैष लोकोत्तरा शक्तिर्भवितव्यता विधिर्नियतिर्दैवमित्यादिशब्दैरभिधीयते। इयं भगवती महाशक्तिसंपन्ना। न केवलमल्पशक्तियुक्ता मानवा अन्येऽवराः प्राणिन एव वास्याः शासनमनुवर्तन्ते, किन्तु सर्वमेव जडचेतनात्मकमाब्रह्माण्डं जगदस्या वशे वर्तते। इह सर्वं परिवर्तते। नात्रार्था एकेन रूपेणावतिष्ठन्ते। अत एवास्य लोकस्य जगदिति समाख्या संगच्छते। अस्तीह भूसंनिवेशपरिवर्तः स्रोतसः स्थाने पुलिनं पुलिनस्य च स्रोत इत्यादिः। अस्ति च कालपरिवर्त ऋतुपर्ययादिः। अस्ति च दशापरिवर्तः सम्पन्नस्य विपन्नत्वं सुखिनो वा दुःखित्वं तद्विपर्ययो वेत्यादिः।

परं दुःखोदधौ निमज्जनेन धैर्यमेवावलम्बनीयम्। धैर्यमाश्रित्यैव धीरा दुःखोदधेः पारङ्गन्तुं पारयन्ति। उक्तं च—

त्याज्यं न धैर्यं विधुरेऽपि काले धैर्यात्कदाचित्स्थितिमाप्नुयात्सः।
जाते समुद्रेऽपि हि पोतभङ्गे सांयात्रिको वाञ्छति तर्तुमेव॥

धैर्यधना हि साधवः। ते सम्पदि न हृष्यन्ति, न च विपदि विषीदन्ति। सम्पदि विपदि च महतामेकरूपतैव लक्ष्यते। अत उच्यते—

उदेति सविता ताम्रस्ताम्र एवास्तमेति च।
सम्पत्तौ च विपत्तौ च महतामेकरूपता॥

अतः सपदि न हृष्येत्, न च विपदि विषीदेत्। विपदि जनैः धैर्यधारणं विधेयम्।

परिशिष्ट (अ)

लेखोपयोगी चिह्न

अल्प-विराम-चिह्नम्	,	(Comma)
अर्धविराम-चिह्नम्	;	(Semi-Colon)
पूर्णविराम-चिह्नम्	।	(Full stop)
प्रसङ्गसमाप्तिचिह्नम्	॥	
प्रश्नबोधकचिह्नम् (काकुचिह्नम्)	?	(Sign of Interrogation)
विस्मयादिबोधकचिह्नम् सम्बोधनाऽऽश्चर्यखेदचिह्नम्	!	(Sign of admiration, surprise etc)
उद्धरणचिह्नम्	" "	(Inverted commas)
निर्देशचिह्नम्	:—	
योजकचिह्नम्	-	(Hyphen)
कोष्ठक-(पाठान्तर) चिह्नम्	[ ] ( )	(Parenthesis)
सन्धिविच्छेदचिह्नम्	+	
पर्यायचिह्नम्	=	
त्रुटिनिर्देशचिह्नम्	∧	

परिशिष्ट (ब)

रोमन अक्षरों में संस्कृत लिखने की विधि

यूरोपीय विद्वान् संस्कृतभाषा का अध्ययन बड़े चाव से करते हैं। इन विद्वानों ने भारतीय सभ्यता और संस्कृति पर उपादेय ग्रन्थ भी लिखे हैं जिनसे हम भी उपकृत हो सकते हैं। यूरोपीय विद्वान् संस्कृत शब्दों को रोमन अक्षरों में लिखते हैं। उस विधि का ज्ञान हम लोगों के लिए भी नितान्त आवश्यक है। पुरातत्त्व का अन्वेषण करते समय इस ज्ञान का पग-पग पर काम पड़ता है।

a	ā	i	ī	u	ū	ṛ	ṝ	ḷ	e	o	ai	au
अ	आ	इ	ई	उ	ऊ	ऋ	ॠ	लृ	ए	ओ	ऐ	औ

अनुनासिक (स्वर के ऊपर) अथवा अनुस्वार—ṁ अथवा ṃ

विसर्ग—ḥ

क्	ख्	ग्	घ्	ङ्
k	kh	g	gh	ṅ
च्	छ्	ज्	झ्	ञ्
c	ch	j	jh	ñ
ट्	ठ्	ड्	ढ्	ण्
ṭ	ṭh	ḍ	ḍh	ṇ
त्	थ्	द्	ध्	न्
t	th	d	dh	n
प्	फ्	ब्	भ्	म्
p	ph	b	bh	m
य्	र्	ल्	व्	
y	r	l	v	
श्	ष्	स्	ह्	
ś	ṣ	s	h	

कभी कभी ऋ, ॠ, लृ को क्रमशः ṛi ṛ'i ḷri च्, छ् को ch, chh श्, ष् को c, sh भी लिखा जाता है।

इस प्रकार इन अक्षरों को जोड़कर शब्द लिखे जाते हैं, उदाहरणार्थ—

रश्मि	raṣmi
क्षत्रिय	kṣatriya
क्लृप्त	kḷpta

हिन्दी-संस्कृत-शब्दकोश

आवश्यक-निर्देश

(१) इस पुस्तक में प्रयुक्त शब्दों का ही इस शब्दकोष में संग्रह है ।

(२) जो शब्द बालकः, रमा, फलम् के तुल्य हैं, उनके रूप बालक आदि के तुल्य चलावें । : से पुं०, आ से स्त्री०, अम् से नपुं० समझना चाहिए । शेष शब्दों के आगे पुं० आदि का निर्देश किया गया है । उनके रूप शब्द रूप संग्रह में दिए तत्सदृश शब्दों के समान चलावें । संक्षेपार्थ निम्नलिखित संकेतों का प्रयोग किया गया है—

पुं० = पुंल्लिङ्ग । स्त्री० = स्त्रीलिङ्ग । न० = नपुंसकलिङ्ग ।

(३) धातुओं के आगे संकेत किया गया है कि वे किस गण की हैं और उनका किस पद में प्रयोग होता है । धातुओं के रूप चलाने लिए 'धातुरूप संग्रह' में दी गई प्रत्येक गण की विशेषताओं को देखें तथा उस गण की विशिष्ट धातुओं को भी देखें । उन्हीं के अनुसार रूप चलावें । संक्षेप के लिए निम्नलिखित संकेत प्रयुक्त हैं—

१ = भ्वादिगण । २ = अदादिगण । ३ = जुहोत्यादिगुण । ४ = दिवादिगण । ५ = स्वादिगण । ६ = तुदादिगण । ७ = रुधादिगण । ८ = तनादिगण । ९ = क्र्यादिगण । १० = चुरादिगण । प० = परस्मैपद । आ० = आत्मनेपद । उ० = उभयपद ।

(४) अव्ययों के रूप नहीं चलते हैं । उनमें कोई भी परिवर्तन नहीं होता है । अ० = अव्यय ।

(५) विशेषणों के रूप तीनों लिङ्गों में चलते हैं । विशेष्य के अनुसार ही विशेषणों का लिङ्ग होता है । वि० = विशेषण ।

(६) जहाँ एक शब्द के लिए एक से अधिक शब्द दिए हैं, वहाँ कोई एक शब्द चुन लें ।

अ

अंक = चिह्नम्, अभिज्ञानम्
अंकुर = अंकुरः, प्ररोहः
अंकुश = अंकुशः
अँगरेज = आंग्लदेशीयः
अँगरेजी = आंग्लभाषा
अंगार = अंगारः-रम्
अँगिया = कञ्चुलिका
अंगीठी = हसन्ती (स्त्री०)
अंगूठी = अङ्गुलीयकम्
अंगूठी नामांकित = मुद्रिका
अंगूर = द्राक्षा, मृद्वीका
अंगोछा = अंगप्रोञ्छनम्
अंजन = कज्जलम्

अटारी = अट्टः
अण्डर-वीयर = अधोरुकम्
अतिथि = अतिथिः, प्राघुणः
अतिथि-सत्कर्ता = आतिथेयः
अदरक = आर्द्रकम्
अदल-बदल = विनिमयः
अदालत = न्यायालयः
अधिकार = प्रभुत्वम्
अधिकार करना = प्र + भू (१ प०)
अधीन = आयत्तः (वि०)
अधेला = अर्द्धपणः
अध्यक्ष = अधिष्ठातृ, अधिकारिन्
अध्ययन = पठनम्
अध्यापक = अध्यापकः, उपाध्यायः
अनर्थ = अब्रह्मण्यम्
अनाज = अन्नम्, शस्यम्, धान्यम्
अनार = दाडिमम्
अनुभव करना = अनु + भू (१प०)
अनुसन्धान करना = अनु + सं + धा (३ उ०)
अन्दर = अन्तः (अ०), अन्तरे (अ०)
अपना = स्वीय, स्वकीय
अपनाना = स्वी + कृ (८ उ०)
अपमान करना = अव + ज्ञा (९ उ०)
अप्राप्ति = अनुपलब्धिः
अफवाह = लोकापवादः
अभिनय करना = अभि + नी (१ उ०)
अभ्रक = अभ्रकम्
अमचूर = आम्रचूर्णम्
अमरूद = आम्रलम्, दृढबीजम्
अमावट = आम्रातकम्
अमावस्या = दर्शः, अमावास्या
अमृत = पीयूषम्, सुधा
अरहर = आढकी (स्त्री०)
अर्गला = अर्गलम्
अलग होना = वि + युज् (४ आ०)
अलमारी = काष्ठमञ्जूषा
अवश्य = ननु, नूनम्, न······न (अ०)
असमर्थ = अक्षमः (वि०)
असेम्बलीहाल = आस्थानम्

आ

आँख = चक्षुष् (न०), नेत्रम्, लोचनम्
आँखें चार करना = परस्परावलोकनम्
आँगन = अजिरम्, अङ्गनम्, प्राङ्गणम्
आँचल = पटान्तः, वस्त्रप्रान्तः
आँत = अन्त्रम्
आँधी = प्रवातः
आँव = श्लेष्मन् (पुं०)
आँवड़ा = आम्रातकम्
आँवला = आमलकी (स्त्री०)
आँसू = अश्रु (न०), अस्रम्
आक = अर्कः
आकाश = व्योमन् (न०), वियत् (न०)
आग = हुतवहः, कृशानुः (पु०), वह्निः
आगन्तुक = आगन्तुः (पुं०), आगन्तुकः
आगामी = भाविन्, भविष्यत्
आगे = अग्रे (अ०), ततः (अ०)
आग्रह = निर्बन्धः
आघात = प्रहारः, आक्रमणम्
आचरण = आचारः, व्यवहारः
आचार्य = गुरुः, उपाध्यायः
आजकल = अद्यत्वे (अ०)
आज्ञा = शासनम्, नियोगः आदेशः
आज्ञा देना = अनु + ज्ञा (९ उ०)
आटा = चूर्णम्
आटे का हलुआ = यवागूः (स्त्री०)
आड़ू = आर्द्रालुः (पुं०)
आढ़ = आढकः-कम्
आढ़त = अभिकरणम्
आढ़ती = अभिकर्तृ (पुं)
आदत = शीलम् , स्वभावः
आदर = संमानः, सत्कारः
आदर पाना = आ + दृ (६ आ०)
आदान = ग्रहणम् , स्वीकारः
आदेश = निदेशः, शासनम्
आधीरात = निशीथः
आना = आगम् (१ प०), अभ्यागम्
(१ प०), आ + या (२ प०)
आपड़ना = आ + पत् (१ प०)

आपत्तिग्रस्त = आपन्नः (वि०)
आबनूस = तमालः
आभूषण = आभरणम् , आभूषणम्
आम का वृक्ष = रसालः, सहकारः, आम्रः
आम का फल = आम्रम्
आम, कलमी = राजाम्रम्
आमदनी = आयः, धनागमः
आमरास्ता = जनमार्गः
आयरन (लोहा) = अयस् (न०)
आयात पर चुंगी = आयातशुल्कम्
आयु = आयुष् (न०), वयस् (न०)
आराम = सुखम् , विश्रामः
आराम कुर्सी = सुखासन्दिका
आरी = करपत्रम्
आलस्य करना = तन्द्राय (णिच्)
आलू = आलुः (पुं०)
आलू की टिकिया = पक्वालुः (पुं०)
आलूबुखारा = आलुकम्
आशंका करना = आ + शङ्क् (१ आ०)
आशा करना = आ + शंस् (१ आ०)

इ

इंधन = एधस् (न०)
इंस्पेक्टर = निरीक्षकः
इकट्ठा करना = सं + चि (५ उ०), अर्ज् (१० उ०)
इच्छा = अभिलाषः, मनोरथः
इच्छुक = स्पृहयालुः (वि०), इच्छुकः
इत्र = गन्धतैलम्
इनकमटैक्स = आयकरः
इमरती = अमृती (स्त्री०)
इमली = तिन्तिडीकम्
इमारत = भवनम् , गृहम्
इम्तहान = परीक्षा
इम्पोर्ट = आयातः
इलायची = एला
इस्तरी = स्तरणी
इस्तीफा = त्यागपत्रम्

ई

ईंट = इष्टका
ईंट, पक्की = पक्वेष्टका
ईर्ष्या = मत्सरः
ईश्वर = परमेश्वरः

उ

उगलना = उद् + गृ (६ प०)
उगला हुआ = उद्वान्तम् (वि०)
उग्र = तीक्ष्णम्
उचित-अनुचित = सदसत् (न०)
उचित है = स्थाने (अ०)
उठना = उत्था (१ प०), उच्चर् (१ प०), उत् + नम् (१ प०)
उठाना = उन्नी (उद् + नी, १ उ०)
उड़द = माषः
उड़ना = उत्पत् (१ प०), उद्गम् (१ प०)
उतरना = अव + तृ (१ प०)
उतार = अवरोहः
उत्कण्ठित = उत्कः, उत्कण्ठितः
उत्तर, दिशा = उदीची (स्त्री०)
उत्तर की ओर = उदक् (उद् + अञ्च्) (पुं०)
उत्तरायण = उत्तरायणम्
उत्तीर्ण होना = उत्तॄ (उद् + तॄ १ प०)
उत्थान-पतन = पातोत्पातः
उत्पन्न होना = सं + भू (१ प०)
उधार = ऋणम्
उधार खाते = नाम्नि (नामन् , स०)
उपजाऊ = उर्वरा
उपभोग करना = उप + भुज् (७ आ०)
उपयोग = विनियोगः, उपयोगः
उपवास करना = उप + वस् (१ प०)
उपेक्षा करना = उपेक्ष् (उप + ईक्ष्, १ आ०)
उबटन = उद्वर्तनम्
उबालना = क्वथ् (१ प०)
उल्लंघन करना = उच्चर् (१ आ०), लङ्घ् (१० उ०), अति + वृत् (१ आ०)
उल्लू = कौशिकः, उलूकः
उस्तरा = क्षुरम्

ऊ

ऊँचा = प्रांशुः (वि०)
ऊँट = क्रमेलकः, उष्ट्रः
ऊखल = उलूखलम्
ऊधम = उपद्रवः
ऊधमी = उत्पातिन्
ऊन = ऊर्णम्
ऊनी = राङ्कवम्
ऊपर = ऊर्ध्वम्
ऊपर फेंकना = उत्+क्षिप् (६ उ०)
ऊसर = ऊषरः

ए

एक एक करके = एकैकशः (अ०)
एक ओर से = एकतः (अ०)
एक प्रकार से = एकधा (अ०)
एक बात = एकवाक्यम्
एक राय वाले = एकमतिः (स्त्री०)
एकान्त में = रहसि (रहस् , स०)
एजेण्ट = प्रतिनिधिः
एजेन्सी = अभिकरणम्
एटम् = अणुः
एटमबम = अणुबंबम्
एडिटर = सम्पादकः
एडिशनल डाइरेक्टर = अतिरिक्त-शिक्षा-संचालकः
एरंड = एरण्डः

ओ

ओट = व्यवधानम्
ओढ़नी = प्रच्छदपटः
ओम् = उद्गीथः, प्रणवः
ओला = करकाः
ओवरकोट = लंबकंचुकः, बृहतिका
ओस = तुषारः, प्रालेयम्
ओहो = अहो, ही, हंहो

क

कंगन = कङ्कणम्
कंघा = कंकतम्
कंघी = कंकतिका
कंचन = सुवर्णम्
कंजूसी = कार्पण्यम्
कंठ = गलः, गरः
कंठा = कण्ठाभरणम्
कंद = खंडमोदकः
कंधा = स्कन्धः
कंधे की हड्डी = जत्रु (न०)
ककड़ी = कर्कटिका, कर्कटी (स्त्री०)
कक्षा का साथी = सतीर्थ्यः
कचनार = कोविदारः
कचहरी = न्यायालयः
कचालू = पक्वालुः (पुं०)
कचौड़ी = पिष्टिका
कछुआ = कच्छपः
कटहल का पेड़ = पनसः
कटा हुआ = लूनम् (वि०)
कटोरा = कटोरम्
कटोरी = कटोरिका, कचोलः
कठघरा = काष्ठावेष्टनम्
कठपुतली = पुत्रिका
कठफोड़ा = दार्वाघातः
कड़ा, सोने आदि का = कटकः
कड़ाह = कटाहः
कड़ाही = स्वेदनी (स्त्री०)
कढ़ी = क्वथिता
कण = लवः, लेशः, अणुः
कतरनी = कर्तरी, कर्तनी
कत्था = खदिरः
कथा = आख्यानम्, आख्यायिका
कथोपकथन = संभाषणम्
कदम्ब = नीपः, भृङ्गवल्लभः, मदिरागंधः
कद्दू = कूष्माण्डः
कनखजूरा = कर्णजलूका
कनफूल = कर्णपूरः
कनेर = कर्णिकारः
कप् = चषकः
कपट = कैतवम्
कपटी = छलिन्

कपड़ा = वस्त्रम्
कपूत = कुसूनुः
कपूर = घनसारः
कफ = श्लेष्मन् (पुं०)
कबाब = शूलिकम्, शूल्यमांसम्
कबाबी = मांसाशिन्
कबूतर = पारावतः, कपोतः
कब्ज = अजीर्णः
कमर = श्रोणिः (स्त्री०), कटिः (स्त्री०)
कमरख = कर्मरक्षम्
कमरा = कक्षः
कमल, नीला = इन्दीवरम्, कुवलयम्
कमल, लाल = कोकनदम्
कमल, श्वेत = कुमुदम्, पुण्डरीकम्
कमीशन = शुल्कम्
कमीशन एजेण्ट = शुल्काजीवः
कम्बल = कम्बलः, कम्बलम्
करधन = मेखला
करना = वि + धा (३ उ०), चर् (१प०)
अनु + ष्ठा (१ प०)
करील = करीलः
करेला = कारवेल्लः
करौंदा = करमर्दकः
कर्जा = ऋणम्
कर्जा देने वाला = उत्तमर्णः
कर्जा लेने वाला = अधमर्णः
कलई, पुताई की = सुधा
कलफ करना = मण्डा + कृ (८ उ०)
कलम = कलमः
कलवार = शौण्डिकः, सुराजीविन्
कलश = कलशः
कलह = विवादः, वाग्युद्धम्
कलाई = मणिबन्धः
कलाई से कनी अँगुली तक = करभः
कलाकन्द = कलाकन्दः
कली = कलिका
कवच = वर्मन्
कष्ट करना = आयासः
कसकूट = कांस्यकूटः
कहना = अभि + धा (३ उ०), भाष्
(१ आ०), उद् + गृ (६ प०),
उद् + ईर् (१० उ०)
कहाँ = क्व, कुत्र (अव्यय)
काँच = स्फटिकः
काँटा = कंटकः, कंटकम्
कांति = द्युतिः, दीप्तिः
काँपना = कम्प् (१ आ०), वेप् (१ आ०)
काँसा = कंसम्
काई = शैवालः
काक = वायसः
कागज = पत्रम्
काच = स्फटिकः
काजल = अंजनम्
काजू = काजवम्
काटना = कृत् (६ प०), छिद् (७ उ०),
लू (९ उ०)
कान = श्रोत्रम् , श्रवणम् , कर्णः ।
कान की बाली = कुण्डलम्
कापी = संचिका
काफल = श्रीपर्णिका
कॉफी = कफघ्नी (स्त्री०)
काम = कर्मन् (न०), कार्यम्
काम आना = उप + युज् (४ आ०)
कामदेव = मदनः, स्मरः, अनङ्गः
कार्टून = उपहासचित्रम्
कार्तिकेय = सेनानीः (पुं०)
कार्पोरेशन = निगमः
कालेज = महाविद्यालयः
कितने = कति (वि०)
किनारा = तीरम् , तटम्
किरण = मयूखः, गभस्तिः (पुं०),
दीधितिः (स्त्री०)
किवाड़ = कपाटम्
किवाड़ के पीछे का डण्डा = अर्गलम्
किशमिश = शुष्कद्राक्षा
किसान = कृषीवलः, कृषकः
कीचड़ = पङ्कः, कर्दमः
कीर्तन = गुणकथनम्

कीर्ति = यशस् (न०), विश्रुतिः (स्त्री०)
कील = कीलकः
कुँदरू = कुन्दरुः (पुं०)
कुआँ = कूपः
कुकर्म = कुकृत्यम्
कुकुरमुत्ता = कुच्छत्रकः
कुटिया = उटजः, पर्णशाला
कुतिया = शुनी
कुत्ता = कुक्कुरः, श्वन् (पुं०)
कुदाल = खनित्रम् , कुद्दारः
कुदिन = आपत्कालः
कुन्द = कुन्दम्
कुप्पी = कुतूः
कुबड़ा = कुब्जः
कुबेर = कुबेरः, धनदः
कुमुद की लता = कुमुदिनी (स्त्री०)
कुम्हार = कुलालः, चक्रिन्
कुर्ता = कञ्चुकः
कुर्सी = आसन्दिका
कुलपरम्परा = कुलक्रमम्
कुलफी = कुलपी (स्त्री०)
कुली = भारवाहः, भारहरः
कुलीन = अभिजनः, कुलीनः
कुल्हड़ = करकः, क्षुद्रमृत्पात्रम्
कुश = दर्भः
कुशलता = पाटवम्
कुसुम = पुष्पम्, प्रसूनम्
कुहनि = कफोणिः
कुहरा = तुषारः
कूटना = अवहननम्, ताडनम्
कूड़ा = अवस्करः
कूदना-कुर्द्, कूर्द् (१ आ०)
कूबड़ = ककुदः
कूल्हा = नितंबास्थि (न०)
कृपया = सानुकम्पम्, सानुग्रहम्
कृपा = प्रसादः, उपकारः
कृपाण = कौक्षेयकः
केंकड़ा = कुलीरः
केतली = कन्दुः (पुं०, स्त्री०)
केबिनेट = मन्त्रिपरिषद् (स्त्री०)
केन्सर = विद्रधिः (पुं०), विषव्रणम्
केला = कदलीफलम्
केवड़ा = केतकी (स्त्री०)
कैंची = कर्तरी (स्त्री०)
कै = वमथुः (पुं०)
कोंपल = किसलयम्
कोट = प्रावारः
कोठरी = लघुकक्षः
कोतवाल = कोटपालः
कोतवाली = कोटपालिका
कोमलस्वर = मन्द्रस्वरः
कोयल = परभृतः, कोकिलः
कोल्हू = रसयन्त्रम्
कौवा = ध्वाङ्क्षः, वायसः, काकः
क्या = किम्, किंतु, ननु (अ०)
क्या लाभ = को लाभः, किं प्रयोजनम्, किम्
क्रीडा करना = क्रीड् (१ प०), रम् (१ आ०)
क्रीम = शरः
क्रोध करना = क्रुध् (४ प०), कुप् (४ प०)
क्रोधी = अमर्षणः
क्लर्क = लिपिकारः
क्षत्रिय—क्षत्रियः, द्विजातिः, द्विजन्मन् (पुं०)
क्षमा करना = क्षम् (१० उ०), क्षम् (१ आ०, ४ प०)

ख

खंजन = खंजरीटः, खंजखेलः, खञ्जनः
खजूर = खर्जूरम्
खड्ग = खड्गः
खजानची = अर्थाधिकारिन्
खजाना = निधानम्
खटिया = खट्विका
खड़ाऊँ = पादुका
खपड़ा = खर्परः
खपड़ैलका = खर्परावृतम् (वि०)

खम्बा = स्तम्भः
खरबूजा = खर्बुजम्
खरीद = क्रयः
खरीदता = पण् (१ आ०), क्री (९ उ०)
खर्च करना = विनियोगः, व्ययः
खलिहान = खलम्
खस्ता पूड़ी = शष्कुली (स्त्री०)
खाँसी = कासः
खाजा = मधुशीर्षः
खाट = खट्वा
खाद्य = खाद्यम्
खान = खनिः (स्त्री०)
खाना = भक्ष् (१० उ०), खाद् (१ प०),
भुज् (७ आ०)
खाया हुआ = जग्धम् , भुक्तम्
खिचड़ी = कृशरः
खिड़की = गवाक्षः
खिन्न होना = सद् (१ प०)
खिरनी = क्षीरिका
खींचना = कृष् (१ प०)
खीर = पायसम्
खील = लाजाः (लाज, ब० व०)
खुमानी = क्षुमानी (स्त्री०)
खूँटी = नागदन्तकः
खून = रुधिरम्
खेत = क्षेत्रम्
खेती = कृषिः (स्त्री०)
खेती के औजार = कृषियन्त्रम्
खेल का मैदान = क्रीडाक्षेत्रम्
खैर = खदिरः
खोजना = गवेष् (१० उ०)
खोदना = खन् (१ उ०)
खोवा = किलाटः

ग

गंगा = त्रिपथगा, सुरसरित् (स्त्री०)
गंडासा = तोमरः
गगरा = कलशः, घटः, गर्गरः
गगरी = गर्गरी
गज = हस्तिन् (पुं०)
गजक = गजकः
गज्जा = खल्वाटः
गडरिया = अजाजीवः
गदा = गदा
गद्दा = तूलसंस्तरः
गधा = गर्दभः, खरः
गन्धक = गन्धकः
गरजना = गर्जनम्
गर्दन = ग्रीवा, कण्ठः
गली = वीथिका
गवेषणा करना = गवेष् (१० उ०)
गाँव = ग्रामः
गाजर = गृञ्जनम्
गाय = गो (स्त्री०)
गाल = कपोलः
गाहक = ग्राहकः
गिद्ध = गृध्रः
गिनना = गण् (१० उ०)
गिरना = पत् (१ प०), निपत् (१ प०),
भ्रंश् (१ आ०)
गिरहकट = ग्रन्थिभेदकः
गिलास = कंसः, काचकंसः
गीदड़ = गोमायुः (पुं०)
गुझिया = संयावः
गुणगान करना = कृत् (१० उ०)
गुप्त = निभृतम् (वि०)
गुफा = गह्वरम्
गुर्दा = गुर्दः
गुलदस्ता = स्तबकः, पुष्पगुच्छः
गुलाब = स्थलपद्मम्
गुलाम = दासः
गुलामी = दासत्वम्
गुस्सा करना = क्रुध् (४ प०), कुप् (४ प०)
गूँगा = मूकः
गूगल = गुग्गुलः
गूलर = उदुम्बरम्
गेंद = कन्दुकः, गेन्दुकम्
गेंदा = गन्धपुष्पम्

गैलरी = वीथिका
गेहूँ = गोधूमः
गैंडा = गंडकः
गोत्र = कुलम्
गोबर = गोमयम्
गोभी = गोजिह्वा
गोली = गोलिका, गुलिका
गोह = गोधा
ग्रीष्मऋतु = निदाघः
ग्लेशियर = हिमसरित् (स्त्री०)

घ

घंटा (समय) = होरा
घटना (होना) = घट् (१ आ०)
घटना (कम होना) = अप + चि (५ उ०)
घटिया = अनु (अ०), उप (अ०)
घड़ा = घटः, कुम्भः
घड़ी = घटिका
घर = सदनम् , गृहम् , भवनम्
घरेलू फर्नीचर = गृहोपस्करः
घाट = घट्टः
घाटी = अद्रिद्रोणी (स्त्री०)
घात = प्रहारः
घातक = मारयितृ, हंतृ (पुं०)
घायल = आहतः (वि०)
घाव = क्षतम्
घास = तृणम्
घी = आज्यम्
घुँघरू = किंकिणी (स्त्री०)
घुटना = जानुः (पुं, न०)
घुड़सवार = सादिन् (पुं०), अश्वारोहिन् (पुं०)
घूमना = भ्रम् (४ प०), चर् (१ प०), संचर् (१ प०)
घेरा = परिधिः (पुं०)
घेवर = घृतपूरः, घार्तिकः
घोंसला = कुलायः
घोड़ा = अश्वः, वाजिन् (पुं०)
घोषणा करना = घुष् (१० उ०)

च

चंडाल = चांडालः
चकवा = कोकः, चक्रवाकः
चकोतरा (फल) = मधुकर्कटी (स्त्री०), मधुजम्बीरम्
चक्कर खाना = परि + वृत् (१ आ०)
चचेरा भाई = पितृव्यपुत्रः
चटकनी = कीलः, अर्गलम्
चटनी = अवलेहः
चटाई = किलिंजकः
चट्टान = शिला
चढ़ाव = आरोहः
चतुःशाला = चतुःशालम्
चतुर = विदग्धः (वि०)
चना = चणकः
चन्द्रमा = सुधांशुः (पुं०)
चपत = चपेटः
चपरासी = लेखाहारकः, प्रेष्यः
चपाती = रोटिका
चप्पल = पादूः (स्त्री०), पादुका
चबूतरा = स्थण्डिलम्, वेदिः (स्त्री०)
चबेना = चर्वणम्
चबेनी = भृष्टान्नोपहारः
चमक = कांतिः
चमकना = भास् (१ आ०), द्युत् (१ आ०), दिव् (४ प०)
चमचम (मिठाई) = चमनम्
चमचा = दर्वी (स्त्री०)
चमड़ा = चर्मन् (न०)
चमार = चर्मकारः
चमेली = मालती (स्त्री०)
चम्पा = चम्पकः
चरना = चर् (१ प०)
चर्बी = वसा
चर्बी, हड्डी की = मज्जा
चलना = चल् (१ प०), प्र + वृत् (१ आ०) प्र + स्था (१ आ०)
चाँदनी = कौमुदी (स्त्री०), ज्योत्स्ना

चॉक, लिखने की = कठिनी (स्त्री०)
चाकर = किंकरः, दासः
चाकू = छुरिका, कृपाणिका
चाचा = पितृव्यः
चाची = पितृव्या
चाट = अवदंशः
चातक = चातकः
चादर = प्रच्छदः
चान्सलर = कुलपतिः (पुं०)
चापलूसी = स्नेहभणितम्
चाबुक = तोत्त्रम्
चाय = चायम्
चावल = व्रीहिः (पुं०)
चावल, भूसी-रहित = तण्डुलः
चाहना = ईह् (१ आ०), वाञ्छ् (१प०)
काङ्क्ष् (१ प०)
चिड़िया = चटका, पत्त्रिन् (पुं०)
चित्त = चेतस् (न०), चित्तम्
चित्रकार = चित्रकारः
चिनगारी = क्षुद्रांगारः-रम्
चिमठा = संदंशः
चिरचिटा (ओषधि) = अपामार्गः
चिरौंजी = प्रियालक्
चिलमची = हस्तधावनी (स्त्री०),
करसालिनी
चिह्न = अङ्कः, लक्ष्मन् (न०)
चीड़ (वृक्ष) = भद्रदारुः (पुं०)
चीनी = सिता
चीफ़ = प्रधानपुरुषः
चीफ मिनिस्टर = मुख्यमन्त्रिन् (पुं०)
चीरना = छिद् (७ उ०)
चील = चिल्लः
चुंगी = शुल्कः, शुल्कशाला
चुंगी का अध्यक्ष = शौल्किकः
चुगना = चि (५ उ०)
चुगुलखोर = पिशुनः, कर्णेजपः
चुगलखोरी = पैशुन्यम्
चुंबहारा = चूडाहारः
चुनना = चि (५ उ०), अव+चि
(५ उ०)

चुराना = मुष् (९ प०), चुर् (१० उ०)
चूड़ी = काचवलयम्
चूल्हा = चुल्लिः (स्त्री०)
चेचक = शीतला
चेष्टा करना = चेष्ट् (१ आ०)
चोंच = चञ्चुः (स्त्री०), चञ्चूः (स्त्री०)
चोकर = कडंगरः, तुषः
चोट = क्षतम्
चोटी = शिखा, सानुः (पुं०, न०),
शृङ्गम्
चोर = पाटच्चरः, स्तेनः, तस्करः, चौरः
चौक = चतुष्पथः, शृङ्गाटकम्
चौकन्ना = प्रत्युत्पन्नमतिः (वि०)
चौमंजिला = चतुर्भूमिकः
चौराहा = शृङ्गाटकम्, चतुष्पथ

छ

छज्जा = वलभिः (स्त्री०), वलभी
(स्त्री०)
छटाँक = पट्टंकः
छटा = द्युतिः (स्त्री०)
छड़ी = यष्टिः (स्त्री०)
छत = छदिः (स्त्री०)
छाता (छत्र) = आतपत्रम्
छाती = वक्षस् (न०), उरस् (न०)
छात्र = छात्रः, अध्येतृ (पुं०), विद्यार्थिन्
(पुं०)
छात्रा = छात्रा, अध्येत्री (स्त्री०)
छानना = स्रावय (णिच्)
छाल = त्वच् (स्त्री०)
छाला = पिटिका, त्वक्स्फोटः
छावनी = स्कन्धावारः, शिबिरम्
छिपकली = गृहगोधिका
छिप जाना = तिरो+भू (१ प०)
छिपना = ली (४ आ०), नि+ली
(४ आ०), अन्तर्+धा (३ उ०)
छीलना = शो (४ प०), त्वक्ष् (१ प०)
छीला हुआ = त्वष्टम् (वि०)
छुट्टी = विसृष्टिः (स्त्री०), अवकाशः

छुरी = छुरी, छुरिका
छुहारा = क्षुधाहरम्
छेद करना = छिद्र् (१० उ०)
छेनी = वृश्चनः
छोटा भाई = अनुजः
छोड़ना = त्यज् (१ प०), मुच् (६ उ०), हा (३ प०), अस् (४ प०), अप+अस् (४ प०)
छोड़ा हुआ = परित्यक्तः (वि०), प्रत्याख्यातः

ज

जंगल = अरण्यम् , काननम् , वनम् , विपिनम्
जंगली चावल = श्यामाकः (साँवा)
जंघा = ऊरुः (पुं०)
जंजीर = शृङ्खला
जंतु = प्राणिन् , जीवः
जंभाई = जृम्भणम्
जंवाई = जामातृ (पुं०)
जड़ = मूलम्
जड़ से = मूलतः
जन्म लेना = प्रादुर् + भू (१ प०)
जरा = तावत् (अ०)
जर्मनसिल्वर = चन्द्रलौहम्
जल = तोयम् , अम्बु (न०), वारि (न०)
जलकण = शीकरः
जलतरंग (बाजा) = जलतरङ्गः
जलन = तापः, दाहः
जलना = ज्वल् (१ प०), इन्ध् (७ आ०)
जलपान = जलपानम्
जल-सेनापति = नौसेनाध्यक्षः
जलाना = दह् (१ प०)
जलूस = जनयात्रा
जलेबी = कुण्डली (स्त्री०)
जवाकुसुम = जवाकुसुमम् , जवापुष्पम्
जस्त = यशदम्
जहाज, पानी का = पोतः
जहाज (विमान) = व्योमयानम् , विमानम्
जागना = जागृ (२ प०)
जागने वाला = जागरूकः, जागरितृ (पुं०)
जागरूक = जागरितृ, जागरूकः
जाति = वर्णः, कुलम् , वंशः
जादू = इन्द्रजालम्
जादूगर = ऐन्द्रजालिकः, मायाविन् (पुं०)
जानना = अव+गम् (१ प०), अधि+गम् (१ प०), ज्ञा (९ उ०)
जानने वाला = अभिज्ञः
जाना = गम् (१ प०), इ (२ प०), या (२ प०)
जामुन = जम्बु (स्त्री०), जम्बूः (स्त्री०)
जार, काँच का = काचघटी (स्त्री०)
जाल = जालम् , वागुरा
जाला = लूतिका
जिगर = यकृत्
जितेन्द्रिय = दान्तः
जिद = निर्बन्धः
जिद्दी = आग्रहिन् , हठिन्
जिल्द = प्रावरणम्
जीजा (बहनोई) = भगिनीपतिः, आवुत्तः
जीतना = वि+जि (१ आ०), जि (१ प०)
जीभ = रसना, जिह्वा
जीरा = जीरकः
जीविका = वृत्तिः (स्त्री०), जीविका
जुआ = पणः, द्यूतक्रीडा
जुआरी = द्यूतकारः, कितवः
जुकाम = प्रतिश्यायः, श्लेष्मस्रावः
जुगनू = खद्योतः
जुगाली = रोमन्थः
जुगुप्सा = अरुचिः (स्त्री०)
जुती हुई भूमि = सीता
जुरमाना = अर्थदण्डः
जुलाहा = तन्तुवायः, कुविन्दः
जूड़े की जाली = वेणीजालम्
जूता (बूट) = उपानह् (स्त्री०)
जूता सीने की सुई = चर्मप्रभेदिका
जूही (फूल) = यूथिका
जेल = कारागारम् , बन्दिगृहम्
जोड़ना = सं + योजय (णिच्)

जोतना = कृष् (१ प०, ६ उ०)
जौ = यवः
ज्वार = यवनालः
ज्वाला = शिखा, अर्चिस् (न०)

झ

झंझट = कृच्छ्रम् , आयासः
झंझा = झंझावातः
झंडी = वैजयन्ती, पताका
झक्की = प्रजल्पकः, वावदूकः
झगड़ा = कलहः
झगड़ालू = कलहप्रियः, कलहकामः
झट = तत्क्षणम् , शीघ्रम्
झड़प = कलहः, क्रोधः, आवेशः
झरना = प्रपातः
झाड़ी = कुञ्जः, निकुञ्जः
झाड़ू = मार्जनी (स्त्री०)
झील = सरसी (स्त्री०)
झील, बड़ी = ह्रदः
झुकना = नम् (१ प०)
झुकाना = अवनमय (णिच्)
झोपड़ी = उटजः, कुटीरः
झोला = पुटः, प्रसेवः

ट

टकसाल = टङ्कशालः
टकसाल का अध्यक्ष = टङ्कशालाध्यक्षः
टखना = गुल्फः
टमाटर = रक्ताङ्गः
टब, पानीका = द्रोणिः (स्त्री०), द्रोणी (स्त्री०)
टाइप करना—टङ्क् (१० उ०)
टाइप-राइटर = टङ्कणयन्त्रम्
टाइफाइड = संनिपातज्वरः
टाइम-टेबुल = समय-सारणी (स्त्री०)
टॉफी = गुल्यः
टिंचर = टिंचरः
टिंडा = रोमशफलः, डिंडिशः, टिण्डिशः
टिकट = पत्रकम्
टिकठी = त्रिकाष्ठी, त्रिपादी
टिकुली (बेंदी) = चक्रकम् , ललाटाभरणम्
टिकिया = वटिका
टिटिहरा = टिट्टिभकः
टिटिहरी = टिट्टिभकी
टिड्डी = शलभः
टीयर-गैस = धूमास्त्रम् , अश्रुधूमः
टी (चाय) = चायम्
टी० बी० (तपेदिक) = राजयक्ष्मन् (पुं०), राजयक्ष्मः
टीका (मंगलार्थ) = ललाटिका
टीन = त्रपु
टी पॉट=चायपात्रम्
टी पार्टी = सपीतिः (स्त्री०)
टूटा हुआ = भग्नम् (वि०)
टूथ पाउडर = दन्तचूर्णम्
टूथपेस्ट = दन्तपिष्टकम्
टेनिस का खेल=प्रक्षिप्तकन्दुकक्रीडा
टेलर (दर्जी) = सौचिकः
टेलिग्राम = विद्युत्-संदेशः
टेसू = किंशुकः, पलाशम्
टैंक = आहावः
टैक्स = करः
टोकने वाला = निवारकः, प्रतिबन्धकः
टोकरा = करंडः, कंडोलः
टोकरी = कंडोलकः
टोपी = शिरस्कम्
टोस्ट = भ्रष्टापूपः
ट्रंक = लौहपेटिका
ट्रेडमार्क = पण्यमुद्रा
ट्रैक्टर = खनियन्त्रम्

ठ

ठंडाई = शीतपेयम्
ठग = कितवः, वंचकः
ठगना = वञ्च् (१० आ०), अभि+सं०+धा (३ उ०)
ठीक = परमार्थतः (अ०)
ठीक घटना = उप+पद् (४ आ०)
ठुकराना = वि+हन् (२ प०)
ठोंकना - कील् (१ प०)

ठोकर = स्खलनम्
ठोड़ी = चिबुकम्

ड

डंका = यशःपटहः, डिंडिमः
डंठल = वृन्तम्
डंडा = लगुडः
डंडी मारना=कूटमानं+कृ (८ उ०)
डँसना = दंश् (१ प०)
डबलरोटी = अभ्यूषः
डर = भयम्
डसने वाला = दंशकः
डस्टर = मार्जकः
डाँट = तर्जनम्
डाँटना = भर्त्स् (१० आ०)
डाइनिंग टेबुल = भोजनफलकम्
डाइनिंग रूम = भोजनगृहम्
डाइरेक्टर (एजुकेशन) = शिक्षासंचालकः
डायबिटीज़ = मधुमेहः, मधुप्रमेहः
डाकगाड़ी = द्राग्यानम्
डाकबँगला = विश्रान्तिगृहम्
डाका = लुण्ठनम्
डाकू = लुण्ठाकः, परिपन्थिन् (पुं०)
डाक्टर = भिषग्वरः
डाढ़=दंष्ट्रा
डायरी = दैनंदिनी
डायरेक्टस्पीच = प्रत्यक्षवर्णनम्
डायस = मञ्चः
डालना = नि+क्षिप् (६ उ०)
डाह = मत्सरः
डिक्शनरी = शब्दकोषः
डिनरपार्टी = सहभोजः
डिपटीकमिश्नर = उपायुक्तः
डिपटी डाइरेक्टर (शिक्षा)= उपशिक्षा-
संचालकः
डिपार्टमेण्ट = विभागः
डिपो = भाण्डागारम्
डूबना = मस्ज् (६ प०)
डेस्क = लेखनपीठम्
ड्राइंगरूम = उपवेशगृहम्
ड्राईक्लीनर = निर्णेजकः
